THE BOOK WAS DRENCHED

TEXT DARK AND LIGHT WITH IN THE BOOK ONLY

UNIVERSAL
LIBRARY
OU_184091
UNIVERSAL
LIBRARY

SMANIA UNIVERSITY LIBRARY
all No. 491.2 Acc.No. G 984
C53S

Chintamani, T.R.
Sarasvatikanthabharan

OSMANIA UNIVERSITY LIBRARY

Call No. S 491.2 C535 Accession No. G 984

Author Chintamani, T.R.

Title Sarasvatikaṇṭhābharaṇa

This book should be returned on or before the date last marked below.

Madras University Sanskrit Series No. 11.

GENERAL EDITOR : DR. C. KUNHAN RAJA

Sarasvatīkaṇṭhābharaṇa

OF

Bhojadeva

EDITED BY

T. R. CHINTAMANI, M.A., PH. D.

Senior Lecturer in Sanskrit
University of Madras

UNIVERSITY OF MADRAS
1937

PRINTED AT
ANANDA PRESS, MADRAS.

मद्रपुरीयविश्वविद्यालयसंस्कृतग्रन्थावलिः ११.

सरस्वतीकण्ठाभरणम्

भोजदेवप्रणीतम्

संपादकः
ति. रा. चिन्तामणिः

मद्रपुरीयविश्वविद्यालयः
१९३७

मूल्यम् रू. १.]

TABLE OF CONTENTS

Foreword	...	...	...	... vii
Preface	...	...	...	... ix
Text of the Sarasvatīkaṇṭhābharaṇa			...	... 1–288
Appendix I	...	...	...	... 289
Appendix II	...	...	...	... 511

FOREWORD

The Sarasvatīkaṇṭhābharaṇa of Bhoja which is now published as No. 11 in this series is one of the most important works in the field of Sanskrit Grammar and can safely be placed next to the Aṣṭādhyāyī of Pāṇini. At one time it must have been very popular and must have been held in very high esteem by scholars. The work is profusely quoted by Nārāyaṇa Bhaṭṭa in his Prakriyāsarvasva, which is a commentary on Pāṇini's Aṣṭādhyāyī. But at some stage the work ceased to be current, perhaps due to the popularity of Bhaṭṭoji Dīkṣita's Siddhāntakaumudi (another commentary on Pāṇini's Aṣṭādhyāyī) with its many commentaries and commentaries on commentaries, which dominated the field of Sanskrit Grammar in recent years. The work itself was not known till very recently except through citations. Manuscripts of the work were recently discovered, all in Malabar.

The work is very similar to the Aṣṭādhyāyi of Pāṇini. It consists of eight Adhyāyas, each Adhyāya being divided into four Pādas, exactly on the model of Pāṇini's work. It is in the form of sūtras and there are over 6,000 sūtras on the whole. There is a commentary on these sūtras by Daṇḍanātha Nārāyaṇa. Two incomplete manuscript copies of this commentary have been discovered, one belonging to the Palace Library in Trivandrum and the other belonging to the Government Oriental Manuscripts Library, Madras.

The Aṣṭādhyāyī of Pāṇini has the sūtra "Uṇādayo bahulam" (3—3—1). But the Uṇādis themselves do not form part of the Aṣṭādhyāyī. Bhoja incorporates the Uṇādis into

his Grammar and they form the first three Pādas in the second Adhyāya. The Uṇādis of Bhoja with the commentary of Daṇḍanātha Nārāyaṇa have already been published in this series as No. 7, Part 6. The Phiṭsūtras too are incorporated into the Grammar of Bhoja, being sūtras 110 to 196 in the third Pāda of the eighth Adhyāya (Cf. Appendix I, pp. 501-503).

The sūtras of Bhoja with the commentary of Daṇḍanātha Nārāyaṇa were published for the first Adhyāya as No. 117 of the Trivandrum Sanskrit Series in 1935. It is put as Part I of the work ; but later Parts have not yet been issued. The present edition contains only the sūtras, but it is complete. There is an alphabetical index of the sūtras given at the end of the text. Appendix I will give a comparative idea between the Grammar of Bhoja and the Grammar of Pāṇini. Considering the scarcity of manuscript material, a better edition than this cannot be expected.

UNIVERSITY OF MADRAS,
12th October, 1937.

C. KUNHAN RAJA,
Reader in Sanskrit.

PREFACE

This edition of the Sarasvatīkaṇṭhābharaṇa of Bhojadeva is based on the following manuscripts.

1. A copy of the text of the sūtras alone, found in the Government Oriental Manuscripts Library, Madras, R. No. 3279 and designated **A**. The manuscript is complete but is full of errors.

2. An incomplete copy of the text with the commentary of Daṇḍanātha Nārāyaṇa, extending up to the middle of the first pāda of the fourth Adhyāya and deposited in the Government Oriental Manuscripts Library, Madras, R. No. 4179 and designated B.

3. Another incomplete copy of the text and commentary of Daṇḍanātha Nārāyaṇa, extending up to the end of the 7th Adhyāya, deposited in the Adyar Library and designated C. This is a transcript from the copy of the work now found in Palace Library, Trivandrum.

In addition to these, a fragment of the commentary of Daṇḍanātha Nārāyaṇa and a transcript of the Sarasvatīkaṇṭhābharaṇasūtras, prepared from the original palm leaf manuscript, from which the copy of the text in the Government Oriental Manuscripts Library was prepared, was placed in my hands by my friend Mr. M. Ramakrishnakavi, M. A. This was helpful in checking the readings found in the Madras transcript. With the aid of these manuscripts and with the aid of the Aṣṭādhyāyī, the Vārtikas, the Mahābhāṣya and the Kāśikāvṛtti, the present edition of Bhoja's sūtras has been prepared.

In spite of these aids, it has to be observed that mainly on account of the corrupt nature of the manuscripts, a text completely free from mistakes could not be presented. But attempts have been made to minimise the errors as far as possible under the circumstances. Some of the readings relegated to the foot-notes happen to give better sense and such of them as could be adopted have been indicated in Appendix II, which includes corrections also.

In issuing the edition I have had the valuable advice of my professor Mahāmahopādhyāya S. Kuppuswami Sastriyar Avl., Honorary Professor of Sanskrit, Annamalai University, to whom I always look for guidance. Dr. C. Kunhan Raja, M. A., D. Phil. (Oxon) my colleague in office was helpful to me in more ways than one. It was through his influence, that I was able to secure for reference a transcript of the Sarasvatīkaṇṭhābharaṇa-vyākhyā from the Trivandrum Palace Library. Mr. O. P. Rangaswami Aiyangar, M. A., L. T., Assistant Professor of Sanskrit, Presidency College, Madras enthusiastically assisted me in the preparation of Appendix I; and my friend Mr. K. Ramachandra Sarma was helpful in preparing and arranging the Index. I express my grateful thanks to these gentlemen for the very kind manner in which they have helped me. Mr. B. Madhava Rau, of the Ananda Press has been exceedingly kind to me and helpful in expediting this edition.

The Sarasvatīkaṇṭhābharaṇa of Bhojadeva is one of the several recasts of the Aṣṭādhyāyī of Pāṇini, known so far. Several grammarians of the post-Pāṇinīyan period imitated Pāṇini and prepared their own rules of grammar and arranged them in their own manner. Many of these attempts were with the obvious intention of making Pāṇini's grammar easy. The system

of Pāṇini was felt to be terse as it was very brief and it was supplemented in several respects by Kātyāyana, Patañjali and other writers. Pāṇini himself adapted into his system certain texts that were current in his days—as for instance the Uṇādi-sūtras. Besides, the Gaṇapāṭha had to be composed. To add to all these, Pāṇini had to give place, at least in a cursory manner to the rules of Vedic grammar and accent. These made the work of Pāṇini difficult. Several writers attempted to simplify Sanskrit Grammar and therefore wrote important treatises. Each treatise in course of time came to be regarded as endowed with a certain amount of authority and several treatises in the form of supplements and expositions came to be associated with each text. This process of development went on for a considerable time, and in the end we came to have a number of what are called Systems of Sanskrit Grammar. Many of these systems—about which definite information could be had—have been described in the "Systems of Sanskrit Grammar" by Dr. S. K. Belvalkar. The most important of the systems are:—

1. The system of Pāṇini, represented by the Aṣṭādhyāyī, the Gaṇapāṭha, the Dhātupāṭha, the Liṅgānuśāsana, the Uṇādisūtras and the Phiṭsūtras and the Vārtikas of Kātyāyana, the bhāṣya of Patañjali, the Kāśikāvṛtti of Vāmana and Jayāditya and other works.

2. The system of Candra, represented by the sūtras of Candra including the Uṇādis with the commentary of Ratnamati.

3. The system of Vāmana, represented by the Aṣṭādhyāyī of Vāmana.

4. The system of Śākaṭāyana, represented by the work of Śākaṭāyana, in four Adhyāyas with the Amoghavṛtti of the same author.

5. The system of the Kātantra, represented by the sūtras of Śarvavarman with the commentary of Durgasimha.

6. The system of Hemacandra, represented by the Śabdānuśāsana, the Dhātuvṛtti, the Uṇādivṛtti etc., all by Hemacandra.

7. The system of Jainendra, represented by the sūtras of Jainendra and its commentary.

8. The Mugdhabodha system of grammar, founded by Bopadeva.

9. The Sārasvata system of grammar represented by the sūtras, with the commentary of Anubhūtisvarūpācarya and Dhātupāṭha of Candraprabha.

10. The system represented by Padmanābha and known as the Saupadma system and

11. The system of Jumaranandin, known as the Jumara Vyākaraṇa.

We hear of other systems of Grammar, known as the Aindra system, that of Kāśakṛtsna and that of Āpiśali.

Of these, we are all familiar with systems 1 and 2. The third is represented by a single manuscript of the work, now in Cambay. Vardhamāna in his Gaṇaratnamahodadhi calls this Viśrānta Vidyādhara Vyākaraṇa.[1] The author Vāmana, was in all probability the joint author of Kāśikāvṛtti. The sūtras of Śākaṭāyana, we are all familiar with, but his Amoghavṛtti has not yet seen the light of printing. Representative works belonging to other systems have already been published.

---

1. See Gaṇaratnamahodadhi, Eggeling, p. 2.

To these systems of Sanskrit Grammar, we have now to add the system of Bhoja, which is no less important.[1] The system of Bhoja was inaugurated by Bhoja in his Sarasvatīkaṇṭhābharaṇa, followed up in the Hṛdayahāriṇī by Daṇḍanātha Nārāyaṇa and given a really important status by later grammarians like the author of Daiva and Puruṣakāra, the author of the Prakriyāsarvasa, the author of the Śabdasāmrājya, and a host of other writers, including Mādhava, the author of the Dhātuvṛtti and Vardhamāna, the author of the Gaṇaratnamahodadhi.

Bhoja is generally supposed to have lived in the 11th century A. D. Inscriptions of this king are found up to the year 1062 A. D. How long he lived after, we do not know. He was the king of Dhārā and belonged to the Paramāra rulers of Mālwa. The following is the genealogy of Bhoja as far as could be gathered from the available material.



1. This too has been referred to by Vardhamāna in the Gaṇaratnamahodadhi thus—भोजः सरस्वतीकण्ठाभरणकर्ता.

Sindhurāja seems to have died in 997 A. D., shortly after Bhoja came to the throne. The period of Bhoja's rule and activity should have coincided with the first half of the 11th century A.D. This will be borne out by the fact that one of Bhoja's works—the Rājamṛgāṅka, an astronomical treatise was composed in Śaka 964 or 1042 A. D.

The following verses found in one of the manuscripts of the Śyāmalādaṇḍaka may be cited in connection with the date of Bhoja :—

धाराधीशो धराधीशो धारायां धनदोपमः ।
बभार राज्यं भोजाख्यो दानमानैश्च पण्डितान् ॥
म्लेच्छानम्लोचयद्वीरो द्वारकायां विराजितम् ।
शङ्कार्यगुरूणां स्वं मोषिणो मतदूषिणः ॥
लोकाक्षिरससंख्याक (923) शाकाब्दे पूर्णिमातिथौ ।
श्रावणे मासि विप्रेभ्यः कविभ्यो व्यतरन् मुदा ॥
ग्रामान्सोमोद्भवातीरे शतं यो गिरिशप्रियः ।
सरस्वतीकण्ठभूषां सरसालंकृतिं द्रुतं ॥
प्राणयत् कीर्तिकायस्य प्रायच्छत्स्वस्य नित्यताम् ।
जीयतां तद्यशो नित्यमाचन्द्रार्कं द्युभूषणम् ॥
महादेवद्विजश्चैव महाकालस्य पूजकः ।
पुरान्तकस्तस्य पुत्रः पुरारेः कृपयाभवत् ॥
श्यामलायाः प्रसादाद्यः श्यामलादण्डकं व्यधात् ।
वाग्देवी यस्य वश्याभूत् वाचो वाचस्पतेरिव ॥
तस्मै ग्रामान् शतमदात् शिप्रावारसवेदिनः ॥
(1917 युगादिसंचिका पुष्पाञ्जलि p. 224)[1]

If these verses are authentic, it can be made out that the author of the Śyāmalādaṇḍaka, Parāntaka by name, was a

1. Bhārati, Śrīmukha, p. 527.

contemporary of Bhojadeva of Dhārā. Kālidāsa's authorship of the Śyāmalādaṇḍaka has been questioned by many and this supports the contention that he was not the author and that it has been fathered on him by others. The date given in these verses, *i.e.*, Śaka 923 or A. D. 1001 represents the date on which a grant was made to the author of the Śyāmalādaṇḍaka, probably for having composed that exquisite little hymn.

Bhoja seems to have written on all branches of Sanskrit literature. As a royal patron he should have commanded the co-operation of scholars in various branches of Sanskrit studies, with whose help he wrote or caused to be written a number of important works. The following works are associated with the name of Bhoja :—

Literature :—Śālikathā, Śṛṅgāramañjarī, Viśrāntavidyā-vinoda.

Literary Criticism :—Sarasvatīkaṇṭhābharaṇa, Śṛṅgāra-prakāśa.

Grammar :—Sarasvatīkaṇṭhābharaṇa. [1]

Nighaṇṭu :—Amaravyākhyā, Saṃyamināmamālikā.

Dharmaśāstra:—Rājamārtāṇḍa, Yuktikalpataru, Vyavahāra-samuccaya, Ratnamālā.

Astronomy and Astrology :—Rājamṛgāṅka[2], Vidvajjana-vallabha, Bhujabalanibandha, Praśnacintāmaṇi.

Yoga :—Yogasūtravṛtti.

Vaidya :—Rājamṛgāṅka, Cārucaryā, Āyurvedasarvasva.

---

1. This is perhaps the same as the Śabdānuśāsana referred to in the verse, शब्दानामानुशासनं विदधता etc., at the beginning of the Yogasūtravṛtti.

2. This was composed in Śaka 964 or A. D. 1042.

Sciences :—Samarāṅgaṇasūtradhāra, Śālihotronnaya.

Śaiva :—Tattvaprakāśa.

Dhanurveda :—The Kodaṇḍamaṇḍana was caused to be written by Bhoja.

Music :—The name of the work is not known, but the name is conjectured to be " Gītaprakāśa " by some.

A word with regard to the Sarasvatīkaṇṭhābharaṇa, the Grammatical work. The plan adopted by Bhoja seems to have been this : He wanted to incorporate into the text of the sūtras all the improvements and modifications to Pāṇini's Grammar suggested by Kātyāyana, Vyāḍi, Patañjali, Vāmana and Jayāditya and other writers. He has succeeded to a remarkable extent in this attempt. The grammar of the Classical Sanskrit was his main theme, though particulars of Vedic grammar are also spoken of. Into the body of the sūtras, he has incorporated the Vārtikas, the Uṇādi-sūtras, the Gaṇapāṭha, the Paribhāṣas, the Phiṭ-sūtras, important additions found in the bhāṣya and the Kāśikā etc. The extent to which these have been incorporated has been indicated in Appendix I.

The first Adhyāya of the Sarasvatīkaṇṭhābharaṇa with the commentary of Daṇḍanātha Nārāyaṇa was recently published in the Trivandrum Sanskrit series. In certain places the text of the Trivandrum edition differs from the present one. Other differenes are noticeable in works which cite the sūtras of the Sarasvatīkaṇṭhābharaṇa. These are discussed fully in a paper that I have contributed to the Annals of the Madras University Oriental Research Institute.

T. R. CHINTAMANI.

सरस्वतीकण्ठाभरणम् ॥

महाराजाधिराजभोजप्रणीतम्

प्रणम्यैकात्मतां यातौ प्रकृतिप्रत्ययाविव ।
श्रेयःपदमुमेशानौ पदलक्ष्म प्रचक्ष्महे ॥

अइउण्॥ ऋलृक्॥ एओङ्॥ ऐऔच्॥ हयवरट्॥ लण्॥ ञमङणनम्॥ झभञ्॥ घढधष्॥ जबगडदश्॥ खफछठथचटतव्॥ कपय्॥ शषसर्॥ हल्॥

सिद्धिः क्रियादेः लोकात् ॥ १. १. १ ॥
भूवादिः क्रियावचनो[1] धातुः ॥ १. १. २ ॥
चुलुम्पादिश्च ॥ १. १. ३ ॥
सनाद्यन्ताश्चाणिङः ॥ १. १. ४ ॥
अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ॥ १. १. ५ ॥
कृत्तद्धितसमासैकशेषसनाद्यन्ताः धातवः ॥ १. १. ६ ॥
समासानुकरणनिपाताश्च ॥ १. १. ७ ॥
तदुभयं विकरणविभक्ती[4] च प्रत्यये प्रकृतिः ॥ १. १. ८ ॥
ततो विधीयमानः सनादिराकपः प्रत्ययः ॥ १. १. ९ ॥
सस्यादिराशानचो विकरणः ॥ १. १. १० ॥
तव्यादयः प्राक्तिपः कृतः ॥ १. १. ११ ॥
प्राङ्ण्वुलः कृत्याः ॥ १. १. १२ ॥
शतृशानचौ सत् ॥ १. १. १३ ॥
क्तक्तवतू निष्ठा ॥ १. १. १४ ॥
प्राग्जितीयाणादयः तद्धिताः ॥ १. १. १५ ॥
तरप्तमपौ घः ॥ १. १. १६ ॥

१. A. वाचिनो
२. A. चुचु-
३ A. करणे
४. A. विभक्ति
५. A. स्यादि-
६. A. प्राग्दीव्य-

बहुगणवतुडतयश्च संख्याः ॥ १. १ १७ ॥
अध्यर्धार्धपूर्वपूरणाः समासकन्विधौ ॥ १. १. १८ ॥
तिङ् सुपो विभक्तिः ॥ १. १. १९ ॥
तिङां त्रीणि त्रीणि प्रथममध्यमोत्तमाः ॥ १. १. २० ॥
सुपां प्रथमाद्वितीयातृतीयाचतुर्थीपञ्चमीषष्ठीसप्तम्यः ॥ १. १. २१ ॥
तान्येकवचनद्विवचनबहुवचनान्येकशः ॥ १. १. २२ ॥
अनाम्ल्वादेशाः परस्मैपदानि ॥ १. १. २३ ॥
तङानास्वात्मनेपदानि ॥ १. १. २४ ॥
विभक्त्यन्तं पदम् ॥ १. १. २५ ॥
कृद्धितौ सप्तमीस्थमुपपदम् ॥ १. १. २६ ॥
समासे प्रथमानिर्दिष्टमुपसर्जनम् ॥ १. १. २७ ॥
अषष्ठ्येकविभक्ति चापूर्वनिपाते ॥ १. १. १८ ॥
तत्पुरुषः समानाधिकरणः कर्मधारयः ॥ १. १. २९ ॥
तद्धितार्थादौ संख्यापूर्वो द्विगुः ॥ १. १. ३० ॥
आख्यातं साव्ययकारकविशेषणं वाक्यम् ॥ १. १ ३१ ॥
क्रियानिमित्तं कारकम् ॥ १. १. ३२ ॥
स्वतन्त्रः कर्ता ॥ १. १. ३३ ॥
तस्य प्रयोजकोऽनुकूलो वा हेतुश्च ॥ १. १. ३४ ॥
समानधातौ कर्मणा तुल्याकर्मक्रियः कर्मकर्ता ॥ १. १. ३५ ॥
दुहिपच्योः सकर्मकक्रियश्च ॥ १ १. ३६ ॥
क्वचित्करणेन ॥ १. १. ३७ ॥
कर्तुरीप्सिततमं कर्म ॥ १. १. ३८ ॥
तथायुक्तं चानीप्सितम् ॥ १. १. ३९ ॥
अकथितं च ॥ १. १. ४० ॥
क्रियाविशेषणकालभावगन्तव्याध्वदेशाश्च ॥ १. १. ४१ ॥
गतिज्ञानप्रत्यवसानार्थशब्दक्रियाकर्मकश्रुदृशीनामणि कर्ता स णौ ॥ १. १. ४२ ॥

१ B. डति संख्या
२ A. देशः
३. A. कर्मकक्रिया
४. A omits कर्म
५. A. कर्म -
६. मणिकर्तार्णौ

हृक्रोर्वा ॥ १. १. ४३ ॥
दृश्यभिवाद्योरात्मने पदे ॥ १. १. ४४ ॥
ननीरवाद्यदिहाशब्दाय क्रन्दाम् ॥ १. १. ४५ ॥
वहेरनियन्तृकर्तृकस्य[1] ॥ १. १. ४६ ॥
भक्षेरहिंसार्थस्य ॥ १. १. ४७ ॥
अधिशीङ्स्थासामाधारः ॥ १. १. ४८ ॥
उपान्वध्याङ्वसः ॥ १. १. ४९ ॥
उपवसेरभोजनार्थस्य कालः ॥ १. १. ५० ॥
अभिनिविशो वा ॥ १. १. ५१ ॥
दिवः करणम् ॥ १. १. ५२ ॥
क्रुधद्रुहोरुपसृष्टयोः संप्रदानम् ॥ १. १. ५३ ॥
यजेश्च कर्मणः करणत्वे[2] ॥ १ १ ५४ ॥
साधकतमं करणम् ॥ १. १. ५५ ॥
कर्मणा क्रियया वा यमभिप्रैति स संप्रदानम् ॥ १. १. ५६ ॥
रुच्यर्थानां प्रीयमाणः ॥ १. १. ५७ ॥
श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः ॥ १. १. ५८ ॥
धारेरुत्तमर्णः ॥ १. १. ५९ ॥
स्पृहेरीप्सितो वा ॥ १. १. ६० ॥
क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः ॥ १. १. ६१ ॥
राधीक्ष्योर्यस्य विप्रश्नः ॥ १. १. ६२ ॥
प्रस्याङ्भ्यां श्रुवःपूर्वस्य कर्ता ॥ १. १. ६३ ॥
अनुप्रतिगृणश्च ॥ १. १. ६४ ॥
ध्रुवमपायेऽपादानम् ॥ १. १. ६५ ॥
जुगुप्साविरामप्रमादार्थानाम् ॥ १. १. ६६ ॥
भीत्रार्थानां भयहेतुः ॥ १. १. ६७ ॥
पराजेरसोढः ॥ १. १. ६८ ॥
वारणार्थानामीप्सितः ॥ १. १. ६९ ॥
अन्तर्धौयेनादर्शनमिच्छति ॥ १. १. ७० ॥

१. A. अनियन्तृकस्य. २. A. करणार्थे.

आख्यातोपयोगे ॥ १. १. ७१ ॥
जनिर्कर्तुः प्रकृतिः ॥ १. १ ७२ ॥
भुवः प्रभवः ॥ १. १. ७३ ॥
कर्तृकर्मान्तरितंक्रियाधारोऽधिकरणम् ॥ १. १. ७४ ॥
संबोधनप्रथमान्तमामन्त्रितम् ॥ १. १. ७५ ॥
तदेकवचनं संबुद्धिः ॥ १. १. ७६ ॥
सनादिद्विरुक्तौ पूर्वोऽभ्यासः ॥ १. १. ७७ ॥
द्वयमभ्यस्तम् ॥ १. १. ७८ ॥
जक्षादयश्चाशासः ॥ १. १. ७९ ॥
इग्यणः संप्रसारणम् ॥ १. १. ८० ॥
अदेङ्गुणः ॥ १. १. ८१ ॥
वृद्धिरादैच् ॥ १. १. ८२ ॥
वृद्धिर्यस्पचामादिस्तद्वृद्धम् ॥ १. १. ८३ ॥
हलो मिथः[2] श्लिष्टाः संयोगः ॥ १. १. ८४ ॥
अलोऽन्त्यात्पूर्व उपधा ॥ १. १. ८५ ॥
अन्त्याजादिष्टिः ॥ १. १. ८६ ॥
टिन्मित्किदादिः प्रकृतिप्रत्ययांश आगमः ॥ १. १. ८७ ॥
अदर्शनं लोपः ॥ १. १. ८८ ॥
प्रत्ययस्य श्लुक्श्लुलुपः ॥ १. १. ८९ ॥
अण्मात्रिको ह्रस्वः ॥ १. १. ९० ॥
द्विमात्रो दीर्घः ॥ १. १. ९१ ॥
त्रिमात्रः प्लुतः ॥ १. १. ९२ ॥
उच्चैरुदात्तः ॥ १. १. ९३ ॥
नीचैरनुदात्तः ॥ १. १. ९४ ॥
समाहारः स्वरितः[1] ॥ १. १. ९५ ॥
तस्यादित उदात्तमर्धह्रस्वम् ॥ १. १. ९६ ॥
ह्रस्वं लघु ॥ १. १. ९७ ॥
संयोगे गुरु ॥ १. १. ९८ ॥

१. A. न्तरितः. २. A. मिथाः.

दीर्घं च ॥ १. १. ९९ ॥

मुखनासिकावचनोऽनुनासिकः ॥ १. १. १०० ॥

तुल्यस्थानस्य प्रयत्नः सवर्णः ॥ १. १. १०१ ॥

नाज्झलौ ॥ १. १. १०२ ॥

अं इत्यनुस्वारः ॥ १. १. १०३ ॥

अः इति विसर्जनीयः ॥ १. १. १०४ ॥

ईदूदेद्विवचनं प्रगृह्यम् ॥ १. १. १०५ ॥

अमू अमी ॥ १. १. १०६ ॥

निपातः केवलाजनाङ् ॥ १. १. १०७ ॥

ओत् ॥ १. १. १०८ ॥

संबुद्धावितौ वा ॥ १. १. १०९ ॥

अञ् ॥ १. १. ११० ॥

ऊँ वांस्य ॥ १. १. १११ ॥

सर्वविश्वावुभोभयौ डतरडतमौ इतरान्यतरावन्यत्वौ समसिमौ नेमश्च सर्वनामानि ॥ १. १. ११२ ॥

त्यत्तद्यदेतददसिदमेकद्वियुष्मदस्मद्भवतुकिमश्च ॥ १. १. ११३ ॥

पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायाम् ॥ १. १. ११४ ॥

स्वमज्ञातिधनाख्यायाम् ॥ १. १. ११५ ॥

अन्तरमपुरिबहिर्योगोपसंव्यानयोः ॥ १. १. ११६ ॥

प्राग्रीश्वरान्निपाताः ॥ १. १. ११७ ॥

असत्वे च वाहाहैवैवंनूनंशश्वत्सूपत्कूपँत्कुषिन्नेचेच्चणूकच्चिद्यत्रनहहन्तेमाकिर्नकिर्मामाङ्ननञ्नहयः ॥ १. १. ११८ ॥

धावत्वावत्वैतुवैन्वैनुवैश्रौषड्ढौषट्वषट्वाड्डिट्पाट्प्याट् फट्छंबडधात्स्वधास्वाहालञ्चनहयः ॥ १. १. ११९ ॥

१. A. उवास्य.

२. A. शुभेभयौ.

३. मख्याति.

४. A omits कूपत्.

५. A. इन्ता.

६. A omits न.

अथोमथोनोभोभगोऽघोहेहोहोऽहोआहोउताहोहांहींहहैहयेय्ययेऽररेरेऽङ्गरेरेऽन्वे-
ननवः ॥ १. १. १२० ॥

शुकंसुकंनुकंअहिर्नुकंनहिकंऊंहुंउञूसुञूकंहंकिंहिंअत्कदिच्चित्त्विवात्त्विदुतबततु-
नवः ॥ १. १. १२१ ॥

यच्चकच्चनकिमुतकिलकिंकिलकिंस्विदुतस्विदाहोस्विददहहनहवैनवैनवान्यादन्यत्र
शबर्थकिंविषुपशुखलुयदिनामयदुतप्रत्युतयदाजातुयदयः ॥ १. १. १२२ ॥

यथाकथाचयथातथापुदधंपरायावत्तावद्दिष्टयार्मर्यादमनामस्मोतिहसहामासमंसत्रा-
साकंसार्धंमीमास्सीमामितयः ॥ १. ३ १२३ ॥

अहंशुभंकृतंपर्याप्तंयेनतेनंचिरेणतेमंचिरायाह्नायचिरादकस्मात्चिरस्यान्योन्यस्य-
ममैकपदे[11]ग्रेप्रग्रेप्राह्नेहेतौरात्रौवेलायामित्यादयःसुप्प्रतिरूपाः[12]॥१. १. १२४॥

अस्तिनास्त्यस्त्यस्तिविद्यतेभवत्येहिब्रूहिमन्येशङ्केऽस्तुभवतुपूर्यतेस्यादासाहवर्ततेन-
वर्ततेयातिनयातिपश्यपश्यतादहादङ्गातङ्गादयः तिङ्प्रतिरूपाः[13] ॥ १. १.
१२५ ॥

अच्प्रतिरूपाश्चादयश्च[14] ॥ १. १. १२६ ॥

प्रपरापसमन्ववनिर्दुर्व्याङन्यधिप्रतिपर्युपात्यपिसूदभयः ॥ १. १. १२७ ॥

उपसर्गाः क्रियायोगे ॥ १. १ १२८ ॥

श्रद्धधातौ[15] ॥ १. १. १२९ ॥

अन्तर्णत्वां किंविधिषु[16] ॥ १. १. १३० ॥

१. A omits हा
२. A. गङ्ग.
३. A. रेग.
४. A. नुहिकं नहिककुं ..मुञ्.
B. नुकं नहिकमूं हुमूञ्.
५. A. हिंमंकत्.
६. A omits च.
७. A. घु.
८. A. मप्या.
९. B. भिमा
१०. A. केन
११. B. ऽग्रेप्राग्रे.
१२. A. रूपका:.
१३. A. रूपक:.
१४. B. पादयश्च.
A. रूपकादयश्च
१५, १६. B. omits these sūtras.

गतयश्च ॥ १. १. १३१ ॥

कारिकांछिवडाचश्च ॥ १. १. १३२ ॥

ऊर्युर्र्युरी[2]चाङ्गीकारे ॥ १. १. १३३ ॥

पांपिधूसीताल्याताली वेताली[3] च विस्तारे ॥ १. १. १३४ ॥

वादालिसेवालिकेवालिकोवास्यालोष्टिस्सकालाश्मंसकलाध्वंसकलाशम्रंशकला - भस्मसोमसमसा च हिंसायाम् ॥ १. १. १३५ ॥

गुलुगुधापीडायाम् ॥ १. १. १३६ ॥

अक्की विक्की फली फल्गू विकारे ॥ १. १. १३७ ॥

सजूः सहार्थे ॥ १. १. १३८ ॥

वषट् वौषट् श्रौषट्[4] स्वाहा स्वधा संप्रदाने ॥ १. १. १३९ ॥

प्रादुराविषौ प्राकाश्ये ॥ १. १. १४० ॥

अनुकरणं चानितिपरम् ॥ १. १. १४१ ॥

आदरानादरयोः सदसती ॥ १. १. १४२ ॥

भूषणेऽलम् ॥ १. १. १४३ ॥

अन्तरपरिग्रहे ॥ १. १. १४४ ॥

कणेमनसी श्रद्धाप्रतीघाते ॥ १. १. १४५ ॥

पुरोऽस्तमव्यये ॥ १. १. १४६ ॥

अच्छगत्यर्थवदिभिः ॥ १. १. १४७ ॥

अदोऽनुपदेशे ॥ १. १. १४८ ॥

तिरोऽन्तर्धौ ॥ १. १. १४९ ॥

कृञा वा ॥ १. १. १५० ॥

उपाजेऽन्वाजे सामर्थ्याधाने ॥ १. १. १५१ ॥

साक्षान्मिथ्या चिन्तां[10] भद्रा रोचनामास्थाद्धा[11] प्राजर्या[12] प्राजरुहा बीजर्या बविज-रुहा संसर्या चर्चर्यर्थे[13] ॥ १. १. १५२ ॥

१. A. चिद्धा...श्च.
२. A omits री.
३. A omits वेताली.
४. B. सक.
५. B. शकलामस्म.
६. A omits समसमसा.
७. A omits श्रौषट्.
८. A. प्रति.
९. A adds वा.
१०. B omits चिन्ता.
११. A and B मास्माद्धा.
१२. A. प्रजर्या.
१३. A. शर्च्यर्थ.

अर्थेऽग्नौ[1]वंशे विकंपने[2] विहसने प्रेतपने शीतं लवणमुष्णमुदकमार्द्रं[4] प्रादुरावि[3]नमसश्च ॥ १. १. १५३ ॥

अनत्याधान उरसि मनसि मध्येपदे निवचने ॥ १. १. १५४ ॥

नित्यं हस्ते पाणावुपयमने ॥ १. १. १५५ ॥

प्राध्वं बन्धनानुकूल्ये ॥ १. १. १५६ ॥

जीविकोपनिषदावौपम्ये ॥ १. १ १५७ ॥

ते प्राग्धातोः ॥ १. १. १५८ ॥

कर्मप्रवचनीयाः ॥ १. १. १५९ ॥

अनुर्हेतुलक्षणे ॥ १. १. १६० ॥

सहार्थे ॥ १. १. १६१ ॥

हीने ॥ १. १. १६२ ॥

उपोऽधिके च ॥ १. १. १६३ ॥

अपपरी वर्जने ॥ १. १. १६४ ॥

आङ् मर्यादाभिविध्योः ॥ १. १. १६५ ॥

लक्षणेत्थंभूताख्यानभागवीप्सासुप्रतिपर्यनवः ॥ १. १. १६६ ॥

अभिरभागे ॥ १. १. १६७ ॥

प्रतिः प्रतिनिधिप्रतिदानयोः ॥ १. १. १६८ ॥

अधिपरी अनर्थकौ ॥ १. १. १६९ ॥

सुः पूजायाम् ॥ १. १. १७० ॥

अतिरतिक्रमणे च ॥ १ १. १७१ ॥

अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु ॥ १. १. १७२ ॥

अधिरीश्वरे ॥ १. १. १७३ ॥

कृञावा ॥ १. १. १७४ ॥

निपातोऽव्ययम् ॥ १. १. १७५ ॥

स्वरन्तःसनुतःपुनःप्रातःसायम्नक्तमस्तंवस्तोर्दिवादोषाह्यःश्वः कंशंयोर्मयश्चनोऽम्नोविहायसारोदस्यौर्भूर्भुवस्वस्तयः ॥ १. १. १७६ ॥

१. A omits अग्नौ.
२. A. प्रकम्पने.
३. B omits उष्णं.
४. A omits आर्द्रं.

समयानिकषान्तराबहिस्सांप्रातमद्धास्वस्त्यमिद्धामुधामृषावृथामिथ्यामियोमिथु - मिथुनमनिशंमुहुरभीक्ष्णंमङ्क्षुझटित्युषैनींचैरवश्यंसामिसाचयः ॥ १. १. १७७ ॥

विष्वगन्वगानुषक्ताजगद्राकूस्राशृधक्पृथग्धिग्धिगरुग्ज्योङ्मनाक्छनैरीषज्जोषंत्तू - ष्णींकामंनिकामंप्रकाममाराद्दरंवैरंपरंचिरंतरसः ॥ १. १. १७८ ॥

नमस्स्वयंभूयःप्रायःप्रबाहुकमार्यहेलंक्वलंबलवदतीवसुष्ठुदुष्ठुतेसपदिसाक्षात् - सनात्सनाशुसहसायुगपदुंपाशुपुरतःपुरस्तात्पुरसः ॥ १. १. १७९ ॥

संश्चत्कुविदाविःप्रादुरादयश्च ॥ १. १. १८० ॥

कृन्मेजन्तः ॥ १. १. १८१ ॥

क्त्वातोऽसुन्कसुनः ॥ १. १. १८२ ॥

तद्धितस्तसादिः प्राग्धणः ॥ १. १. १८३ ॥

अस्तात्यादिः प्राक्प्राशपः ॥ १. १. १८४ ॥

ख्यादिः प्राक्समासान्तेभ्यः ॥ १. १. १८५ ॥

कृत्वोऽर्थः ॥ १. १. १८६ ॥

तसिवतीनानाञ्शासिजाममंः ॥ १. १. १८७ ॥

लुङ्मुखस्वरयोरव्ययीभावः ॥ १. १. १८८ ॥

घटादयः आत्मनेपदिनष्षितः ॥ १. १. १८९ ॥

सर्वे मितः ॥ १. १. १९० ॥

जनीजृष्क्नुंस्नञोऽमन्ताश्च ॥ १. १. १९१ ॥

दलिबलिस्खलिरणिध्वनिक्षपित्रपयश्च ॥ १. १. १९२ ॥

स्मृ आध्याने ॥ १. १. १९३ ॥

द्द भये ॥ १. १. १९४ ॥

नृं नये ॥ १. १. १९५ ॥

१. B. परंपरं
२. A. ह्रक.
३. A. ह्लक्कं
४. B. प्रदु-
५. A. प्रागणः
६. A. तासमः
७. A omits क्नु
८. A. मयाश्वा.
९. A omits दलि
१०. B omits this sūtra.

श्रा पाके ॥ १. १. १९६ ॥
मारणतोषणनिशामनेषु ङ्ना ॥ १. १. १९७ ॥
कम्पने चलिः ॥ १. १. १९८ ॥
ऊर्जने छदिः ॥ १. १. १९९ ॥
जिह्वोन्मथने लडिः ॥ १. १. २०० ॥
हर्षग्लपनयोर्मदिः[1] ॥ १. १. २०१ ॥
ज्वलह्वलनमोऽनुपसर्गा वा ॥ १. १. २०२ ॥
ग्लस्नावनवमश्च[2] ॥ १. १. २०३ ॥
नकम्यमिचमः ॥ १. १. २०४ ॥
शम्ब दर्शने ॥ १. १. २०५ ॥
यम्वपरिवेषणे ॥ १. १. २०६ ॥
स्वदिरवपरिभ्यां च ॥ १. १. २०७ ॥
फण गतौ ॥ १. १. २०८ ॥
धातोस्तिङ्शित् सार्वधातुकम् ॥ १. १. २०९ ॥
आर्धधातुकं शेषः ॥ १. १. २१० ॥
संल्लिटौ च ॥ १. १. २११ ॥
लिङाशिषि[3] ॥ १. १. २१२ ॥

इति श्रीसरस्वतीकण्ठाभरणनाम्नि व्याकरणे
प्रथमस्याध्यायस्य प्रथमः पादः
समाप्तः.

---

१. A. मुदिः
२. B. वनु.
३. A. लिङ आशिषि.

श्रीः

अथ द्वितीयः पादः

आदिरिताल्येन समध्यः ॥ १. २. १ ॥
उतासवर्गः ॥ १. २. २ ॥
तात्तत्कालः ॥ १. २. ३ ॥
अविधीयमानोऽणू ससवर्णः ॥ १. २. ४ ॥
दोऽपः ॥ १. २. ५ ॥
अनेशचिह्नमित् ॥ १. २. ६ ॥
अजुपदेशे ॥ १. २. ७ ॥
हलन्त्यम् ॥ १. २. ८ ॥
किमिटोरतः ॥ १. २. ९ ॥
अविभक्तिश्चास्तसादौ तु स्याः ॥ १ २. १० ॥
धातोरिर् ॥ १. २. ११ ॥
आदिञिटुडवः ॥ १. २. १२ ॥
षः प्रत्ययस्य ॥ १. २. १३ ॥
चुट्टू ॥ १. २. १४ ॥
लशकतद्धिते ॥ १. २. १५ ॥
न चुञ्चुचणचरजाहटीटषङ्कवकाम्येषु ॥ १. २. १६ ॥
उभयथोर्णादिषु ॥ १. २. १७ ॥
स्वं रूपं शब्दस्याशब्दसंज्ञा ॥ १. २ १८ ॥

१. B. तात्वत्-
२. A. मानो सवर्णः.
३. A. अनश-
४. A. कः
५. B. भक्त-
६. A. स्मा
७. A. आदिः

येन विधिस्तदन्तस्य ॥ १. २. १९ ॥
सुसर्वार्धदिक्शब्देभ्यो जनपदस्य ॥ १. २. २० ॥
ऋतो वृद्धिमद्विधावयवेभ्यः ॥ १. २. २१ ॥
प्रकृत्यधिकारे महदादिभिः ॥ १. २. २२ ॥
पदाधिकारेऽहन्नादिभिः ॥ १. २. २३ ॥
प्रत्ययग्रहणे यस्मात्स विहितस्तदादेरपञ्चम्याः ॥ १. २. २४ ॥
कृद्ग्रहणे गतिकारकपूर्वस्यापि ॥ १. २. २५ ॥
न प्रातिपदिकेन ॥ १. २. २६ ॥
यस्मिन्विधिस्तदादावल्ग्रहणे ॥ १. २. २७ ॥
सप्तम्या निर्दिष्टे पूर्वस्य ॥ १. २. २८ ॥
पञ्चम्या परस्य ॥ १. २. २९ ॥
षष्ठ्यान्तस्य ॥ १. २. ३० ॥
ङित् ॥ १. २. ३१ ॥
अन्त्याभावेऽन्त्यसदेशस्य ॥ १. २. ३२ ॥
परस्यादेः ॥ १. २. ३३ ॥
शिदनेकाल् सर्वस्य ॥ १. २. ३४ ॥
टकितावाद्यन्तौ ॥ १. २. ३५ ॥
मिदचोऽन्त्यात्परः ॥ १. २. ३६ ॥
ऋकोऽणोरलौ ॥ १. २. ३७ ॥
निर्दिश्यमानस्यादेशाः ॥ १. २. ३८ ॥
स्थानेऽन्तरतमः ॥ १. २. ३९ ॥
एक इग्घस्यादेशे ॥ १. २. ४० ॥
इको गुणवृद्धी ॥ १. २. ४१ ॥
अचो ह्रस्वदीर्घप्लुताः ॥ १. २. ४२ ॥
स्थानिवदादेशोऽनल्विधौ ॥ १. २. ४३ ॥
अचः परस्मिन् पूर्वविधौ ॥ १. २. ४४ ॥

१ A omits this sūtra. २. A omits this sūtra.

न पदान्तद्विर्वचनसवर्णानुस्वारजश्चर्विधिषु ॥ १. २. ४५ ॥

स्वरदीर्घयलोपेषु लोपः ॥ १. २. ४६ ॥

वरक्लिक्लिरवोपधात्वेषु ॥ १. २. ४७ ॥

पूर्वत्रासिद्धेचासंयोगादिलोपलत्वणत्वेषु ॥ १ २. ४८ ॥

आदिष्टादचः पूर्वस्य ॥ १. २. ४९ ॥

द्विर्वचनेऽचि ॥ १. २. ५० ॥

णिच्यनित्[3] ॥ १. २. ५१ ॥

आद्यन्तवदेकस्मिन् ॥ १. २. ५२ ॥

प्रकृतिवदनुकरणम्[4] ॥ १. २. ५३ ॥

एकदेशविकृतमनन्यवत् ॥ १. २. ५४ ॥

भूतपूर्वकत्वात्तद्वदुपचारः ॥ १. २. ५५ ॥

भाविनि भूतवदुपचारः ॥ १. २. ५६ ॥

अवयवेऽप्यवयविवदुपचारः ॥ १. २. ५७ ॥

प्रत्ययलोपे प्रत्ययलक्षणम् ॥ १. २. ५८ ॥

नलुमता प्रकृतेः ॥ १. २. ५९ ॥

णियकोः ॥ १. २. ६० ॥

उत्तरपदत्वे चापदादिविधौ ॥ १. २. ६१ ॥

यथासंख्यमनुदेशः समानम् ॥ १. २. ६२ ॥

विवक्षातः कारकाणि ॥ १. २. ६३ ॥

सूत्रे लिङ्गवचनाद्यप्रामाण्यमविवक्षातः ॥ १. २. ६४ ॥

उपेक्षातोऽधिकारः ॥ १. २. ६५ ॥

एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः ॥ १. २. ६६ ॥

एकयोगनिर्दिष्टानामप्येकदेशोऽनुवर्तते ॥ १. २. ६७ ॥

चानुकृष्टमुत्तरत्र नानुवर्तते ॥ १. २. ६८ ॥

क्वचिदनुवर्तते ॥ १. २. ६९ ॥

अनन्तरस्यविधिः प्रतिषेधो वा भवति[6] ॥ १. २. ७० ॥

१, २. A omits these sūtras.

३. A. चि नित्.

४. B. बदुपकरणम्

५. B. सहसा

६. A omits भवति.

विशेषातिदिष्टः प्रकृतं न बाधते ॥ १. २. ७१ ॥
अर्थवशाद्विभक्तिविपरिणामः ॥ १. २ ७२ ॥
समर्थः पदविधिः ॥ १. २. ७३ ॥
अर्थवद्ग्रहणे नानर्थकस्य ॥ १. २. ७४ ॥
न घर्णानिनास्नन्ग्रहणेषु ॥ १. २ ७५ ॥
लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ॥ १. २. ७६ ॥
प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ॥ १. २. ७७ ॥
प्रकृतिग्रहणे यङ्लुगन्तस्यापि ॥ १. २. ७८ ॥
नतिबनुबन्धगणैकाचां ग्रहणेषु ॥ १. २. ७९ ॥
आगमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते ॥ १. २. ८० ॥
तन्मध्यपतितः तद्ग्रहणेन गृह्यते ॥ १. २. ८१ ॥
सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥ १. २. ८२ ॥
न वर्णाश्रयप्रत्ययात्वपुगत्वेद्धस्वत्वानिवर्णविचालपुग्घस्वटाबाल्लोपसंबुद्धिलोपा-
नाम् ॥ १ २. ८३ ॥
मतुवृविभक्त्युदात्तत्वं पूर्वनिघातस्य ॥ १. २. ८४ ॥
असिद्धं बहिरङ्गमन्तरङ्गे ॥ १. २. ८५ ॥
नाजानन्तर्ये ॥ १. २. ८६ ॥
गौणमुख्ययोः मुख्ये कार्यसंप्रत्ययः ॥ १ २. ८७ ॥
प्रसिद्धे सहचरिते च ॥ १. २. ८८ ॥
कृत्रिमाकृत्रिमयोः कृत्रिमे ॥ २. २ ८९ ॥
क्वचिदुभयगतिः ॥ १. २. ९० ॥
सिद्धे सत्यारम्भो नियमार्थः ॥ १. २ ९१ ॥
धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम् ॥ १. २. ९२ ॥
नञ्युक्तस्य तत्सदृशे ॥ १. २. ९३ ॥
उक्तार्थानामप्रयोगः ॥ १ २. ९४ ॥
निमित्ताभावे नैमित्तिकस्याप्यभावः ॥ १. २. ९५ ॥

१. A omits this sūtra.
२. A. जुग्-
३. A. आगमाय.
४. A omits this sūtra.
५. A omits पूर्व.
६. A. नञ्-

सन्नियोगशिष्टानामेकापाये ऽन्यतरस्याप्यपायः ॥ १ २. ९६ ॥
नान्वाचीर्यमाननिवृतौ[1][2] प्रधानस्य ॥ १. २. ९७ ॥
निरनुबन्धकग्रहणे न सानुबन्धकस्य ॥ १. २. ९८ ॥
एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य ॥ १. २. ९९ ॥
नानुबन्धकृतान्यसारूप्याने[3]कत्वानेकाल्त्वानि ॥ १. २. १०० ॥
समासान्तागमसंज्ञाङ्गापकग्रहणनिर्दिष्टान्यनित्यानि ॥ १. २. १०१ ॥
उत्सर्गापवादयोरपवादो विधिर्बलवान् ॥ १. २. १०२ ॥
[4]अपवादविषये क्वचिदुत्सर्गस्यापि समावेशः ॥ १. २. १०३ ॥
पुरस्तादपवादा अनन्तरान्विधीन् बाधन्ते ॥ १. २ १०४ ॥
मध्येऽपवादाः पूर्वान् ॥ १. २. १०५ ॥
[5]कृद्वासरूपोऽस्त्रियाम् ॥ १. २. १०६ ॥
यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेवनासौ बाध्यते ॥ १. २. १०७ ॥
येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधकः ॥ १. २. १०८ ॥
बलवन्नित्यमनित्यात् ॥ १. २. १०९ ॥
अन्तरङ्गं बहिरङ्गात्[5] ॥ १. २. ११० ॥
निरवकाशः[6] सावकाशात् ॥ १. २. १११ ॥
वार्णात् प्राकृतम् ॥ १. २. ११२ ॥
संप्रसारणं संप्रसारणाश्रयं च ॥ १. २. ११३ ॥
उपपदविभक्तेः कारकविभक्तिः ॥ १. २. ११४ ॥
लुगन्तरेभ्यः ॥ १. २. ११५ ॥
सर्वेभ्यो लोपः ॥ ११६ ॥
लोपादजादेशः ॥ १. २. ११७ ॥
आदेशादागमः ॥ १. २. ११८ ॥
आगमात् सर्वादेशः ॥ १. २. ११९ ॥

१. B. र्चीयान-
२. A. निमित्तौ.
३. B. This is written as part of the commentary.
४. B. कृद्भास
A कृत्वास.
५. B. रङ्गम्.
६. B. शं

विप्रतिषेधे परं कार्यम् ॥ १. २. १२० ॥
सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव ॥ १. २. १२१ ॥
पुनः प्रसङ्गविज्ञानात्सिद्धम् ॥ १. २. १२२ ॥
क्वचित्पूर्वम् ॥ १. २. १२३ ॥
नानिष्टार्था शास्त्रप्रवृत्तिः ॥ १. २. १२४ ॥
प्रकृतिवृत्ते पुनर्वृत्तावविधिः निष्ठितस्य ॥ १. २. १२५ ॥
यावत्संभवस्तावद्विधिः ॥ १. २. १२६ ॥
पर्जन्यवल्लक्षणप्रवृत्तिः ॥ १. २. १२७ ॥
अकृतकारि खल्वपि शास्त्रम् ॥ १. २. १२८ ॥
कार्यकालं संज्ञापरिभाषम् ॥ १. २. १२९ ॥
यथोद्देशं संज्ञापरिभाषं प्रवर्तते ॥ १. २. १३० ॥
प्रत्येकं वाक्यपरिसमाप्तिः ॥ १. २. १३१ ॥
समुदाये वाक्यपरिसमाप्तिः ॥ १. २. १३२ ॥
व्याख्यानतो विशेषप्रतिपत्तिः ॥ १. २. १३३ ॥
अभिधानलक्षणाः कृत्तद्धितसमासाः ॥ १. २. १३४ ॥
प्रत्ययः परः ॥ १. २. १३५ ॥

इति श्रीसरस्वतीकण्ठाभरणनाम्नि व्याकरणे
प्रथमस्याध्यायस्य द्वितीयः पादः
समाप्तः

१,२. A adds क्वचिद्भवति.
३. A. षा च.
४. A omits this sūtra
५. B omits परि-

अथ तृतीयः पादः

तिजः क्षमायां सन् ॥ १. ३. १ ॥

कितः संशयप्रतीकारयोः ॥ १. ३. २ ॥

गुपो गर्ह्यायाम् ॥ १. ३. ३ ॥

धेरे दीर्घश्च ॥ १. ३. ४ ॥

मानो विचारणायाम् ॥ १. ३. ५ ॥

शान्दानोर्वा ॥ १. ३. ६ ॥

तुमर्हादिच्छायाम् ॥ १. ३. ७ ॥

आशङ्कायां च ॥ १. ३. ८ ॥

नेच्छासनः ॥ १. ३. ९ ॥

सुपः कर्मणः काम्यच् ॥ १. ३. १० ॥

अनव्ययादमः क्यङ्वा ॥ १. ३. ११ ॥

अधिकरणाच्चोपमानादाचारे ॥ १. ३. १२ ॥

कर्तुर्विप् ॥ १. ३. १३ ॥

गल्भक्लीबह्रोडेभ्यो ङित् ॥ १. ३. १४ ॥

क्यङ् ॥ १. ३. १५ ॥

च्व्यर्थे भृशोत्सुकशीघ्रचपलपण्डिताण्डरकण्डरमेधाशुचिनीलहरितफेनमन्दमन्द्रेभ्यः ॥ १. ३. १६ ॥

संश्चतृपद्रेहद्वेहद्वर्चसोजसां लोपश्च ॥ १. ३. १७ ॥

उदभिदुस्सुभ्यो मनसः ॥ १. ३. १८ ॥

डाज्लोहितजिह्मश्यामधूमचर्महर्षगर्वनेर्मसुखदुःखमूर्च्छानिद्राकृपाकरुणादिभ्यः क्यष् ॥ १. ३. १९ ॥

१. A. शान्दोनीर्वा.

२. A. त्सुख

३. A. मद्रभद्रेभ्यः.

४. A. द्रोह.

५. B omits नर्म. The commentary too omits नर्म.

तस्मै क्रामति कष्टकक्षसत्रगहनेभ्यः कलकचिकीर्षायां क्यङ् ॥ १. ३. २० ॥

तं वर्तयति रोमन्थाद्धनुचलने ॥ १. ३. २१ ॥

बाष्पोष्मफेनेभ्य उद्वमने ॥ १ ३. २२ ॥

सुखदुःखतृप्रकृच्छ्राश्रालीककरुणकृपणसोढप्रतीपेभ्योऽनुभवे ॥ १ ३. २३ ॥

शब्दवैरकलहाभ्रकण्वमेघाटाट्टाशीकासोटाकोटापोटाप्लुष्टाटाटासुदिनदुर्दिननी - हारेभ्यः करणे[2] ॥ १. ३. २४ ॥

तपसः क्यच् ॥ १. ३. २५ ॥

नमसः[3] पूजायाम् ॥ १. ३. २६ ॥

परिवसः परिचर्यायाम् ॥ १. ३. २७ ॥

चित्रङ आश्चर्ये ॥ १. ३. २८ ॥

कण्ड्वादिभ्यो यक् ॥ १. ३. २९ ॥

कण्ड्वादिभ्यः सुवल्गुमन्तुमहीङ्हणीङ्वेङ्लेलाङ्वेङ्लाटूलेटूलोटूउरःरुषिरस्तिरोदुवस्-वैचसियसुषसिरज्भिषज्भिषण्भ्यो यक् ॥ १. ३. २९ ॥

एलावेलाकेलाखेलामेधामगधेरधेषुधकुषुभसुखदुःखगद्गदागतरणचरणचुरणो - रणतुरणभुरणतन्तसम्पपसाररसमरसपरेभ्यश्च ॥ १. ३. ३० ॥

धातोर्हलादेरेकाचः कियासमभिहारे यङ् ॥ १. ३ ३१ ॥

लुग्बहुलम् ॥ १. ३. ३२ ॥

अट्यर्तिसूत्रिमूत्रिसूच्यशूर्णुभ्यः ॥ १. ३. ३३ ॥

कौटिल्य एव गत्यर्थेभ्यः ॥ १. ३. ३४ ॥

लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम् ॥ १ ३. ३५ ॥

न शुभरुचगृणातिभ्यः ॥ १. ३. ३६ ॥

चुरादिभ्यो णिच् ॥ १. ३. ३७ ॥

सुपो धात्वर्थे बहुलमिष्टवच्च ॥ १. ३. ३८ ॥

मुण्डमिश्रश्लक्ष्णलवणलघुपटुप्रभृतीनि करोति ॥ १. ३. ३९ ॥

१. B. पुष्पा

२. B omits करणे.

३. A. मनसः

४. A omits ले

५. A omits वचसि.

६. A omits कुषुभ

७. A. गल्भ.

८. B omits चुरण. The commentary too omits it.

९. A. तन्तपसंपसारस.

१०. A. मूर्तिसूच्यशूर्णे

११. B. गृणादिभ्यः

स्थूलादीनामाचष्टे च ॥ १. ३. ४० ॥

सत्यार्थवेदानामापुक् च ॥ १. ३. ४१ ॥

श्वेताश्वातरगालोडिताह्वरकाणामश्वतरेतकलोपश्च ॥ १. ३. ४२ ॥

कृतत्वचवर्णान् गृह्णाति ॥ १. ३. ४३ ॥

हलिकल्योरश्च ॥ १. ३. ४४ ॥

व्रताद्भोजने तन्निवृत्तौ च ॥ १. ३. ४५ ॥

रूपान्निध्याने ॥ १. ३. ४६ ॥

पाशाद्विमोचने संयमने च ॥ १. ३. ४७ ॥

तूस्ताद्विहनने ॥ १. ३. ४८ ॥

लोम्नोऽनुमार्जने ॥ १. ३. ४९ ॥

वस्त्रात्समाच्छादने परिधाने च ॥ १. ३. ५० ॥

तेनातिक्रामति ॥ १. ३. ५१ ॥

सेनावीणावर्मचूर्णतूलश्लोकवासोवासिभ्योऽभियानो पगानसन्नहनावध्वंसनाव - कोषणोपस्तवनोन्मोचनपरिच्छेदनेषु ॥ १. ३. ५२ ॥

अङ्गात्तन्निरस्यति ङित् ॥ १. ३. ५३ ॥

पुच्छादुदसने व्यसने पर्यसने च ॥ १. ३. ५४ ॥

भाण्डात्समाचयने ॥ १. ३. ५५ ॥

चीवरादर्जने परिधाने च ॥ १. ३. ५६ ॥

धातोर्हेतुर्व्यापारे ॥ १. ३. ५७ ॥

आख्यानात् कृतस्तदाचष्ट इति कुल्लुक्प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकम् ॥ १. ३. ५८ ॥

क्रियान्वाख्यानाच्च ॥ १. ३. ५९ ॥

नाख्यानात् ॥ १. ३. ६० ॥

हृ[2]र्यर्थार्यां च प्रवृत्तौ ॥ १. ३. ६१ ॥

आङ्लोपश्च कालात्यन्तसंयोगे मर्यादायाम् ॥ १. ३. ६२ ॥

चित्रीकरणे प्रापि ॥ १. ३. ६३ ॥

नक्षत्रयोगे क्रि[3] ॥ १. ३. ६४ ॥

गुपू[4]धूपविच्छपणिपनिभ्य आयो वा ॥ १. ३. ६५ ॥

१. B. दजनि
२. A. हर्या-
३. A. क्रि.
४. B. धूप.

ऋतेरीयङ् ॥ १. ३. ६६ ॥
कर्मेर्णिङ् ॥ १. ३. ६७ ॥
नित्यं शित्यादयः ॥ १. ३. ६८ ॥
अनेकाचो लिट आङ्कृभ्वस्तीनां च लिट्यनुप्रयोगः ॥ १. ३. ६९ ॥
इजादेर्गुरुमतोऽनृच्छ्यूर्णोः ॥ १. ३. ७० ॥
दयायास्कासूभ्यश्च ॥ १. ३ ७१ ॥
जाग्रषो वा ॥ १. ३. ७२ ॥
भीह्रीभृहुवां श्लुश्च ॥ १. ३. ७३ ॥
विदेः किच्च ॥ १. ३. ७४ ॥
लोटः कृञश्च लोट्यनुप्रयोगः ॥ १. ३. ७५ ॥
स्यतासी लृलुटोः ॥ १. ३. ७६ ॥
लुङि सिच् ॥ १. ३. ७७ ॥
स्पृशिमृशिकृषितृपिदंपिभ्यो वा ॥ १. ३. ७८ ॥
दधागातिपिबतिस्थाभूभ्यः परस्मैपदे लुक् ॥ १. ३. ७९ ॥
शाच्छासाह्वाधेट्टभ्यो वा ॥ १. ३. ८० ॥
तनादिभ्यस्तथासोः ॥ १. ३. ८१ ॥
शल इगुपधादृदशोऽनिटः क्सः ॥ १. ३. ८२ ॥
श्लिषः ॥ १. ३. ८३ ॥
नासत्वाश्लेषे ॥ १. ३. ८४ ॥
णिश्रिद्रुस्रुकमिभ्यः कर्तरि चङ् ॥ १. ३. ८५ ॥
धेट्ष्विभ्यां वा ॥ १. ३. ८६ ॥
शाससुख्यावचिभ्योऽङ् ॥ १. ३. ८७ ॥
ऋसृभ्यां वा ॥ १. ३. ८८ ॥
लिपिसिचिह्नशतिभ्यः ॥ १. ३ ८९ ॥
आत्मनेपदे वा ॥ १. ३. ९० ॥
लृदिद्युतादिपुष्यत्यादिभ्यः परस्मैपदे ॥ १. ३. ९१ ॥

१. A has अनेकादायायासू कासूभ्यश्च in the place of sūtras 69, 70 and 71.
२. B. विदः
३. B. सूपिभ्यो
४. A. घाता

हरिज्भृस्तम्भुम्रुचुम्लुचुम्लुचुग्लुचुग्लुञ्चुभ्यो वा ॥ १. ३. ९२ ॥

पदस्तेचिण् तलुक् च ॥ १. ३. ९३ ॥

सृजश्श्रद्धावति ॥ १. ३. ९४ ॥

दीपजनबुधपूरितायिप्यायिभ्यो वा ॥ १. ३. ९५ ॥

अचः कर्मकर्तरि ॥ १. ३. ९६ ॥

दुहश्च ॥ १. ३. ९७ ॥

शेषेभ्यो नित्यम् ॥ १. ३. ९८ ॥

न कर्मयोगे ॥ १. ३. ९९ ॥

रुधश्च ॥ १. ३. १०० ॥

भावकर्मणोः ॥ १. ३. १०१ ॥

नानोस्तपः ॥ १. ३. १०२ ॥

सार्वधातुके यक् ॥ १. ३. १०३ ॥

कर्मकर्तरि च ॥ १. ३. १०४ ॥

न दुहः ॥ १. ३. १०५ ॥

णिश्रिद्रुस्रुभ्यः कर्तरि चङ् ॥ १. ३. १०६ ॥

आत्मनेपदाकर्मकभूषाकर्माकिरादिश्रन्थग्रन्थसन्स्नुनमिभ्यश्चिण् च ॥ १. ३. १०६ ॥

तपस्तपःकर्मकात् ॥ १. ३. १०७ ॥

कर्तरि शप् ॥ १. ३. १०८ ॥

अदादिभ्यो लुक् ॥ १. ३. १०९ ॥

जुहोत्यादिभ्यः श्लुः ॥ १. ३. ११० ॥

दिवादिभ्यः श्यन् ॥ १. ३. १११ ॥

सृजः श्राद्धे ॥ १. ३. ११२ ॥

भ्राशम्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषिभ्यो वा ॥ १. ३. ११३ ॥

यसोऽनुसर्गात् ॥ १. ३. ११४ ॥

संयसश्च ॥ १. ३. ११५ ॥

कृषिरजोः कर्मकर्तरि परस्मैपदं च ॥ १. ३. ११६ ॥

तुदादिभ्यः शः ॥ १. ३. ११७ ॥

१. B. हरिज्भृश्वस्तं
२. B omits क्रमु
३. A. लुपिभ्यो
४. A. कृषि.

रुधादिभ्यः श्नंः ॥ १. ३. ११८ ॥

तनादिभ्य उः ॥ १. ३. ११९ ॥

स्वादिभ्यः श्नुः ॥ १. ३. १२० ॥

श्रुकृधिवां शृकृधि च ॥ १. ३. १२१ ॥

अक्षो वा ॥ १. ३. १२२ ॥

तनूकरणे तक्षः ॥ १. ३. १२३ ॥

स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुभ्यः ॥ १. ३. १२४ ॥

इना वश्चादिभ्यः ॥ १. ३. १२५ ॥

हलोहौ शानच् ॥ १. ३. १२६ ॥

बहुलम् ॥ १. ३. १२७ ॥

भावकर्मणोराण्यतः ॥ १. ३. १२८ ॥

तव्यत्तव्यानीयरः ॥ १. ३. १२९ ॥

वास्तव्यः कर्तरि ॥ १. ३ १३० ॥

प्रवचनीयोपस्थानीयरमणीयादयो वा ॥ १. ३. १३१ ॥

स्नानीयादयः करणे ॥ १. ३. १३२ ॥

दानीयादयः संप्रदाने ॥ १. ३. १३३ ॥

समावर्तनीयादयोऽपादाने ॥ १. ३. १३४ ॥

स्थानीयादयोऽधिकरणे ॥ १. ३. १३५ ॥

केलिमर् कर्मकर्तरि ॥ १. ३. १३६ ॥

अचो यत् ॥ १ ३. १३७ ॥

भव्यगेयजन्यरम्याः कर्तरि वा ॥ १. ३. १३८ ॥

स्येयोऽधिकरणे ॥ १. ३. १३९ ॥

पोरदुपधात् ॥ १. ३. १४० ॥

शकितकिचेतियतिशासिसहिवधियजिभजिभ्यः ॥ १. ३. १४१ ॥

गदमदयमिभ्योऽनुपसर्गे ॥ १. ३. १४२ ॥

१. B. रुधादीनां भम्

२. B adds च.

३. A. तस्यकृतल्या-

४. B. दानीयः

५. B. चकि

चरेराङि चागुरौ ॥ १. ३. १४३ ॥

अवद्यपण्यवर्यागर्ह्यविक्रेया निरोधेषु ॥ १. ३. १४४ ॥

वह्यं करणम् ॥ १. ३. १४५ ॥

अर्यः स्वामिवैश्ययोः ॥ १. ३. १४६ ॥

उपसर्या काल्याप्रजने ॥ १. ३. १४७ ॥

कर्तर्यजर्यं सङ्गते ॥ १. ३. १४८ ॥

वदस्सुपि क्यप् च ॥ १. ३. १४९ ॥

मृषोद्यम् ॥ १. ३. १५० ॥

भुवः ॥ १. ३. १५१ ॥

भावे हनस्त च ॥ १. ३. १५२ ॥

इण्स्तुशासुवृञ्वृदजुषिभ्यः ॥ १. ३. १५३ ॥

ऋदुपधाच्चानृत्रि क्लृपि वृतेः ॥ १. ३. १५४ ॥

खनेरी च ॥ १. ३. १५५ ॥

भृञोऽसंज्ञायाम् ॥ १. ३. १५६ ॥

सामि वा ॥ १. ३. १५७ ॥

कृवृषिमजिशंसिदुहिगुहिभ्यः ॥ १. ३. १५८ ॥

कृष्टपच्याः कर्मकर्तरि ॥ १. ३. १५९ ॥

रुच्याव्यथ्यौ कर्तरि ॥ १. ३. १६० ॥

राजसूयसूर्यौ यज्ञदेवतयोः ॥ १. ३. १६१ ॥

भिद्योद्ध्यौ नदे ॥ १. ३. १६२ ॥

तिष्यपुष्यसिध्या नक्षत्रे ॥ १. ३. १६३ ॥

युग्यं च पत्रे ॥ १. ३. १६४ ॥

आज्यं घृते ॥ १. ३. १६५ ॥

कुप्यं धने ॥ १. ३. १६६ ॥

जयतेः हलौ ॥ १. ३. १६७ ॥

वौनीपूङ्भ्यां कल्कमुञ्जयोः ॥ १. ३. १६८ ॥

१. A. तृचोः
२. A. राजस्यौ
३. A. दने
४. A पुंभ्यां

पदास्वैरिपश्यबाह्यासु ग्रहः ॥ १. ३. १६९ ॥

ऋहलोर्ण्यत् ॥ १. ३. १७० ॥

पाणौ सृजः ॥ १. ३. १७१ ॥

समवपूर्वाच्च ॥ १. ३. १७२ ॥

ओरावश्यके ॥ १. ३. १७३ ॥

आसुयुवपिरपिलपित्रपिचम्यानामिदभिभ्यः ॥ १. ३. १७४ ॥

अमावसोऽधिकरणे णिद्वा ॥ १. ३. १७५ ॥

आङि ल्रुपतिभ्यां कर्तरि च ॥ १. ३. १७६ ॥

प्रणाय्योऽसंमतनिष्कामयोः ॥ १. ३. १७७ ॥

पाय्यधाय्ये मानसामिधेन्योः ॥ १. ३. १७८ ॥

याज्यादानार्च्यं ॥ १. ३. १७९ ॥

सान्नाय्यनिकाय्यौ हविर्निवासयोः ॥ १. ३. १८० ॥

क्रतौ कुण्डपाय्यसञ्चाय्यौ ॥ १. ३. १८१ ॥

अग्नावानाय्यपरिचाय्योपचाय्या समूह्याः ॥ १. ३. १८२ ॥

चित्याग्निचित्ये च ॥ १. ३. १८३ ॥

कृत्याः प्रैषातिसर्गप्राप्तकालेषु ॥ १. ३. १८४ ॥

ऊर्ध्वमौहूर्तिकेषु च ॥ १. ३. १८५ ॥

आवश्यकाधमर्ण्यार्हशक्तिषु च ॥ १. ३. १८६ ॥

कर्तरि ण्वुल्तृजचश्च ॥ १. ३. १८७ ॥

गलेचोपकपादहारकादयः कर्मणि ॥ १. ३ १८८ ॥

अर्हणे[2] तृच् ॥ १. ३. १८९ ॥

पचपतवदवशप्रेण[3]रण[4]क्षमभृवृञ्गुपिस्तृपि[5] नृतिदशिमिषिमिधिमिहिदिहिरुहिव-
हादिभ्योऽच् ॥ १. ३. १९० ॥

नदभषघ्लुग्लृतृसूदिदिविसिविचरिचारि[6]चिलिगाहिभ्यष्टित् ॥ १. ३. १९१ ॥

ब्रुवः शित् ॥ १. ३. १९२ ॥

१. A. दानाच्चिः
२. A. अर्हतु च.
३. A. व्रण
४. B. रक्ष
५. A adds सजि.
६. A. ट्रस्त.
७. A. चधि.
८. A omits this sūtra.

नन्दिवाशिमदिनर्दिसाधिशोभिवर्धिभीषिभूषिदूषिसहिहृषिजल्पिभ्यो ल्युः ॥ १. ३. १९३ ॥

रमिरुचिकृतिकुपितृदिदहियुपूभ्यः संज्ञायाम् ॥ १. ३. १९४ ॥

लुवो नो णश्च ॥ १. ३. १९५ ॥

समिकन्दिकृषिहृषिभ्यः ॥ १. ३. १९६ ॥

कर्मणि दम्यर्दिनाशिसूदिभ्यः ॥ १. ३. १९७ ॥

ग्रहिस्यापराधीमन्त्रिसंमर्दिभ्यो णिनिः ॥ १. ३. १९८ ॥

उपावयोरुधः ॥ १. ३. १९९ ॥

उदिहासिदसिसहिभ्यः ॥ १. ३. २०० ॥

श्रुशाविशिवसिवपिरक्षिभ्यो नौ ॥ १. ३. २०१ ॥

याचिव्रजिवदिवसिव्याहृसंव्यहृभ्यो नञि ॥ १. ३. २०२ ॥

अचोऽचित्तवत्कर्तृकात् ॥ १. ३. २०३ ॥

अभौ भुवो भूते ॥ १. ३. २०४ ॥

परिव्योर्गुणश्च वा ॥ १. ३. २०५ ॥

विशयीविषयी च देशे ॥ १. ३. २०६ ॥

इगुपधज्ञाप्रीकृभ्यः कः ॥ १. ३. २०७ ॥

गिरो लश्च ॥ १. ३. २०८ ॥

आतश्चोपसर्गे ॥ १. ३. २०९ ॥

प्रेसारिणो डः ॥ १. ३. २१० ॥

व्याघ्राघ्रे प्राणिनासिकयोः ॥ १. ३. २११ ॥

पाघ्राध्माधेट्दृशिभ्यः शः ॥ १. ३. २१२ ॥

धारिपारिवेद्युदेजिचेतिसातिसाहिविन्दिभ्योऽनुपसर्गेभ्यः ॥ १. ३. २१३ ॥

लिपश्च ॥ १. ३. २१४ ॥

नौ संज्ञायाम् ॥ १. ३. २१५ ॥

गवादिषु विन्देः ॥ १. ३. २१६ ॥

दाञ्[3] धाञो वा ॥ १. ३. २१७ ॥

ज्वलादि[4]नीभूभ्यो णः ॥ १. ३. २१८ ॥

१. B. कन्दि
२. B. संप्र-
३. A. धाञ् अञो वा
४. A. ज्वलादि दुहि

लिहिक्षिलषाद्यधश्वसितनीणं्भ्यः ॥ १. ३. २१९ ॥

दूरेक्षणेफलेषु पचेः कर्मकर्तर्युश्चास्य वा ॥ १. ३. २२० ॥

उपसर्गे इयः ॥ १. ३. २२१ ॥

अवे हृसाभ्याम् ॥ १. ३. २२२ ॥

समाङो स्नुवो वा ॥ १. ३. २२३ ॥

ग्रहँः ॥ १. ३. २२४ ॥

गेहे कँः ॥ १. ३. २२५ ॥

गेस्थथकन् ॥ १. ३. २२६ ॥

ण्युट् चँ ॥ १. ३. २२७ ॥

हाहाङ्भ्यां व्रीहिकालयोः ॥ १. ३. २२८ ॥

रञ्जिनृतिखनिभ्यः शिल्पिनि ष्वुन् ॥ १. ३. २२९ ॥

प्लूङसृभ्यः साधुकारिणि वुन् ॥ १. ३. २३० ॥

आशिषि च ॥ १. ३. २३१ ॥

इति श्रीसरस्वतीकण्ठाभरणनाम्नि व्याकरणे
प्रथमस्याध्यायस्य तृतीयः पादः
समाप्तः.

---

१. A. व्यधि

२. A. तनिभ्यः

३. A. श्रुवो

४, ५. A omits there two sūtras

६. A. गायतेः कर्तरि थकन्

७. A omits च.

अथ चतुर्थः पादः

कर्मण्यण् ॥ १. ४. १ ॥

ह्रावामश्च ॥ १. ४. २ ॥

शीलिकामिभक्ष्याचरीक्षिक्षमिभ्यो णः ॥ १. ४. ३ ॥

आतोऽनुपसर्गे कः[2] ॥ १. ४. ४. ॥

समः ख्यः[3] ॥ १. ४. ५ ॥

आङो दश्च ॥ १. ४ ६ ॥

प्राज्ञश्च ॥ १. ४. ७ ॥

सुपि स्थापास्नात्राभ्यः ॥ १. ४. ८ ॥

मूलविभुजोर्वीरुहकुमुदमहीध्रोपर्बुधादयः ॥ १. ४. ९ ॥

नखमुचकाकगुहौ हेतुकर्मणोः ॥ १. ४. १० ॥

शोकापनुदतुन्दपरिमृजावानन्दकरालसयोः ॥ १. ४. ११ ॥

हृञोऽज्वयोनुद्यमनयोः ॥ १. ४. १२ ॥

आङस्ताच्छील्ये ॥ १. ४. १३ ॥

अर्हः ॥ १. ४. १४ ॥

स्तम्बकर्णयोरमिजपिभ्यां हस्तिसूचकयोः ॥ १. ४. १५ ॥

घटघटीधनुर्दण्डयष्टिसरुलाङ्गलाङ्कुशशक्तितोमरेषु ग्रहः ॥ १. ४. १६ ॥

सूत्रे च धार्यार्थे[4] ॥ १. ४. १७ ॥

प्रहरणादिष्वदण्डादिषु धृञः ॥ १. ४. १८ ॥

शमिधातोः संज्ञायाम् ॥ १. ४. १९ ॥

किंयत्तद्बहुषु कृञः ॥ १. ४. २० ॥

१. A. शालि

२. A. सर्गात् कः

३. B. समाख्यः

४. A. धाप्यर्थे.

५. A. समि

शीङः पार्श्वादौ करणे ॥ १. ४. २१ ॥

उत्तानादौ कर्तरि ॥ १. ४. २२ ॥

दिग्धसहे च ॥ १. ४. २३ ॥

अधिकरणे ॥ १. ४. २४ ॥

गिरौ डित् ॥ १. ४. २५ ॥

चरेष्टः ॥ १. ४. २६ ॥

भिक्षासेनादायेषु च ॥ १. ४. २७ ॥

पुरोऽग्रतोऽग्रेषु सर्तेः ॥ १. ४. २८ ॥

पूर्वे कर्तरि ॥ १. ४. २९ ॥

कृञो हेतुताच्छील्यानुलोम्येष्वशब्दलोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु ॥ १. ४. ३० ॥

आद्यन्तानन्तकारबाह्वहर्दिवाविभानिशाप्रभाभाश्चित्रकर्तृनान्दीलिपिलिबिबलि-भक्तिक्षेत्रजङ्घाधनुररुःसंख्यादिवसदिनरजनीदोषाक्षपाक्षणदासु च ॥ १.४.३१ ॥

भृतौ कर्मशब्दौ[1] ॥ १. ४. ३२ ॥

स्तम्बशकृतोरिन् व्रीहिवत्सयोः ॥ १. ४. ३३ ॥

हरतेः दृतिनाथयोः पशोः[2] ॥ १. ४. ३४ ॥

फलेमलरजस्सु ग्रहेः १. ४. ३५ ॥

देववातयोरापेः ॥ १. ४. ३६ ॥

आत्मोदरकुक्षिषु भृञः कित् ॥ १. ४. ३७ ॥

एजेः खश् ॥ १. ४. ३८ ॥

शुनीस्तनमुञ्जाकुलास्यपुष्पेषु धेटः ॥ १. ४. ३९ ॥

नासिकानाडीघटीखरीमुष्टिषु च ॥ १. ४. ४० ॥

ध्मः पाणिकरवातेषु च ॥ १. ४. ४१ ॥

उदो रुजिवहिभ्यां कूले ॥ १. ४. ४२ ॥

वहाभ्रयोः लिहः ॥ १. ४. ४३ ॥

परिमाणार्थमितनखेषु पचः ॥ १. ४. ४४ ॥

बहुविध्वरुस्तिलेषु तुदः ॥ १. ४. ४५ ॥

वातशर्धयोरजिजहातिभ्याम् ॥ १. ४. ४६ ॥

१. A. शब्दे. २. A. पशौ

असूर्योग्रयोर्दृशः ॥ १. ४. ४७ ॥

प्रियवशयोर्वदः ॥ १. ४. ४८ ॥

ललाटे तपः ॥ १. ४. ४९ ॥

तापेर्द्विषत्परयोः णिलुक् च ॥ १. ४. ५० ॥

पुरन्दरभगन्दरौ संज्ञायाम् ॥ १. ४. ५१ ॥

इरंमदश्च ॥ १. ४. ५२ ॥

वाचंयमो व्रते ॥ १. ४. ५३ ॥

सर्वे सहः ॥ १. ४. ५४ ॥

कुलाभ्रकरीरेषु च कषः सर्वे[2] ॥ १. ४. ५५ ॥

मेघर्तिभयाभयेषु कृञः खः ॥ १. ४. ५६ ॥

क्षेमप्रियमद्रभद्रेष्वण् च ॥ १. ४. ५७ ॥

आशिते भुवो भावकरणयोः ॥ १. ४. ५८ ॥

भृवृजितृतपिदमिसहिभ्यः संज्ञायाम् ॥ १. ४. ५९ ॥

धारेर्धर्च ॥ १. ४. ६० ॥

सुतमितजनपूर्वहृदयतुरभुजप्लुवेषु गयः ॥ १. ४. ६१ ॥

विहायसो विह च ॥ १. ४. ६२ ॥

तुरादिषु खडू च ॥ १. ४. ६३ ॥

डश्च ॥ १. ४. ६४ ॥

सर्वसर्वत्रात्यन्तानन्तपुरप्रतीपग्रामगुरुतल्पादिषु च ॥ १. ४. ६५ ॥

अग्रादिमध्यान्ताध्वदूरपारागारादिषु तदन्तेषु च ॥ १. ४. ६६ ॥

खगागोरगपतगपन्नगनगापगाशुगादयः संज्ञायाम् ॥ १. ४. ६७ ॥

सुदुरोरधिकरणे ॥ १. ४. ६८ ॥

आशिषि हनः ॥ १. ४. ६९ ॥

अपात्क्लेशतमसोः ॥ १. ४. ७० ॥

दर्पज्वरदोषदुःखादिषु च ॥ १. ४. ७१ ॥

१. B. करीषेषु

२. A omits सर्वे

३. A omits भया

४. A omits मद्र

५. A adds प्रव

६. A. निस्रो देशे

७. A omits this sūtra.

दारावाहोऽणन्त्यस्य च टः संज्ञायाम् ॥ १. ४. ७२ ॥

चारौ वा ॥ १. ४. ७३ ॥

समश्च ॥ १. ४. ७४ ॥

कुमारशीर्षयोः णिनिः ॥ १. ४. ७५ ॥

टग्लक्षणे जायापत्योः ॥ १. ४. ७६ ॥

लक्षणवति च ॥ १. ४. ७७ ॥

अचित्तवति च ॥ १. ४. ७८ ॥

ब्रह्मकृतशत्रुवृत्रादिषु च ॥ १. ४. ७९ ॥

हस्तघ्नस्त्रघ्नशतघ्नीसघ्न्यादयः संज्ञायाम् ॥ १. ४. ८० ॥

गोघ्नः संप्रदाने च ॥ १. ४ ८१ ॥

हस्तिबाहुकवाटेषु शक्तौ[2] ॥ १. ४. ८२ ॥

नगरे चाहस्तिनि ॥ १. ४. ८३ ॥

पाणिघाताडघौ शिल्पिनि ॥ १. ४. ८४ ॥

राजघः ॥ १. ४. ८५ ॥

गायतोऽनुपसर्गात्[3] ॥ १. ४. ८६ ॥

सुराशीध्वोः[4] पिबः ॥ १. ४. ८७ ॥

आढ्यसुभगस्थूलपलितनग्नान्धप्रियतदन्तेष्वक्षिष्वभूततद्भावे भुवः खिष्णुच्-खुकञौ ॥ १. ४. ८८ ॥

कृञः करणे ख्युन् ॥ १. ४. ८९ ॥

स्पृशोऽनुदके क्विन् ॥ १. ४. ९० ॥

अञ्चेरुपसर्गे च ॥ १. ४. ९१ ॥

युजेः केवलात् ॥ १. ४. ९२ ॥

ऋत्विग्दधृग्गुष्णिक्कुञ्चः ॥ १. ४. ९३ ॥

दिक्स्त्रजौ कर्मणि ॥ १. ४. ९४ ॥

समानान्यत्यदादिरूपमानेषु दृशः क्सकञौ च ॥ १. ४. ९५ ॥

भृजो ण्विः ॥ १. ४. ९६ ॥

१. B omits च

२. A omits this sūtra.

३. B. गायो.

४. A. शीधोः

५. A. भजो.

आतो विच् मनिन्क्वनिब्वनिपः ॥ १. ४. ९७ ॥

अन्येभ्योऽपि दृश्यन्ते ॥ १. ४. ९८ ॥

क्विप् च ॥ १. ४. ९९ ॥

सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजिभ्य उपसर्गेऽपि ॥ १. ४. १०० ॥

अदोऽनन्ने ॥ १. ४. १०१ ॥

क्रव्ये वा ॥ १. ४ १०२ ॥

दुहो डुघः ॥ १. ४. १०३ ॥

आवश्यकाधमर्ण्ययोर्णिनि ॥ १. ४. १०४ ॥

सुप्यजातौ ताच्छील्ये ॥ १. ४. १०५ ॥

उत्प्रतिभ्यामाङि सर्तेः ॥ १. ४. १०६ ॥

साधौ ॥ १. ४. १०७ ॥

ब्रह्मणि वदः ॥ १. ४. १०८ ॥

कर्तर्युपमाने ॥ १. ४. १०९ ॥

व्रताभीक्ष्ण्ययोः ॥ १. ४. ११० ॥

मनः ॥ १. ४. १११ ॥

खैश्चात्ममाने ॥ १. ४. ११२ ॥

भूते ॥ १. ४. ११३ ॥

करणे यजः ॥ १. ४. ११४ ॥

कर्मणि हनः कुत्सायाम् ॥ १. ४. ११५ ॥

क्विब्ब्रह्मभ्रूणवृत्रेषु ॥ १. ४. ११६ ॥

कृञः सुपुण्यपापकर्ममन्त्रपदेषु ॥ १. ४. ११७ ॥

सोमे सुञः ॥ १. ४. ११८ ॥

चेरग्नौ ॥ १. ४. ११९ ॥

कर्मण्यग्न्याख्यायाम् ॥ १. ४. १२० ॥

अन्यत्रान्यतोऽपि चान्योऽपि दृश्यते ॥ १. ४. १२१ ॥

विक्रियः कुत्सायामिनिः ॥ १. ४. १२२ ॥

दृशेः क्नविप् ॥ १. ४. १२३ ॥

१. A. राजादिभ्यश्चोप-

२. A. श्चात्मने

३. A omits this sūtra.

राशि युधो हेतौ ॥ १. ४. १२४ ॥
सहे च ॥ १. ४. १२५ ॥
तयोः कृञः ॥ १ ४. १२६ ॥
सप्तम्यां जनेर्डः ॥ १. ४. १२७ ॥
पञ्चम्यामजातौ ॥ १. ४. १२८ ॥
जातावपि दृश्यते ॥ १. ४. १२९ ॥
उपसर्गे च संज्ञायाम् ॥ १. ४. १३० ॥
असंज्ञायां च ॥ १. ४. १३१ ॥
अनोः कर्मणि ॥ १. ४. १३२ ॥
ब्रह्मज्यवपुर्व्यवार्चवराहपटहपरिखाः ॥ १. ४. १३३ ॥
क्तवतुः ॥ १. ४. १३४ ॥
भावकर्मणोः क्तः ॥ १. ४. १३५ ॥
कर्तरि चारम्भे क्रियायाः ॥ १ ४. १३६ ॥
स्निषशीङ्स्थासवसजनरुहजृभिभ्यः ॥ १. ४. १३७ ॥
गत्यर्थाकर्मकपिबतिभजिभ्योऽधिकरणे च ॥ १. ४. १३८ ॥
आहारार्थेभ्योऽकर्तरि ॥ १. ४. १३९ ॥
स्तुयजिभ्यां क्त्वानिप् ॥ १. ४. १४० ॥
जीर्यतेरतृन् ॥ १. ४. १४१ ॥
श्रुसदिवासिभ्यो लिङ्वा ॥ १. ४. १४२ ॥
लिटः क्वसुः ॥ १. ४. १४३ ॥
ईयिवाननाश्वाननूचानः ॥ १. ४. १४४ ॥
लुङ् ॥ १. ४. १४५ ॥
अविवक्षितविशेषे ॥ १. ४. १४६ ॥
व्यामिश्रे च ॥ १. ४. १४७ ॥
वसेर्जागरणसन्ततौ रात्रिशेषे ॥ १. ४. १४८ ॥
अनद्यतने लङ् ॥ १. ४. १४९ ॥
परोक्षे च प्रयोक्तुः दर्शनार्हे प्रसिद्धे ॥ १. ४. १५० ॥

१. A. युराशियुतो.
२. A. वपच्यवाच
३. A. सदवसि-
४. A. लिटा

अभिज्ञावचने लट् ॥ १. ४. १५१ ॥
न ह्यश्वद्यत्स्वु ॥ १. ४. १५२ ॥
वा क्राक्षायाम् ॥ १. ४. १५३ ॥
परोक्षे लिट् ॥ १. ४. १५४ ॥
कृतस्यास्मरणे ॥ १. ४. १५५ ॥
अत्यन्तापह्नवे च ॥ १. ४. १५६ ॥
ह्यश्वतोर्लङ् च ॥ १. ४. १५७ ॥
प्रष्टव्ये चासन्नकाले ॥ १. ४. १५८ ॥
लट् स्मे ॥ १. ४. १५९ ॥
अपरोक्षे च ॥ १. ४. १६० ॥
ननौ पृष्टप्रतिवचने ॥ १. ४. १६१ ॥
नन्वोर्वा ॥ १ ४. १६२ ॥
पुरि लङ् चास्मे ॥ १. ४. १६३ ॥
तदादौ च ॥ १. ४. १६४ ॥
वर्तमाने लट् ॥ १. ४. १६५ ॥
प्रवृत्तोपरते ॥ १. ४. १६६ ॥
प्रवृत्ताविरते ॥ १. ४. १६७ ॥
नित्यप्रवृत्ते ॥ १. ४. १६८ ॥
इच्छार्थेभ्यो लिङ् च ॥ १. ४ १६९ ॥
लट् शतृशानचावप्रथमासमानाधिकरणे ॥ १. ४. १७० ॥
संबोधने च ॥ १. ४. १७१ ॥
लक्षणहेत्वोः क्रियायाः ॥ १. ४. १७२ ॥
कर्तृश्च लक्षणे ॥ १. ४. १७३ ॥
द्वयोः पर्यायेण चायोगे ॥ १. ४. १७४ ॥
तत्त्वान्वाख्याने च ॥ १. ४. १७५ ॥
माङ्याक्रोशे ॥ १. ४. १७६ ॥

१. A. This and the following three sūtras are omitted.
२. A. नन्वोर्विभाषा.
३. A omits this sūtra.
४. A. वर्तरि.
५. A. वृत्ता-

अस्तिविद्यतीङ्जुहोतिवेत्तिजानातिभ्यो वा ॥ १. ४. १७७ ॥
प्रत्यये च तिङ्प्रकृतौ ॥ १. ४. १७८ ॥
नित्यमन्यत्रोत्तरपदे च ॥ १. ४. १७९ ॥
वेत्तेः क्वसुश्च ॥ १. ४. १८० ॥
इङ्धारिभ्यां शतृशानचौ ॥ १. ४. १८१ ॥
द्विषः शत्रौ ॥ १. ४. १८२ ॥
सुञो यजमाने ॥ १. ४. १८३ ॥
अहः प्रशंसायाम् ॥ १. ४. १८४ ॥
पूङ्यजिभ्यां शानन् ॥ १. ४. १८५ ॥
शक्तिवयस्ताच्छील्येषु शानच् ॥ १. ४. १८६ ॥
तच्छीलतद्धर्मतत्साधुकारिष्वा क्वेः ॥ १. ४. १८७ ॥
तृन् ॥ १. ४. १८८ ॥
अलङ्कृञ्निराकृञ्भ्यामिष्णुच् ॥ १. ४. १८९ ॥
उदिपचिपतिमतिभ्यः ॥ १. ४. १९० ॥
प्रापयोः जनित्रपिभ्याम् ॥ १. ४. १९१ ॥
वृतिवृधिसहिचरिरुचिप्राजिभ्यः ॥ १. ४. १९२ ॥
भुवः ॥ १. ४. १९३ ॥
जयतेश्च क्नुः ॥ १. ४. १९४ ॥
ग्लामास्थाक्षिपचिपरिमृजिभ्यः स्नुः ॥ १. ४. १९५ ॥
त्रसिगृधिधृषिक्षिपिभ्यः क्नुः ॥ १. ४. १९६ ॥
अघ्राभ्यः शमादिभ्यो घिनुण् ॥ १. ४. १९७ ॥
युजभुजभजद्विषद्रुहदुषत्यजरंजरञ्जिभ्यः ॥ १. ४. १९८ ॥
क्रीडिगुषिभ्यामाङि ॥ १. ४. १९९ ॥
यसियमिभ्यां प्रे च ॥ १. ४. २०० ॥
मिथिलपिभ्यां च ॥ १. ४. २०१ ॥
समि ज्वरिपृणचिभ्याम् ॥ १. ४. २०२ ॥
वौ विचकत्थस्नभुकषकसलसहनिभ्यः ॥ १. ४. २०३ ॥

१. A. जेश्च.
२. A omits रज
३. A. प्रणक्ति-

अपे च लषः ॥ १. ४. २०४ ॥

अभावाहनश्च ॥ १. ४. २०५ ॥

संख्यनुप्रेषु वदः ॥ १. ४. २०६ ॥

समत्यपाभिव्यभिषु चरः ॥ १. ४. २०७ ॥

समनुव्यवेषु रुधः ॥ १. ४. २०८ ॥

विपरिप्रेषु सर्तेः ॥ १. ४. २०९ ॥

संव्योः सृजः ॥ १. ४. २१० ॥

संप्रयोर्वसः ॥ १. ४. २११ ॥

प्रव्योर्द्रुवः ॥ १. ४. २१२ ॥

परिव्योर्दहः ॥ १. ४. २१३ ॥

परौ देवृमृहिभ्याम् ॥ १. ४. २१४ ॥

क्षिपरदवदवादिदेविभ्यो ण्वुल् च ॥ १. ४. २१५ ॥

निन्दहिंसक्लिशखादविनाशिव्याभाषासूर्यनेकाजभ्यो वुञ् ॥ १. ४. २१६ ॥

देविक्रुशोश्चोपसर्गे ॥ १. ४. २१७ ॥

चलनशब्दार्थादकर्मकाद्युच् ॥ १. ४. २१८ ॥

आङितो हलादेः आत्मनेपदिनः ॥ १. ४. २१९ ॥

जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदिभ्यः ॥ १. ४. २२० ॥

क्रुधभूषार्थेभ्यश्च ॥ १. ४. २२१ ॥

न यान्तसूददीपदीक्षिभ्यः ॥ १. ४. २२२ ॥

लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ् ॥ १. ४. २२३ ॥

जल्पभिक्षकुट्टलुण्टवृङः षाकन् ॥ १. ४. २२४ ॥

प्रे जुसूभ्यामिनिः ॥ १. ४. २२५ ॥

जीर्दृक्षिविश्रिपरिभूवमाभ्यव्यथिभ्यः ॥ १. ४. २२६ ॥

दयिपतिग्रहिस्पृहिनिद्रातन्द्राशीङ्श्रद्धाभ्य आलुच् ॥ १. ४. २२७ ॥

दाधेट्सिशदसदो रुः ॥ १ ४. २२८ ॥

१. A. संख्ये

२. A. खादि

३. A. दक्षिर्त्तापरि

४. A omits स्पृहि

५. A. शासरो-

सृधस्यदः क्मरच्॥ १. ४. २२९ ॥
भासिमिदिभ्यां घुरच्॥ १. ४. २३० ॥
भेक्षोः कर्मकर्तरि ॥ १. ४. २३१ ॥
छिदिभिदिभ्यां कुरच्॥ १. ४. २३२ ॥
विदेश्च ॥ १. ४. २३३ ॥
इण्जिसृनशिभ्यः करप् ॥ १. ४. २३४ ॥
गमेस्त च ॥ १. ४. २३५ ॥
जागरूकः ॥ १. ४. २३६ ॥
यजिजपिदंशिवदिभ्यो यङः ॥ १. ४. २३७ ॥
सहिचलिवहिभ्यः किकिनौ ॥ १. ४. २३८ ॥
पापातिः ॥ १. ४. २३९ ॥
चक्रिसस्रिजश्चिदधिनेमयः ॥ १. ४. २४० ॥
दीपिकम्प्यजसिहिंसिकमिस्मिनमिभ्यो रः ॥ १. ४ २४१ ॥
सनाशंसभिक्षभ्य उः ॥ १. ४. २४२ ॥
वेत्तेश्छत्योर्नुच्छौ च ॥ १. ४. २४३ ॥
स्वपितृषिधृषिभ्यो नजिङ्॥ १. ४. २४४ ॥
शूवन्दिभ्यामारुः ॥ १. ४. २४५ ॥
भियः क्रुक्रुकन्क्रुकनः ॥ १. ४. २४६ ॥
स्थेशभासपिसकसो वरच्॥ १. ४. २४७ ॥
यातेर्यङः ॥ १. ४. २४८ ॥
भ्राजभासधृधूर्विद्युतोर्जिग्रावस्तुवः क्विप्॥ १. ४. २४९ ॥
अन्येभ्योऽपि दृश्यन्ते ॥ १. ४. २५० ॥
श्रिञ्द्रुस्रुञ्वायतस्तुकटप्रूपरिव्रजां दीर्घश्च ॥ १. ४. २५१ ॥
वचिप्रच्छ्योरसंप्रसारणं च ॥ १. ४. २५२ ॥
ह्येः संप्रसारणं च ॥ १. ४. २५३ ॥

१. B omits this sūtra
२. A. भिन्दि.
३. A omits this and the following five sūtras.
४. A. विस
५. A. यातेर्डः.
६. A omits this sūtra.

जुहोतेर्द्वे च ॥ १. ४. २५४ ॥

द्युतिगमोश्च ॥ १. ४. २५५ ॥

हृणातेर्ह्रस्वश्च ॥ १. ४. २५६ ॥

भुवः संज्ञायाम् ॥ १. ४. २५७ ॥

डुः शंविसंप्रेषु ॥ १. ४. २५८ ॥

धः कर्मणि ष्ट्रन् ॥ १. ४. २५९ ॥

नीदापूशसुयुयुजस्तुदसिचमिहपतपानहिभ्यः करणे ॥ १. ४. २६० ॥

दंशेरषित् ॥ १. ४. २६१ ॥

सीरसूकरास्येषु पुवः ॥ १. ४. २६२ ॥

अर्तिलूधूसूखनिसहिवहिचरिभ्य इत्रः ॥ १. ४. २६३ ॥

पुवः संज्ञायाम् ॥ १. ४. २६४ ॥

कर्तरि चर्षिदेवतयोः ॥ १. ४. २६५ ॥

नीतः क्तः प्राग्वत् ॥ १. ४. २६६ ॥

मतिबुद्धिपूजार्थेभ्यः ॥ १. ४. २६७ ॥

शीङ्स्थिपिसङ्यजिलङ्क्लिपितृपिदपिकुधिक्षुधिरुहिमुहिदिहिस्निहिक्लमिश्रम्यवत्राप्तिसुधाञ्भृपृमदिमुदिप्रभृतिभ्यः ॥ १. ४. २६८ ॥

शीलिरक्षिक्षमिकमिजुषिरुषितृषिहृषिभ्यः ॥ १. ४. २६९ ॥

क्रुशिरसिभ्यामाङि ॥ १. ४. २७० ॥

रभेः समि च ॥ १. ४. २७१ ॥

यमे रुरुदि च ॥ १. ४. २७२ ॥

अभिव्याङि भृञः ॥ १. ४. २७३ ॥

नञि मृङः ॥ १. ४. २७४ ॥

कषेरनिटो भविष्यति च ॥ १. ४. २७५ ॥

१. A. शंविसंप्रेषु डः.
२. A. नीदश
३. A. सरि-
४. A. गनि
५. A. नीतिः
६. A. दुहि
७. A omits this sūtra.
८. A. ऋषि.

सर्वेभ्यो हेतुसंपत्तौ वा ॥ १. ४. २७६ ॥

लिङ्लोटावाशिषि ॥ १. ४. २७७ ॥

इति श्रीसरस्वतीकण्ठाभरणनाम्नि व्याकरणे
प्रथमस्याध्यायस्य चतुर्थः पादः
समाप्तः

अध्यायश्च समाप्तः

॥ अथ द्वितीयोऽध्यायः ॥

कृवापाजिमिस्वदिसाध्यशूभ्य उण् ॥ २. १. १ ॥

दृन्नासनिजनिचटिचरिभ्यो ञुण् ॥ २. १. २ ॥

[1]किमि श्रुः ॥ २. १ ३ ॥

जराजटावनरसेष्विणः ॥ २. १. ४ ॥

[2]रारश्च लः ॥ २. १. ५ ॥

[3]कृके वचः कश्च ॥ २. १ ६ ॥

भृमृतृचरित्सरितनिमिमस्जिशीङ्वटिचटिचञ्जिभ्य उः ॥ २. १. ७ ॥

अणश्च ॥ २. १. ८ ॥

धान्ये नित् ॥ २. १. ९ ॥

पटिकट्यसिवसित्रपिहनिमनिशूस्वृस्निहिक्लिदिकन्दिबिद्यन्धिबन्धिभ्यः ॥
२. १. १० ॥

उन्देरिच्चादेः ॥ २. १. ११ ॥

बहिराहिपंसां[7] दीर्घश्च ॥ २. १. १२ ॥

अशेर्नुं च ॥ २. १. १३ ॥

नमिमनिजनां नाकिधतश्च ॥ २. १. १४ ॥

वलिफलोर्गुक् च ॥ २. १. १५ ॥

अर्जेः ऋंज च ॥ २. १. १६ ॥

कृतेः कतयोस्तकौ च ॥ २. १. १७ ॥

१. A. जिति.
२. A. जानि
३. A किमश्रः
४. A. This sūtra is written after the next.
५. A. कृते वचः The last word कश्च is written as a separate sūtra.
६. A. This sūtra is written as two sūtras, one ending with शीङ् and the other with उः
७. A. पंसि.

नावश्चेः ॥ २. १. १८ ॥

इषिभिदिविदिमृदिव्यधिगृधिधृषिहृषिकावृभ्यः कुः ॥ २. १. १९ ॥

याहनकृभृवृत्रां द्वे च ॥ २. १. २० ॥

शः सन्वच्च ॥ २. १. २१ ॥

पचेरिच्चोपधायाः ॥ २. १. २२ ॥

कृभ्रोरुच्च ॥ २. १. २३ ॥

ऊर्णोर्नुलोपश्च ॥ २. १. २४ ॥

महति ह्रस्वश्च ॥ २. १. २५ ॥

क्षेरो डश्च ॥ २. १. २६ ॥

श्लिषेः कश्च ॥ २. १. २७ ॥

[1]रिभिप्रथ्योः प्रसारणं च ॥ २. १. २८ ॥

स्यन्देर्धश्च ॥ २. १. २९ ॥

स्पशिभ्रस्जोः सलोपश्च[2] ॥ २ १. ३० ॥

[3]सृजेरसुक् च ॥ २. १. ३१ ॥

बंहिरञ्जिलञ्जिलिञ्जिनां नलोपश्च ॥ २ १. ३२ ॥

पराङोः शृस्वनिभ्यां डित्[4] ॥ २. १. ३३ ॥

द्युद्रुभ्यां च ॥ २. १. ३४ ॥

हरिमितशतकसु द्रुवः ॥ २. १. ३५ ॥

अपदुस्सुवनिषु स्थः ॥ २. १. ३६ ॥

पीमृगमित्रदेवसुम्नास्मसु युः ॥ २. १. ३७ ॥

कैशीशमिरमिभ्यः कुः ॥ २. १. ३८ ॥

प्रि[हि]यः किद्रो लश्च वा ॥ २. १. ३९ ॥

चटिकठिभ्यामाकुः ॥ २. १. ४० ॥

[5]शिविकुटिकुषिभ्यः कित् ॥ २. १. ४१ ॥

चेरुपन्योर्डित् ॥ २. १. ४२ ॥

[6]शालेराकुः ॥ २. १. ४३ ॥

१. A omits this sūtra.
२. A. सोपश्च.
३. A. सृजेः सुश्च.
४. A. ण्वित्
५. A. शिखि
६. A. सिलेरङ्कुः

सृपृभ्यां दाकुक् ॥ २. १. ४४ ॥
अमेर्गुः ॥ २. १. ४५ ॥
दमेर्लोपश्च ॥ २. १. ४६ ॥
हेः किन्नुट् च ॥ २. १. ४७ ॥
प्रीकैपानीलिभ्यः कङ्कुच् ॥ २. १. ४८ ॥
अर्त्यविभ्यामटुच् ॥ २. १. ४९ ॥
शालेराटुच् ॥ २. १. ५० ॥
तनिमनिकणिभ्यो डुः ॥ २. १. ५१ ॥
पनेर्दीर्घश्च ॥ २. १. ५२ ॥
मृपल्योः कनुगानुगौ च ॥ २. १. ५३ ॥
गमेः कित् ॥ २ १. ५४ ॥
स्थो णुः ॥ २. १. ५५ ॥
अजिवृरीभ्यो नित् ॥ २. १. ५६ ॥
कृहृभ्यामेणुः ॥ २. १. ५७ ॥
कमिमनिजन्यसिगाभापायाहिभ्यस्तुः ॥ २. १. ५८ ॥
चायः किं[3] च ॥ २. १. ५९ ॥
आपो ह्रस्वश्च ॥ २. १. ६० ॥
सितनिगमिमसिसच्यविधाञ्पूषूक्रुशिभ्यस्तुन् ॥ २. १. ६१ ॥
वसेर्णिद्वा ॥ २. १ ६२ ॥
पाज्यर्तिभ्यो डित् ॥ २. १. ६३ ॥
कृञः कतुः ॥ २. १. ६४ ॥
पधिवहोरतुच्[4] ॥ २ १. ६५ ॥
तनेर्यक् च ॥ २. १. ६६ ॥
जीवेरातुः ॥ २. १. ६७ ॥
यमेर्दुक् ॥ २. १. ६८ ॥
शीङो धुक्[5] ॥ २. १. ६९ ॥

१. A. किश्च्
२. A. स्योर्णः
३. A. की
४. A. अनुक् च
५. A. थुक्

धुञो नुट् च ॥ २. १. ७० ॥
दाभाभ्यां नुः ॥ २. १. ७१ ॥
वचेर्गश्च ॥ २ १. ७२ ॥
धेट इश्च ॥ २. १. ७३ ॥
सूविषिकृञभ्यः कित् ॥ २. १. ७४ ॥
हौर्ह्वे लोपश्च ॥ २. १. ७५ ॥
गमेः सन्वच्च ॥ २. १. ७६ ॥
तनेर्डुः ॥ २. १. ७७ ॥
अञ्जेरिण्णुच् ॥ २. १. ७८ ॥
क्षिपिनदिपदिपतिदाभूभ्यश्च नुक् ॥ २. १. ७९ ॥
कृशेरानुक् ॥ २. १. ८० ॥
जीवेरदानुक् ॥ २. १. ८१ ॥
वचेरक्नुः ॥ २. १. ८२ ॥
स्तनिहृषिपुषिगदिमदिघुषिगडिमण्डिजनिनन्दिभ्यो णेरित्नुच्[1] ॥ २. १. ८३ ॥
अर्तिकशिभ्यां चिपुक् ॥ २. १. ८४ ॥
अमिकमिभ्यां घुः ॥ २. १. ८५ ॥
अम्रेरमुः ॥ २. १. ८६ ॥
जनिमनियजिशुन्धिदसिभ्यो थुन्[2] ॥ २. १. ८७ ॥
नञि ध्वरे ॥ २. १. ८८ ॥
भुजेः कित् ॥ २. १. ८९ ॥
सर्तेरयूः ॥ २. १. ९० ॥
हेतुभावयोः मृडस्त्युक् ॥ २. १. ९१ ॥
पीम्यशिभ्यो रुः ॥ २. १. ९२ ॥
रुपूभ्यां क्नुन् ॥ २. १. ९३ ॥
स्वनो लोपश्च ॥ २. १. ९४ ॥
जनेस्त च ॥ २. १. ९५ ॥
शातेर्ह्वस्वश्च ॥ २. १. ९६ ॥

१. A. हे
२. A. णेरियच्
३. A. निनि.

षिक्षेः शिर्[1] च ॥ २. १. ९७ ॥

ईमनि शीङो डित्[2] ॥ २. १. ९८ ॥

कुट्यर्तिभ्यामरुः ॥ २. १. ९९ ॥

कर्केरारुः ॥ २. १. १०० ॥

और्वेरादेरुदेतौ च[3] ॥ २. १. १०१ ॥

तुम्बेरुरुः ॥ २. १. १०२ ॥

कन्देरत उच्च ॥ २. १. १०३ ॥

चमेरूरुः ॥ २. १. १०४ ॥

शीङ्पीङ्शल्भ्यो लुट्लुगालुचः ॥ २. १. १०५ ॥

कमण्डलुगुहलुगुलुगुलवः ॥ २. १. १०६ ॥

पॅरः शुन् ॥ २. १. १०७ ॥

मस्जिषोः षुक् ॥ २. १. १०८ ॥

तरतेरक्षुः ॥ २. १. १०९ ॥

कृषिचमितनिधन्यन्दिसर्जिखर्जिभ्य ऊः ॥ २. १. ११० ॥

खण्डयज्योर्डुकुजुकौ च ॥ २. १. १११ ॥

कृषेश्छ च ॥ २. १. ११२ ॥

तृद्रोः दूश्च ॥ २. १. ११३ ॥

मृजेर्गुणश्च ॥ २. १. ११४ ॥

वहो ध च ॥ २. १. ११५ ॥

कसिपत्यर्तिभ्यो णित्[4] ॥ २. १. ११६ ॥

अडो लश्च वा ॥ २. १. ११७ ॥

नञि लम्बेर्नलोपश्च ॥ २. १. ११८ ॥

कें शीङो रट् चास्य ॥ २. १. ११९ ॥

जनेर्षुक् च ॥ २. १. १२० ॥

१. A. शिश्च

२. A. शृनि

३. A. ओर्लेरादेः रुदेकौ च

४. A. This is written as part of the previous sūtra.

५. A. This and the following two sūtras are omitted.

६. A. नृद्रो

७. A. के शीङ् एरट्

कफ ईलेर्णिलुक् ॥ २. १. १२१ ॥
कृञः कन्धुक् च ॥ २. १. १२२ ॥
धृषेर्दिधिष च ॥ २. १. १२३ ॥
दुभिचपोर्नुश्च ॥ २. १. १२४ ॥
नृतिशृधिकुहिभ्यः कूः ॥ २. १. १२५ ॥
ऋतेरं च ॥ २. १. १२६ ॥
भ्रमेर्डूः ॥ २. १. १२७ ॥
योरागूच् ॥ २. १. १२८ ॥
[2]दिवेः ऋन् ॥ २. १. १२९ ॥
नियो डित् ॥ २. १. १३० ॥
सव्ये स्थः ॥ २. १. १३१ ॥
सुञ्यसेः ऋन् ॥ २. १. १३२ ॥
यातेर्वृद्धिश्च ॥ २. १. १३३ ॥
नञि नन्देः ॥ २. १. १३४ ॥
पातेस्तृजिच्चं ॥ २. १. १३५ ॥
मानेर्लोपश्च ॥ २. १. १३६ ॥
भ्राजेश्च ॥ २. १. १३७ ॥
दुहेरिट् किच्च ॥ २. १. १३८ ॥
जायां मिमः ॥ २. १. १३९ ॥
नमेः पश्च ॥ २. १. १४० ॥
आपो ह्रस्वश्च ॥ २. १. १४१ ॥
हुपूभ्यामृत्विजि तृन्नित्र् च ॥ २. १. १४२ ॥
नियः षुक् च ॥ २. १. १४३ ॥
उदिगायश्च चित् ॥ २. १. १४४ ॥
प्रे स्तुशासिभ्याम् ॥ २. १. १४५ ॥
हृप्रस्थोः प्रतौ ॥ २. १. १४६ ॥
[4]त्विषेर्देवतायामितोऽच्च ॥ २. १. १४७ ॥

१. A. शिधि
२. A. वेरुन्
३. A adds after this sūtra कप ईरलुक् च
४. A. नृषेः

क्षदेर्युक्त ॥ २. १. १४८ ॥

रातेर्डैं ॥ २. १. १४९ ॥

द्रुगमिभ्यां डोः ॥ २. १. १५० ॥

ग्लानुभ्यां डौः ॥ २. १. १५१ ॥

अच इः ॥ २. १. १५२ ॥

खनिकष्यञ्ज्यसिवसिध्वनिमनिमणिग्रन्थिचरिभ्यश्च ॥ २. १. १५३ ॥

उभे द्वत्रौ च ॥ २. १. १५४ ॥

भुजः कित् ॥ २. १. १५५ ॥

कृगृशृपृकुटिच्छिदिभिदिभ्यश्च ॥ २. १. १५६ ॥

अंहिकुण्ठिकम्पां नलोपश्च ॥ २. १. १५७ ॥

तरतेः सन्वत्तुक्त्राभ्यासस्य ॥ २. १. १५८ ॥

इगुपधात्कित् ॥ २. १. १५९ ॥

वौ रिचेर्नुं च ॥ २. १. १६० ॥

क्रमितमिनमिस्तम्भामत इच्च ॥ २. १. १६१ ॥

मनेरुच्च ॥ २. १. १६२ ॥

हलिकलिकिलिकटिवटित्रुटिकुटिबलिवलिवल्ल्यलिभ्य इत् ॥ २. १. १६३ ॥

हृपिशिरुहिवृतिविदिकीर्तिभ्यश्च ॥ २. १. १६४ ॥

भ्रमेः[1] संप्रसारणं च ॥ २. १. १६५ ॥

कृशृवसिवपिराजिध्राजिध्वजिसदिहनिकमिवमिफलिकशिवाशिवदिवारिसंपतिभ्य इञ् ॥ २. १. १६६ ॥

नहो भश्च ॥ २. १. १६७ ॥

अलिशलिपलितलिघसिजभ्यणिपणिभ्य इणू ॥ २. १. १६८ ॥

अज्यतिभ्यां पादे च ॥ २. १. १६९ ॥

अशे रुट् च ॥ २. १. १७० ॥

वातेर्डित्[2] ॥ २. १. १७१ ॥

प्रे हृञः कूपे ॥ २. १. १७२ ॥

कायः किः ॥ २. १. १७३ ॥

१. A. द्रमेः ३. A. मृञः

२. A. वातो

वर्धेरकिः ॥ २. १. १७४ ॥

सनेर्डक्षिः ॥ २. १. १७५ ॥

कौतेर्डिक्षिः ॥ २. १. १७६ ॥

मृकंण्यवदधिभ्य ईचिः ॥ २. १. १७७ ॥

श्वेश्चित्[1] ॥ २ १ १७८ ॥

वेञो डित् ॥ २. १. १७९ ॥

श्रिञो डिः ॥ २. १. १८० ॥

चमेरुच्चातः ॥ २. १. १८१ ॥

मुषेः किदुनट् च ॥ २ १. १८२ ॥

वेतेर्णिः ॥ २. १ १८३ ॥

वितसिवसिसपिपदिभ्यस्तिप् ॥ २. १. १८४ ॥

भसेर्गट्[2] च ॥ २. १. १८५ ॥

यजेस्तिः ॥ २. १. १८६ ॥

कुंडो[3] यषुट् च ॥ २. १. १८७ ॥

गिरः षुग्घस्वश्च ॥ २. १. १८८ ॥

दृकृषिरिषिविषिमुषिशाशुच्यशिभ्यः क्तिन् ॥ २ १. १८९ ॥

कुचिओश्चिन्नुक् च ॥ २. १. १९० ॥

अमेरतिः ॥ २. १. १९१ ॥

युगाभ्यां कित् ॥ २. १. १९२ ॥

वहिवसिखल्यार्तिभ्यश्चित ॥ २. १. १९३ ॥

वृञो व्रत च ॥ २. १. १९४ ॥

वस्यार्तिभ्यामातिः ॥ २. १. १९५ ॥

अभौ यामाभ्याम् ॥ २ १ १९६ ॥

यजो यश्च ॥ २. १. १९७ ॥

अविभूभ्यामन्तिः ॥ २. १. १९८ ॥

शेकेरुन्तिः ॥ २. १. १९९ ॥

१. A. कन्य

२. A. श्येश्चित्

३. A. गश्च

४. A. कुन्दो यषुक्

५. A omits this sūtra.

अजिसञ्जयसिभ्यः क्थिन् ॥ २. १. २०० ॥

सारेरथिन् ॥ २. १. २०१ ॥

तनेर्डिथिः ॥ २. १. २०२ ॥

अतेरिथिः ॥ २. १. २०३ ॥

उषेरधिः ॥ २. १. २०४ ॥

विदेः किद्रट्[1] च ॥ २. १. २०५ ॥

चूर्यगिभ्यां निः ॥ २. १. २०६ ॥

वहिश्रुश्रियुक्षुभ्यो नित् ॥ २. १. २०७ ॥

शाशीङो ह्रस्वश्च ॥ २. १. २०८ ॥

घृसृधुवृष्टिप्राच्छिज्वरित्वरिभ्यः कित् ॥ २. १. २०९ ॥

पृषेर्वृद्धिश्च ॥ २. १. २१० ॥

ऋतृसृकृधृधम्यश्यविवृतिग्रहिरजिकस्यटिभ्यो निः ॥ २. १. २११ ॥

अदेर्मुट्[2] च ॥ २. १. २१२ ॥

कृषेरादेश्च च ॥ २. १. २१३ ॥

आङि शुंषेस्सनः[3] ॥ २. १. २१४ ॥

क्षिपेः कित् ॥ २. १. २१५ ॥

अर्तेरलिच्[4] ॥ २. १. २१६ ॥

शकेरुनिः ॥ २. १. २१७ ॥

नीदलिभ्यां मिः ॥ २ १. २१८ ॥

अर्तेरू च ॥ २. १. २१९ ॥

अशे रंश[6] च ॥ २. १. २२० ॥

भुवः किमन् ॥ २. १. २२१ ॥

क्षणेर्दयिः[7] ॥ २. १. २२२ ॥

अङ्किवङ्किमङ्कयङ्किसद्यशूभ्यो रिः ॥ २. १. २२३ ॥

भूसूभ्यां कित् ॥ २. १. २२४ ॥

१. A. थिः

२. A. किभूक् च

३. A. मुक्

४. A. शुषः

५. A. अर्तेरीकचू

६. A. दश

७. A. धयिः

रासदिशकिकतिभ्यस्त्रिप् ॥ २. १. २२५ ॥

अदेः क्रिंश्च ॥ २. १. २२६ ॥

कुशिविशिभ्याम् ॥ २. १. २२७ ॥

कुपेर्दुक् च ॥ २. १. २२८ ॥

वल्लुयर्तिकृतिभ्यो रिः ॥ २. १. २२९ ॥

अङ्गिजसिसहिभ्य उरिँन् ॥ २. १. २३० ॥

पाट्यञ्जिभ्यामलिच् ॥ २. १. २३१ ॥

धूञ्मूङ्माङ्शलिभ्यो लिगिलणौकुलिञ्मलिच् ॥ २. १. २३२ ॥

दृपृभ्यां विन् ॥ २. १. २३३ ॥

जॄशृस्तृजागृकृनीघृपिभ्यो ण्विँत् ॥ २. १. २३४ ॥

छँविस्थविकिकिदीविदीदिव्यटविशिबयः ॥ २. १. २३५ ॥

प्लुषिशुषिकुषिभ्यस्सिक् ॥ २. १. २३६ ॥

अशेर्नित् ॥ २. १. २३७ ॥

गोपादिष्वनेरसिः ॥ २. १. २३८ ॥

वृपृसाभ्यो नुट् च ॥ २. १. २३९ ॥

व्रियो हिँक् ॥ २. १. २४० ॥

अवितृस्तृतन्त्रिभ्य ईः ॥ २. १. २४१ ॥

वाते प्रमः कित् ॥ २. १. २४२ ॥

यापो ह्रे च ॥ २. १. २४३ ॥

लक्षेर्मुट् च ॥ २. १. २४४ ॥

तुवः कित् ॥ २. १. २४५ ॥

ऊँवश्चिक् ॥ २. १. २४६ ॥

तनेरनश्च वः ॥ २. १. २४७ ॥

१. A This and the next sūtra are written as one sūtra.
२. A. उरिः
३. A. ङिः
४. A. This and the next sūtra are written as one.
५. A omits शुषि
६. A. टित्
७. A. बुवः

पारेरजिः ॥ २. १. २४८ ॥

भिषेः कित् ॥ २. १. २४९ ॥

पणेरिज्यादेश्च घः ॥ २. १. २५० ॥

वशेः कित् ॥ २. १. २५१ ॥

भृञ उच्च ॥ २. १. २५२ ॥

लङ्केरटिर्नलोपश्च ॥ २. १. २५३ ॥

सर्तेरडिः ॥ २. १. २५४ ॥

ईडेरबिडिङ् ह्रस्वश्च ॥ २. १. २५५ ॥

भातेर्डवतुः ॥ २. १. २५६ ॥

बृहिमहिपृपिभ्योऽतिः शतृवच्च ॥ २. १. २५७ ॥

गमेर्डित् द्वे च ॥ २. १. २५८ ॥

संश्चत्तृपद्वेहदित्यादयः ॥ २. १. २५९ ॥

हसृरुहियुपिभ्य इतिः ॥ २. १. २६० ॥

ताडेर्णिलुक् च ॥ २. १. २६१ ॥

उदके श्वेर्डितिः ॥ २. १. २६२ ॥

मृडः उतिः ॥ २. १. २६३ ॥

श्रो सुट् च वा ॥ २. १. २६४ ॥

शकेः क्तिः ॥ २. १. २६५ ॥

यजेः कश्च ॥ २. १. २६६ ॥

पातेः क्थिः ॥ २. १. २६७ ॥

युष्यसिभ्यां मदिक् ॥ २. १. २६८ ॥

त्यजिननियमिभ्यो डतिः ॥ २. १. २६९ ॥

एतेस्तदिः ॥ २. १. २७० ॥

शदभसिभ्योऽदिः ॥ २. १. २७१ ॥

पुरः सुट् च ॥ २. १. २७२ ॥

दृणातेर्ह्रस्वश्च ॥ २. १. २७३ ॥

[द्वि[युवृषितक्षिराजिधन्विपचिद्यु]प्रतिदिवभ्यः कनिन् ॥ २. १. २७४ ॥

१. A omits this sūtra.
२. A. डदिः
३. A. सुक्
४. A omits this and the following two sūtras.

सप्यशूभ्यां तुट् च ॥ २. १. २७५ ॥

नुदात्रिभ्यां गुणश्च ॥ २. १. २७६ ॥

श्वन्नुक्षन्पूषन्शीर्षन्क्रेदन्मूर्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्वन्मातरिश्वन्मघवन्प्रावन्नहन्महन्नथर्वन्निति ॥ २. १. २७७ ॥

स्नामदिपद्यर्ति[पर्वि]शकिभ्यो वनिप् ॥ २. १. २७८ ॥

शीङ्कुशिरुहिजिक्षिहृञ्सृवृभ्यः क्नविप् ॥ २. १. २७९ ॥

सृजेः कश्च ॥ २. १. २८० ॥

ध्याप्योः संप्रसारणं च ॥ २. १. २८१ ॥

अतेर्धश्च ॥ २. १. २८२ ॥

मनिन् ॥ २. १. २८३ ॥

व्योमन्[1]रोमन्लोमन्क्लोमन्हेमन्वेमन्नामन्ललामन्नात्मन्यक्ष्मन्पक्ष्मन्नूष्मन्[2] धर्मन्सीमन्ब्रह्मन्निति ॥ २. १. २८४ ॥

गमेरिनिः ॥ २. १. २८५ ॥

आङि च णित् ॥ २. १. २८६ ॥

भुवश्च ॥ २. १. २८७ ॥

प्रे स्थश्च ॥ २. १. २८८ ॥

यातेः प्रतौ च ॥ २. १. २८९ ॥

बुधेश्च ॥ २. १. २९० ॥

परमे स्थः कित् ॥ २. १. २९१ ॥

मन्थाः ॥ २. १. २९२ ॥

पतेः थश्च ॥ २. १. २९३ ॥

अर्तेर्भुक्षिनक्[3] ॥ २. १. २९४ ॥

हृजनिभ्यामिमनिच् ॥ २. १. २९५ ॥

भृवृस्तृसूभ्य ईमनिच् ॥ २. १. २९६ ॥

१. A. This and the next sūtra are written as one.

२. A omits रोमन्

३. A omits धर्मन्

४. A reads this together with the next sūtra.

५. A. प्रतेन्थश्च

६. A. नहू

आपः किन् ह्रस्वश्च ॥ २. १. २९७ ॥

ककुप्त्रिष्टुबनुष्टुभः ॥ २. १. २९८ ॥

इणो दमिक् ॥ २. १. २९९ ॥

कौतेर्डिमिः ॥ २. १. ३०० ॥

अवतेर्मिः ॥ २. १. ३०१ ॥

गृपृदुर्वीधुर्वीभ्यः किप् ॥ २. १. ३०२ ॥

वार्द्धारौ ॥ २. १. ३०३ ॥

चतेरुरन् ॥ २. १. ३०४ ॥

दिवेर्डिविः ॥ २. १. ३०५ ॥

विशः किप् ॥ २. १. ३०६ ॥

विपाशेश्च ॥ २. १. ३०७ ॥

सहेः षप् च ॥ २. १. ३०८ ॥

सञ्जुपाशिषौ ॥ २. १. ३०९ ॥

अर्चिरुचिशुचिहुसृपिछदिछर्दिभ्य इसिः ॥ २. १. ३१० ॥

वृहेर्नलोपश्च ॥ २. १. ३११ ॥

द्युतेर्निदादेश्च जः ॥ २. १. ३१२ ॥

सहो ध च ॥ २. १. ३१३ ॥

जनेरुसिः ॥ २. १. ३१४ ॥

अर्तिपृवपियजिधनिभ्यो नित् ॥ २. १. ३१५ ॥

इणो णित् ॥ २. १. ३१६ ॥

चक्षेरसिक् च ॥ २. १. ३१७ ॥

पातेर्डुसुन् ॥ २. १. ३१८ ॥

यमिदमिभ्यां डोस् ॥ २. १. ३१९ ॥

असुन् ॥ २. १. ३२० ॥

पिबतेरिच्च ॥ २. १. ३२१ ॥

१. A omits ह्रस्वश्च.

२. A omits this and the following four sūtras.

३. A. इस्

४. A. डोस:

५. A. This and the next sūtra are written together.

यजेः श च ॥ २. १. ३२२ ॥
उषिरञ्जिशृभ्यः कित् ॥ २. १. ३२३ ॥
वस्यहिभ्यां णित् ॥ २. १. ३२४ ॥
उषेर्जश्च ॥ २. १. ३२५ ॥
वहेः सुट् च ॥ २. १ ३२६ ॥
स्तुरीभ्यां तुट् च ॥ २. १. ३२७ ॥
इणो नुट् च ॥ २. १. ३२८ ॥
शीङः फेट् च ॥ २. १. ३२९ ॥
छदिरहो नुट् ह्रस्वश्च ॥ २. १. ३३० ॥
अमेर्भुक् च ॥ २. १. ३३१ ॥
अर्तेरुच्च ॥ २. १. ३३२ ॥
व्याधौ शुट् च ॥ २. १. ३३३ ॥
उदके नुट् च ॥ २. १. ३३४ ॥
पातेस्थुट् च ॥ २. १. ३३५ ॥
बले जुट् च ॥ २. १. ३३६ ॥
यातेर्दुक् च ॥ २. १. ३३७ ॥
नभेश्चित् ॥ २. १. ३३८ ॥
इन्धेर्नलोपश्च ॥ २. १. ३३९ ॥
आपो ह्रस्वो नुट् च वा ॥ २. १. ३४० ॥
अदेर्नुं धश्च वा ॥ २. १. ३४१ ॥
इण्विधिभ्यामसिः ॥ २. १. ३४२ ॥
पुंरोरेतःपयस्सु दधः कित् ॥ २. १. ३४३ ॥
रेपस्नेक्षणसूधस्विहायसोकस्मुमनस्पुरूरवस्पुरुदंसोऽनेहसङ्गिरोऽप्सरसः ॥
२. १. ३४४ ॥

१. A. मूभ्यः
२. A omits this sūtra.
३. A. पश्च.
४. A. हादिराहोः नुं
५. A. बुंक्
६. A. शुक्
७. A. स्थुक्
८. A. जुक्
९. A. नंधौ
१०. A. This is written as two sūtras.

वशेः कनसिः ॥ २. १. ३४५ ॥

वृमेरुनसिः ॥ २. १. ३४६ ॥

चेदेरमसिः ॥ २. १. ३४७ ॥

अनसि वहेः किप् डश्चानसः ॥ २. १. ३४८ ॥

इति श्रीसरस्वतीकण्ठाभरणनाम्नि व्याकरणे
द्वितीयस्याध्यायस्य प्रथमः पादः
समाप्तः.

---

१. A. चङे.

२. A. This is written as two sūtras.

अथ द्वितीयः पादः

जीवेरातृकन् वृद्धिश्च ॥ २. २. १ ॥

इण्भीकापाशल्यतिमर्चिनिह्राड्भ्यः कन् ॥ २ २. २ ॥

युशुघुविधूञां दीर्घश्च ॥ २. २. ३ ॥

कुतुस्तूयिकृदाधारार्चिवलिकलिभ्यः कः ॥ २ २. ४ ॥

कृसृवृविपुषिमुषिमूङ्शुभूभ्यः कित् ॥ २. २. ५ ॥

निष्कतुरुष्कोदर्कालर्कशुल्कश्वफल्ककिञ्जल्कोल्कछेककेकादयः ॥ २. २. ६ ॥

कृसृभृवृस्तुकुक्षुचरिचटिचणितम्यमिदेविकनिमनिपचिमचिमशिक्षारिकुरिवृतिवल्लिमल्लिसल्ल्यलिभ्यो वुन् ॥ २ २. ७ ॥

कौ रुरुण्टिरण्टिभ्यः ॥ २. २. ८ ॥

कटेर्नुं च वा ॥ २. २. ९ ॥

उदिरुचितिलिपुलिपिटिक्षिपिध्रुसूभ्यः कित् ॥ २. २. १० ॥

कीचकार्भकधमकवधकर्जहकैरकैडकाश्मकादयः ॥ २. २ ११ ॥

खञ्जिबलिपतिभ्य आकः ॥ २. २. १२ ॥

शलिपटिमनिभ्यो नित् ॥ २. २. १३ ॥

पिनाकापिण्याकश्यामाकपुलाकवार्ताकवृन्ताकज्योन्ताकादयः ॥ २. २. १४ ॥

अलिकलिदलिपुलिवृश्चिस्फटिपिकृपिभ्यः किकन् ॥ २. २. १५ ॥

मुषेर्दीर्घश्च ॥ २. २. १६ ॥

श्यमेर्यण इक् च ॥ २. २. १७ ॥

१. A. विचि
२. A. म्यणि
३. A. कटि
४. A. लिकेभ्यः
५. A. करुण्टि
६. A. उङि
७. A omits पुलि
८. A. जनकै-
९. A. त्यकादयः
१०. A. खलि
११. A omits पिनाक
१२. A omits श्यामाक
१३. A omits ज्योन्ताक
१४. A omits पुलि

पिपीलिकैतिककुशिकहृदिकमक्षिकादयः ॥ २. २. १८ ॥

ऋच्यलि...[इषिशलि]दूषिकषिहृषिदशिमृडिवलिस्यम्यनिभ्यः कीकन् ॥ २. २. १९ ॥

मृद्वीकातिन्तिडीकबाह्लीकवल्मीककलमलीककिङ्किणीकपुण्डरीकचञ्चरीकसमीकप्रतीकपूतीकफर्फरीकादयः ॥ २. २. २० ॥

समिकसेरुकन् ॥ २. २. २१ ॥

कमितिम्योर्दुक् च ॥ २. २. २२ ॥

[2]अशिकचोर्नुं च ॥ २. २ २३ ॥

कुहेः कित् ॥ २. २. २४ ॥

क्रमेः क्रमुं च वा ॥ २ २. २५ ॥

चुलुकोलमुकचिबुकचूचुकजम्बुकगवेधुकामधुकभावुकपृथुकादयः ॥ २. २. २६ ॥

मृकणिजलिवलिबन्धिभल्लिभ्य ऊकः ॥ २. २. २७ ॥

शलिमण्डिभ्यां णित् ॥ २. २. २८ ॥

मधूकोलूकोरुवूकुशम्बूकवरूकादयः ॥ २. २. २९ ॥

कोङ्को रो लश्च वा ॥ २. २. ३० ॥

रालापार्काभ्यः कित् ॥ २. २. ३१ ॥

कलेरविङ्कः ॥ २. २. ३२ ॥

क्रमेरेलकः ॥ २. २. ३३ ॥

लूभीशीङ्शिङ्भ्य आनकः ॥ २. २. ३४ ॥

अनेर्डित् ॥ २. २. ३५ ॥

कनेरीनकः ॥ २. २. ३६ ॥

[10]कृतिभिदिलतिपुतिभ्यः क्तिकन् ॥ २. २. ३७ ॥

इष्यसिभ्यां क्तकन् ॥ २. २. ३८ ॥

१. A. पृषि

२. A. शिकचोः

३. A. कुचू

४. A. वाल्लुक.

५. A omits चूचुकजम्बुक

६. A omits पृथुक.

७. A adds मधूक.

८. A omits का.

९. A. रूकः

१०. A. omits this and the following two sūtras.

भियो द्वे च ॥ २. २. ३९ ॥
हरुहिपिण्डिभ्य ईतकः ॥ २. २. ४० ॥
कुषेः कित् ॥ २. २. ४१ ॥
चण्डिभल्लिभ्यामातकः ॥ २. २. ४२ ॥
श्लेष्मातकाघ्रातकामिलातकपिष्टातकादयः ॥ २. २. ४३ ॥
शमिमनिभ्यां खः ॥ २. २. ४४ ॥
मुहेः खर्मूर्च्छ ॥ २. २. ४५ ॥
इषेः किद् लोपश्च ॥ २. २. ४६ ॥
महेरुच्चास्य वा ॥ २. २. ४७ ॥
इयतेरिच्चास्य वा ॥ २. २. ४८ ॥
निय ऊनक् च ॥ २. २. ४९ ॥
पुवो नुं ह्रस्वश्च ॥ २. २. ५० ॥
अश्नोतेर्डित् ॥ २. २. ५१ ॥
मयतेरूट् च ॥ २. २. ५२ ॥
गृभृस्तृभ्यो गः ॥ २. २. ५३ ॥
मुदिखडिछापूभ्यः कित् ॥ २. २. ५४ ॥
गम्यदिभ्यां गन् ॥ २. २. ५५ ॥
भृशुभ्यां किनुण् च ॥ २. २. ५६ ॥
शूपीङ्भ्यां ह्रस्वश्च ॥ २. २. ५७ ॥
तडेरागच् ॥ २. २. ५८ ॥
पतितमितृलूभ्योऽङ्गच् ॥ २. २. ५९ ॥
सृवृनृभ्यो णित् ॥ २. २. ६० ॥
कुरुवृषिमृदिपिशिभ्यः कित् ॥ २. २. ६१ ॥
मनस्तुट् च ॥ २. २. ६२ ॥
कलिस्फुलिभ्यामिङ्कक् ॥ २. २. ६३ ॥
भृञो भुर्लुं च ॥ २. २. ६४ ॥

१. A. मुहेर्मुं च.
२. A. यमेरुक् च
३. A omits this and the following six sūtras.
४. A. भुक्

माङि तुलेरुङ्चू ॥ २. २. ६५ ॥

कमितमिर्शमिभ्यो डित् ॥ २. २. ६६ ॥

सर्तेरुच्च[1] ॥ २. २. ६७ ॥

जनेर्घः ॥ २. २. ६८ ॥

हणातेः कित् ॥ २. २. ६९ ॥

सर्तेरघच्च ॥ २. २. ७० ॥

कुवश्चटू दीर्घश्च ॥ २. २. ७१ ॥

सिवेष्टेरू च ॥ २. २. ७२ ॥

कृञश्च ॥ २. २. ७३ ॥

उचेश्चक् ॥ २. २. ७४ ॥

कवेरचचू ॥ २. २. ७५ ॥

क्रमेः क च ॥ २. २. ७६ ॥

मृङ इचचू ॥ २. २. ७७ ॥

नमेर्डिचचू ॥ २. २. ७८ ॥

लषेरुचन् कश्च ॥ २ २. ७९ ॥

गुडेरूचक् ॥ २. २. ८० ॥

चिम्योर्डोंचच् ॥ २. २. ८१ ॥

अञ्चेच्चू ॥ २. २. ८२ ॥

गुगम्यवितुँदिमुदिभ्यश्छक् ॥ २. २. ८३ ॥

पूङ्पीङोर्ह्रस्वश्च ॥ २. २. ८४ ॥

कच्छगुलुच्छपिलिपिच्छादयः ॥ २. २. ८५ ॥

वियो जक् ॥ २. २. ८६ ॥

पुवो नुक् ह्रस्वश्च ॥ २. २. ८७ ॥

कुवोर्धुक् च वा ॥ २. २. ८८ ॥

कुलेरिजक् ॥ २. २. ८९ ॥

१. A omits शमि

२. A. क्च

३. A omits this sūtra.

४. A. मृडश्च

५. A. डोंडच

६. A. ङ्ङ च

७. A omits तुदिमुदि

८. A. लुक्

कृञोऽञ्चच् ॥ २. २. ९० ॥

मुर्वेरजग्लोपश्च ॥ २. २. ९१ ॥

कुटजोटजबलबजादयः ॥ २. २. ९२ ॥

शमेर्डः[2] ॥ २. २ ९३ ॥

लुषेष्टः ॥ २. २. ९४ ॥

जुकिजनिपणिभ्यो दीर्घश्च ॥ २. २. ९५ ॥

घण्टाजटासटादयः ॥ २. २. ९६ ॥

कृसृभृपृकृपशकिकङ्किकर्किमर्क्यविभ्योऽटच् ॥ २. २. ९७ ॥

कीकटकपटकर्पटादयः ॥ २. २. ९८ ॥

किरतेराटग्लश्च वा ॥ २. २. ९९ ॥

शृङ्गाटकपाटललाटविराटप्रपुनाटादयः ॥ २. २. १०० ॥

चरेरिटच् भश्च ॥ २. २. १०१ ॥

डिण्टन् ॥ २ २. १०२ ॥

कृतृकृपिभ्यः कीटन् ॥ २. २. १०३ ॥

खञेररीटः ॥ २. २. १०४ ॥

वृणोतेरूटच् ॥ २. २. १०५ ॥

नर्कुटमकुटकुष्कुटादयः ॥ २. २. १०६ ॥

वन्धेः कूटन् ॥ २. २. १०७ ॥

दुरि द्रोः दुर् च ॥ २. २. १०८ ॥

चपेरेटच् ॥ २. २. १०९ ॥

ग्रो णित् ॥ २. २. ११० ॥

करोतेरोटच् ॥ २. २. १११ ॥

बकोटाक्षोटकर्कोटादयः ॥ २. २. ११२ ॥

पीङ्कुणिकणिभ्यष्टक् ॥ २. २. ११३ ॥

जृकमिरमिभ्योऽठच् ॥ २. २. ११४ ॥

१. A. वलजाल्पजादयः

२. A omits this sūtra.

३. A omits this and the next sūtra.

४. A. चरेरिटकिरतेराटग्लश्च वारच् भश्च.

५. A. वन्धेरूटन्

६. A. वुक्

७. A omits कणि.

अमन्ताडुः ॥ २. २ ११५ ॥

कृसृभृवृतॄभ्योऽण्डः ॥ २. २. ११६ ॥

अण्डैरण्डविचण्डकाण्डभाण्डवतण्डपोगण्डादयः ॥ २. २. ११७ ॥

लगिग्रोरुडच् ॥ २ २. ११८ ॥

व्याडनीडक्रोडकहोडादयः ॥ २. २. ११९ ॥

शमिषणिकुणिभ्यो ढः ॥ २. २. १२० ॥

नञि सहेः षश्चादेः ॥ २. २. १२१ ॥

इनुर्विशाद्रुवेणिभ्यो णः ॥ २. २. १२२ ॥

वीणास्थूणाहूणभ्रूणक्षूणतूणतृणघृणादयः ॥ २. २. १२३ ॥

अङ्गितङ्गिकङ्गिमङ्गिकृपिवृपिभ्योऽणक् ॥ २. २. १२४ ॥

धृषेर्धिष च ॥ २. २. १२५ ॥

कृकणकुङ्कणतृवणोल्बणोरणवङ्कणविचक्षणादयः ॥ २. २. १२६ ॥

कृपिविषिभ्यामाणक् ॥ २. २. १२७ ॥

पाषाणपर्याणकल्याणादयः ॥ २. २. १२८ ॥

गादिभ्यामेष्णक् ॥ २. २. १२९ ॥

हसिवसीणूजृगृमृवादिभ्यमित्वपूधूर्विभ्यस्तन् ॥ २. २. १३० ॥

तनिमूङ्भूहिभ्यः कित् ॥ २. २. १३१ ॥

हुङ्र्छेर्मुट् च ॥ २. २. १३२ ॥

घृसिलूसूदूचितिभ्यः क्तः ॥ २. २. १३३ ॥

तातन्नातालातसुतपुतपित्तनिमित्तमुस्तपुस्ततूस्तवितस्तादयः ॥ २. २. १३४ ॥

भृदृशिवलियजादिभ्योऽतच् ॥ २. २. १३५ ॥

पृषिरञ्जिसिकिभ्यः कित् ॥ २. २. १३६ ॥

कृविलिभ्यामातच् ॥ २. २ १३७ ॥

जृविशिवहिवंसिभूजिरेवसाधिभासिगडिमडिनन्दिभ्योऽन्तच् ॥ २. २. १३८ ॥

१. A. दाण्ड.

२. A omits तृण

३. A adds
पिषेरल्लोपश्चायाः ॥
पराद्विणो लोपश्च ॥
कल्लेर्लुक् च ॥

४. A इङ्र्छेमुट् च

५. A. वित्त

६. A. वपि

हिदुषोर्मुकूषुकौ च ॥ २. २. १३९ ॥
रुहिजीविभ्यां षित् ॥ २. २. १४० ॥
पलिरुहिभ्वाहभ्य इतन् ॥ २. २. १४१ ॥
नञ्यापेः ॥ २. २. १४२ ॥
उचिकुसिपिशिपृषिभ्यः कित् ॥ २. २. १४३ ॥
हृञ ईतन् ॥ २. २. १४४ ॥
अदि भुवो डुतच् ॥ २. २. १४५ ॥
शकेरुन्तः ॥ २. २. १४६ ॥
कषेर्डित् ॥ २. २. १४७ ॥
कुलिमथिभ्यामूतक् ॥ २. २. १४८ ॥
कम्पेरोतो नलोपश्च ॥ २. २. १४९ ॥
आङि स्फायेर्डित् ॥ २. २. १५० ॥
नीरमिकुषकाषिभ्यः कथन् ॥ २. २. १५१ ॥
अवे भृञः ॥ २. २. १५२ ॥
उषिकुषिकमिगार्तिभ्यस्थन् ॥ २. २. १५३ ॥
सर्तेर्णित् ॥ २. २. १५४ ॥
पातृतुदिवचिरिचिसिचिविषिभ्यस्थक् ॥ २. २. १५५ ॥
संनिन्युद्रोष्विणर्तिशीङ्गापाभ्यः ॥ २. २. १५६ ॥
गूथयूथप्रोथपृष्ठादयः ॥ २. २. १५७ ॥
शीङ्शपिशमिगमिवन्दिबन्धिजीविप्राण्युपसृष्टवसिभ्योऽथः ॥ २. २. १५८ ॥
भृञश्चित् ॥ २. २. १५९ ॥
विदः कित् ॥ २. २. १६० ॥
रुवो वा ॥ २. २. १६१ ॥
जृवृभ्यामूथन् ॥ २. २. १६२ ॥
शपेर्दन् ॥ २. २. १६३ ॥
आपो हस्वश्च ॥ २. २. १६४ ॥
गुवः कित् ॥ २. २. १६५ ॥
वृतुसुकुभ्यो नुं च ॥ २. २. १६६ ॥
ककिमकिभ्यामन्दन् ॥ २. २. १६७ ॥

१. A. मदः

अलिपुलिकलिभ्यः किन्दन् ॥ २. २. १६८ ॥

मुचेर्ईकुन्दकुकुन्दौ ॥ २. २. १६९ ॥

यमेरुन्दन् ॥ २. २. १७० ॥

ककेरुदन् णिच्च वा २. २. १७१ ॥

अर्तिबुदोर्षुक् च ॥ २. २. १७२ ॥

स्कन्द्यमिभ्यां धः ॥ २. २. १७३ ॥

कुवोऽन्धच् ॥ २. २. १७४ ॥

नौ स्यतेरधक् ॥ २. २. १७५ ॥

मङ्क्नेर्नलोपश्च ॥ २. २. १७६ ॥

इषेरुधंक् ॥ २. २. १७७ ॥

धापॄवस्यज्यतिसिविभ्यो नः ॥ २. २. १७८ ॥

उषिशुषिकृषीणृजिमीङ्बुधिभ्यः कित् ॥ २. २. १७९ ॥

ब्रधेर्रं च ॥ २. २. १८० ॥

सुवो दीर्घश्च ॥ २. २. १८१ ॥

कृवृतृस्यनिभ्यो नित् ॥ २. २. १८२ ॥

रमेस्त च ॥ २. २. १८३ ॥

रास्नामाम्नासुम्नद्युम्ननिम्नशिश्नकृत्स्नाक्ष्णश्नक्ष्णामीक्ष्णतीक्ष्णस्तेनफेनश्येनज्यौत्ना-दयः ॥ २ २. १८४ ॥

श्रुयुरुवृज्यसिरसिरुचिरुहिभ्यो युँच् ॥ २. २. १८५ ॥

अशे रश च ॥ २. २. १८६ ॥

उन्देर्नलोपश्च ॥ २. २. १८७ ॥

रञ्जेर्युन् ॥ २. २. १८८ ॥

भुवः किद्वा ॥ २. २. १८९ ॥

कृपॄव्रजिनिधाञ्भ्यः क्युः ॥ २. २. १९० ॥

हनो जघ च ॥ २. २. १९१ ॥

मन्मनगहनगृञ्जनादयः ॥ २. २ १९२ ॥

हेञविभ्यामिनच् ॥ २ २. १९३ ॥

१. A. धुक्
२. A. इमिशुषिणिमीङ्
३. A. जृपृ
४. A. युक् च
५ A. भृञ्भ्यो मिन च

वृजिनाजिनकठिनादयः ॥ २. २. १९४ ॥
द्रुदक्षिभ्यामिनन् ॥ २. २. १९५ ॥
विपिनेरिणतुहिनमहिनादयः ॥ २. २. १९६ ॥
खलेरीनच् ॥ २. २ १९७ ॥
पठेर्णित् ॥ २. २. १९८ ॥
अर्त्यजिकृवृतृधृदारियमिभ्य उनन् ॥ २. २. १९९ ॥
लषेः श च ॥ २. २ २०० ॥
पिशिमिथिभ्यां कित् ॥ २. २. २०१ ॥
फलेर्गुक् च ॥ २. २. २०२ ॥
अजेस्तृणे चित् ॥ २. २. २०३ ॥
शकेरुनः ॥ २. २. २०४ ॥
वीपतिभ्यां तनन् ॥ २ २. २०५ ॥
पृपूभ्यां कित् ॥ २. २. २०६ ॥
अलितलिशीङ्सृपाभ्यः पः ॥ २. २. २०७ ॥
कृशृकृसुस्तुयुरूणां पक्ष च ॥ २. २. २०८ ॥
बाष्पशष्पनिबोष्पशिलपश्चुपनीपचम्पाशम्पादयः ॥ २. २. २०९ ॥
उषिकुषिकुटिदलिकुलिखजिभ्यः कपन् ॥ २. २. २१० ॥
सर्तेरपषुक् च ॥ २. २. २११ ॥
विटपविष्टपोलपकुणपकुतपचातपशिंशपादयः ॥ २. २. २१२ ॥
विशेरिपक् ॥ २. २. २१३ ॥
दलेरीपः दिल् च ॥ २. २. २१४ ॥
आडेरुपगुणोपधायाः ॥ २. २. २१५ ॥
अशेरूपच् पश्च ॥ २. २. २१६ ॥
गुरेः फग्लश्च ॥ २. २. २१७ ॥
शिफाशफकफादयः ॥ २. २ २१८ ॥

१. A. व्रजिनाकठि-
२. A. मनिक्
३. A. अलिबिकृवृ
४. A omits सू
५. A. शृक्
६. A. सर्तेरषु फुक्
७ A. आरुप

नितमिशमिभ्यां बः ॥ २ २. २१९ ॥

अमेर्णिद्वा ॥ २. २. २२० ॥

अलशलोरत उच्च ॥ २. २. २२१ ॥

निम्बबिम्बडिम्बहिडिम्बस्तम्बसाम्बादयः ॥ २. २. २२२ ॥

कृकदिकडिभ्योऽम्बच् ॥ २. २. २२३ ॥

कंदेर्णित् पक्षिणि ॥ २. २. २२४ ॥

निकुरिकुटिभ्यामुम्बक् ॥ २. २. २२५ ॥

हृदलिभ्यां भः ॥ २. २. २२६ ॥

गिरो भन् ॥ २. २. २२७ ॥

इणः कित् ॥ २. २. २२८ ॥

कृशृवलिवल्लिरासिगर्दिभ्योऽभच् ॥ २. २. २२९ ॥

सनेर्डित् ॥ २. २. २३० ॥

ऋपिवृषिभ्यां कित् ॥ २. २. २३१ ॥

कृञोऽम्भच् ॥ २. २. २३२ ॥

सेरिभ्रट् च ॥ २. २. २३३ ॥

टिकेष्टुट् च ॥ २. २. २३४ ॥

ककेरुभः ॥ २. २. २३५ ॥

कुकेः कुक् च ॥ २. २. २३६ ॥

दमेर्दो डुण्डुक् च ॥ २. २. २३७ ॥

कंक उम्भक् ॥ २. २. २३८ ॥

कसेरुच्चातः ॥ २. २. २३९ ॥

अर्तीरिस्तुसुहुधृक्षियक्षिव्याभायापदिशूनीभ्यो मन् ॥ २. २. २४० ॥

प्रसेरा च ॥ २. २. २४१ ॥

स्यविसिविशुषिश्रुभ्यः कित् ॥ २. २. २४२ ॥

गुलिविलिभिलिसिधीन्धिधूञ्श्याहिरुभ्यो मक् ॥ २. २. २४३ ॥

तिजियुजिरुचाम् कु च ॥ २. २. २४४ ॥

१. A. कृकटिकडिभ्योऽम्ब

२. A. कदर्णुक् ॥

३. A. भद्रुश्च.

४. A. कम

५. A. स्तुभद्राक्षि-

६. A omits भिलि.

अवतेर्ह्वस्वश्च ॥ २. २. २४५ ॥
भियः षुग्वा ॥ २. २. २४६ ॥
श्रीष्मघर्मकूर्मसूर्मसुह्मजालमादयः ॥ २. २. २४७ ॥
प्रथिचरिकलिकर्दिपृभ्योऽमच् ॥ २. २. २४८ ॥
अवेर्धश्च वा ॥ २. २. २४९ ॥
दाणो डिमच् ॥ २. २. २५० ॥
डिमेः कित् ॥ २. २. २५१ ॥
कुथेरुमक् ॥ २. २. २५२ ॥
कसेरुञ्चातः ॥ २. २. २५३ ॥
कुदकुकोर्नुं च ॥ २. २. २५४ ॥
गुधेरूमः ॥ २. २. २५५ ॥

इति श्रीसरस्वतीकण्ठाभरणनाम्नि व्याकरणे
द्वितीयाध्यायस्य द्वितीयः पादः
समाप्तः.

तृतीयः पादः

माच्छासाशलिकलिवलिससिसविकनिमनिबन्धिभ्यो यः ॥ २. ३. १ ॥

सञ्ज्ञेर्धश्च ॥ २. ३. २ ॥

जनिजापुणिकृतिभ्यः क्यप् ॥ २. ३. ३ ॥

मध्यविन्ध्यशिक्यान्यपर्जन्यवदान्याध्न्याहर्म्यधिष्ण्यवस्त्यागस्त्यपुलस्त्यापत्य-सत्यकुड्यकुल्याहल्यादयः ॥ २. ३. ४ ॥

तनिमलिवलिभ्योऽयन् ॥ २. ३. ५ ॥

हृञो दुक् किच्च ॥ २. ३. ६ ॥

किसलयगयगवयमुकयकेकयादयः ॥ २. ३. ७ ॥

कषिकुलिलुलिकलिभ्य आयक् ॥ २. ३. ८ ॥

श्रुदक्षिस्पृहिभ्य आय्यः २. ३. ९ ॥

दद्घ्नि सुञो डित् ॥ २. ३. १०. ॥

कौतेरियः ॥ २. ३. ११ ॥

कृञः कित् ॥ २. ३. १२ ॥

मृजेर्ञालीयर् ॥ २. ३. १३ ॥

वियस्तुट् च ॥ २. ३. १४ ॥

मदेः स्यन् ॥ २. ३. १५ ॥

रुचिभुजिभ्यामिक् च ॥ २. ३. १६ ॥

वचेरध्यक् तश्च ॥ २. ३. १७ ॥

वृङ एन्यः ॥ २. ३. १८ ॥

अर्तेरन्यत् ॥ २. ३. १९ ॥

हृञ इच्च ॥ २. ३. २० ॥

स्फायितञ्चिवञ्चिशकिरिपिक्षिपिक्षुदिसृपितृपिवन्धुन्दिश्वितिवृत्यजिनीपदिम-दिमुदिरुदिछिदिभन्दिमन्दिचन्दिदासिदाहिहसिघासिदाभिवसिशुचिशुभि-भ्यो रक् ॥ २. ३. २१ ॥

१. A. जन्यपुणि
२. A. श्रुक्षि
३. A. मृशेलीयत्
४. A. रिचि

चकिरम्योरुच्चोपधायाः ॥ २. ३. २२ ॥

वौ कसेः ॥ २. ३. २३ ॥

शदेरगतौ च ॥ २. ३. २४ ॥

स्थश्च ॥ २. ३. २५ ॥

तम्यम्यर्दिजीनां दीर्घश्च ॥ २. ३. २६ ॥

दुरीणो लोपश्च ॥ २. ३. २७ ॥

कृतेः कूच्छौ च ॥ २. ३. २८ ॥

वृधिरुधिवपीन्दिवज्यैगिभीणूभ्यो रन् ॥ २. ३. २९ ॥

अन्ध्ररन्ध्रसिलिन्ध्रोढ्रपुण्ड्रतीव्रनीव्रशीघ्रोग्रगौरेराभद्रसान्द्रगुन्द्रादयः॥२. ३. ३०॥

सुसूधागृधिभ्यः कन् ॥ २. ३. ३१ ॥

शुसिचिमिभ्यो दीर्घश्च ॥ २. ३. ३२ ॥

वाविन्धेः ॥ २. ३. ३३ ॥

ऋच्छेररः ॥ २. ३. ३४ ॥

कगघजझदबभमभ्यः सधात्वादिष्टित् ॥ २. ३. ३५ ॥
ɛ ɛ ɛ ɛ ɛ ɛ ɛ ɛ

मुदेर्गुक् च ॥ २. ३. ३६ ॥

गुरेर्जक् च ॥ २. ३. ३७ ॥

सुन्दिकन्दिमन्दिमन्थिमञ्जिपञ्जिपिञ्जभ्रमिचमिचटिवठिमठिदेविवासिकास्यर्ति - कुटिकविशिविदविफदिबदिभ्यो नित् ॥ २. ३. ३८ ॥

जठरपिठरकुररक्रकरमकरशिखरशेखरोदरडहरकुहरकूर्परकर्परशफरडमरडामरपामरसागरतोमराजगरादयः ॥ २. ३. ३९ ॥

अग्यङ्क्रिमन्दिमदिकडिकासिभ्य आरन् ॥ २. ३. ४० ॥

किञ्जिमृजिभ्यां चित् ॥ २. ३ ४१ ॥

कृञो मुट् च ॥ २. ३. ४२ ॥

तुषिकुठिभ्यां किच्च ॥ २. ३. ४३ ॥

कमेरत उच्च ॥ २. ३. ४४ ॥

शृङ्गारभृङ्गारकल्हारकान्तारकेदारकोविदारकर्बुदारकाञ्चनारादयः ॥ २. ३. ४५ ॥

१. A. रुच्
२. A. वज्यवर्गि.
३. A. न्ध्र
४. A. चिभ्यां
५. A. मुक्
६. A. कठि

इषिरुचिरुधिनिमिमिहिमादिचन्दिचन्दिखन्दिबाधिभ्यः किरच् ॥ २ ३. ४६ ॥

स्थिरस्फिराजिरशिशिरशिथिरस्थविरकविराशिरशिबिरसरिरादयः ॥२.३.४७.॥

कशशोडीमञ्जिकुटिपटिपूङ्भ्य ईरच् ॥ २. ३. ४८ ॥

वशिघसिकुरिकुलिभ्यः कित् ॥ २. ३. ४९ ॥

डिण्डीरवानीराभीरगभीरगम्भीरकुम्भीरकश्मीरकीरजम्बीरकिम्भीरादयः ॥ २. ३. ५० ॥

कुबिमदिवासिमसिचतिचङ्कथकिभ्य उरच् ॥ २. ३. ५१ ॥

मुर्मुरमुकुरदर्दुरचिकुरकुक्कुरकुकुरकुकुन्दुरोन्दुरनूपुरविथुरमद्गुरवागुरादयः ॥ २. ३. ५२. ॥

असेरुरन् ॥ २. ३. ५३ ॥

शावशेरसौ ॥ २. ३. ५४ ॥

मसेरूरन् ॥ २. ३. ५५ ॥

कृञश्चुक् च २. ३. ५६ ॥

खर्जिखडिकृपिवल्लिमयिमण्डिभ्य ऊरः ॥ २. ३. ५७ ॥

तलिमलिशलिभ्यो णित् ॥ २. ३. ५८ ॥

विडूरसिन्दूरपत्तूरधुस्तूरादयः ॥ २. ३. ५९ ॥

पतिकठिकुठिकुबिगविगुविदंशिभ्य एरक् ॥ २. ३. ६० ॥

सतेरमूलेरमुदेरादयः ॥ २. ३. ६१ ॥

कठिनकिभ्यामोरः ॥ २. ३. ६२ ॥

कशेरत इच्च ॥ २. ३. ६३ ॥

शृवृकिभ्यः करन् ॥ २. ३. ६४ ॥

सूपुषिभ्यां कित् ॥ २. ३. ६५ ॥

अनिकाभ्यां तरच् ॥ २. ३. ६६ ॥

इणूपूभ्यां कित् ॥ २. ३. ६७ ॥

कॅयजिमामद्यशूभ्यः सरन् ॥ २. ३. ६८ ॥

१. A omits खदि

२. A. कर्विमन्दि

३. A omits मुर्मुर . कुक्कुर

४. A. धुर्धूरादयः

५. A. कुगडिदंशि

६. A. किरन्

७. A. कविमस्जि-

वंसेश्च ॥ २. ३. ६९ ॥

सपूर्वाच्चित् ॥ २. ३. ७० ॥

इडावत्सरः ॥ २. ३. ७१ ॥

ऋषितनिकृधूकिभ्यः कित् ॥ २. ३. ७२ ॥

कृशृगृचतिकंडिभ्यः ष्वरच् ॥ २. ३. ७३ ॥

छित्वरछत्वरधीवरपीवरचीवरगह्वरोपह्वरसंयद्वरनिषद्वरोदुम्बरकूबरतूबरादयः ॥ २. ३. ७४ ॥

कलेरेबरः ॥ २. ३. ७५ ॥

ष्टून् ॥ २. ३. ७६ ॥

भ्रस्जिगमिनमिनशिहनिविष्यंशां वृद्धिश्च ॥ २. ३. ७७ ॥

दिवेद्यौ च ॥ २. ३. ७८ ॥

उषिखनिसूमूभ्यः कित् ॥ २. ३. ७९ ॥

स्त्यायेर्डित् ॥ २ ३. ८० ॥

द्रुयामाश्रुलुपिवसिभ्यस्त्रन् ॥ २. ३. ८१ ॥

गमेरा च ॥ २. ३. ८२ ॥

अमिचिमिदिशंसिभ्यः कित् ॥ २. ३. ८३ ॥

पूङो ह्रस्वश्च ॥ २. ३. ८४ ॥

गुवृवीपचिवचियमिमनितनिसदिक्षदिक्षिभ्यो नित् ॥ २. ३. ८५ ॥

अमियजिवधिपतिकलिनक्षिभ्योऽत्रन् ॥ २. ३. ८६ ॥

वृञश्चित् ॥ २. ३ ८७ ॥

अशिवहिकटिभ्य इत्रः ॥ २. ३. ८८ ॥

श्रांदिभ्य उत्रः ॥ २. ३. ८९ ॥

स्याशक्यमिभ्यो लः ॥ २. ३. ९० ॥

शीङः क्रुन् ॥ २. ३. ९१ ॥

१. A. वदेश्च
२. कुटि
३. A omits कूबर.
४. A omits this sūtra.
५. A. This is written as part of २. ३. ७४.
६. A. विश्यसां
७. A omits this and the following three sūtras.
८ A omits क्षदि
९. A. कुटि
१०. A omits this sūtra.

भिल्लाच्छभल्लसौविदल्लादयः ॥ २. ३. ९२ ॥

मङ्किमृदिमण्डिकुण्डिकान्दिभ्योऽलच् ॥ २. ३. ९३ ॥

लङ्केर्दीर्घश्च ॥ २. ३. ९४ ॥

ऋजनोर्गुक् च ॥ २. ३. ९५ ॥

कुकमियमिशमिशकिशाबितृपिकुविशलिकलिपालिभ्योऽलक् ॥ २. ३. ९६ ॥

वृषिपटिदेविकेविवपिचपिभ्यश्चित् ॥ २. ३. ९७ ॥

कुगुध्वञ्चिचञ्चिवहिदिहितृसृकुसिभ्यो लः ॥ २. ३. ९८ ॥

मुरलोरलमुसलकुशलकोमलकोहलविरलकेरलकुन्तलकपिञ्जलकज्जलेज्जलच्छ-
गलभगलाहलकहलकाहलनाहलानलयुगलपिप्पलादयः ॥ २. ३. ९९ ॥

ऋकृमृवृचषिभ्य आलच् ॥ २. ३. १०० ॥

तमिविडिमृणिकुणिकुलिपलिपाश्चिवाड्भ्यः कालन् ॥ २. ३. १०१ ॥

कम्पेर्नलोपश्च ॥ २. ३. १०२ ॥

भञ्जेर्गश्च ॥ २. ३. १०३ ॥

सर्तेर्गुक् च ॥ २. ३. १०४ ॥

स्थालचात्वालकीलालकङ्कालहिन्तालवेतालजम्बालादयः ॥ २. ३. १०५ ॥

पतिचण्डिभ्यामालञ् ॥ २. ३. १०६ ॥

कुटिमहिमिथ्यनिभ्यः किलच् ॥ २. ३. १०७ ॥

भडिलभण्डिलशाण्डिलस्थण्डिलकोकिलकपिलविचकिलादयः ॥ २. ३. १०८ ॥

हृषिवृतिचटितण्डिशाकिशङ्कयुत्कण्ठिभ्य उलच् ॥ २. ३. १०९ ॥

निचुलवञ्जुलवकुलतुमुलपृथुलस्थूलविसंस्थुलादयः ॥ २. ३. ११० ॥

पिञ्ज ऊलच् ॥ २. ३. १११ ॥

कुसूलकुकूलदुकूलताम्बूलबलूलाङ्गूलशार्दूलादयः ॥ २. ३. ११२ ॥

महेरेलच् ॥ २. ३. ११३ ॥

कटिपटिभ्यामोलः ॥ २. ३. ११४ ॥

कपोलकल्लोलकक्कोलमक्कोलादयः ॥ २. ३. ११५ ॥

वलेः कलच् ॥ २. ३. ११६ ॥

१. A omits शवि
२. A omits कुवि
३. A omits पलि
४. A. चमि
५. A adds कुहि
६. A. जङ्गाल
७. A omits शकि

मिश्रः खलश्चैच्च ॥ २. ३. ११७ ॥
श्रो नुं ह्रस्वश्च ॥ २. ३. ११८ ॥
शमिकमिभ्यां बलच् ॥ २ ३. ११९ ॥
डुकुटिकशिशालिभ्यः क्मलच् ॥ २. ३. १२० ॥
वतेः सलक् ॥ २. ३. १२१ ॥
शीङो वलञ्[1]वलनौ ॥ २. ३. १२२ ॥
तुल्वलेल्वलपल्वलादयः ॥ २. ३. १२३ ॥
शृसृहसिभ्यो वः ॥ २. ३. १२४ ॥
उर्देर्धश्च ॥ २. ३. १२५ ॥
गन्धेररक् च ॥ २. ३. १२६ ॥
इण्शीङ्श्याशालापदिभ्यो नित् ॥ २. ३. १२७ ॥
इष्वनिघृष्वरिष्वालिष्वादयः ॥ २. ३. १२८ ॥
अशूस्रुप्रुषिलटिखटिर्कणिविलिनालिशालिखालिभ्यः कन् ॥ २. ३. १२९ ॥
शीङापो ह्रस्वश्च ॥ २. ३. १३० ॥
यसेर्ह च ॥ २. ३. १३१ ॥
लिहेर्जिह च ॥ २. ३. १३२ ॥
नञि भुवो डित् ॥ २. ३. १३३ ॥
कुडिकितिपणिपेलृपल्लिवल्लिमालिभ्योऽवक् ॥ २. ३. १३४ ॥
कैरवभैरवकैरण्डवादीनवादयः ॥ २. ३. १३५ ॥
शृणोतेरावः ॥ २. ३. १३६ ॥
प्रथेः षिवन् पृथ[2] च ॥ २. ३. १३७ ॥
अमेरीवः ॥ २. ३. १३८ ॥
प्रसेर्डित् ॥ २. ३. १३९ ॥
कुदापाभ्यः शः ॥ २. ३. १४० ॥
वृभृवम्यमिकुभ्यः शक् ॥ २. ३. १४१ ॥
कलेरशच् ॥ २. ३. १४२ ॥
इणस्तुट् च ॥ २. ३. १४३ ॥

१. A. खलच
२. A. वालनौ
३. A. खणिवशिब्लिनलि
४. A. This portion is written as a separate sūtra.

पलेराशन् ॥ २. ३. १४४ ॥

कनेरी चातः ॥ २. ३. १४५ ॥

कणिकुलिवलिबलिभ्यः किशच्[1] ॥ २. ३. १४६ ॥

तिनिशेतिशबालिशादयः ॥ २. ३. १४७ ॥

अर्तेः पिशन् ॥ २. ३. १४८ ॥

अङ्किमस्जिभ्यामुशच् ॥ २. ३. १४९ ॥

युमाभ्यां षः ॥ २. ३. १५० ॥

स्नुमूभ्यां कित् ॥ २. ३. १५१ ॥

कलेर्मषक् ॥ २. ३. १५२ ॥

कुलेश्च माषक् ॥ २. ३. १५३ ॥

जलेराषः ॥ २. ३. १५४ ॥

अविमह्योष्टिषच् ॥ २. ३. १५५ ॥

रुहेर्वृद्धिश्च ॥ २. ३. १५६ ॥

तवेर्णिद्वा ॥ २. ३. १५७ ॥

नञि व्यथेः ॥ २. ३. १५८ ॥

कलेर्वुगिच्चोपधायाः ॥ २. ३. १५९ ॥

कृतृभ्यामीषन् ॥ २. ३. १६० ॥

ऋजिशृपृभ्यः कित् ॥ २. ३. १६१ ॥

उषेर्नक् लोपश्च ॥ २. ३. १६२ ॥

अमेर्वरट् च ॥ २. ३. १६३ ॥

ऋपृकृपिहपिनहिकलिभ्य उषन् ॥ २. ३. १६४ ॥

पुरः किच्च ॥ २. ३. १६५ ॥

जृपृकृमञ्जिपीयिहन्यङ्गिगण्डिभ्य ऊषन् ॥ २. ३. १६६ ॥

यूषशूषार्कलूषकारूषकोरदूषाटरूषशैलूषादयः ॥ २. ३. १६७ ॥

कश्यशिपचिमुचियजिहनिकमिवदिवामान्याभ्यः सः ॥ २. ३. १६८ ॥

प्लुषेरच्चोपधायाः ॥ २. ३. १६९ ॥

१. A. किशप्

२. A omits this sūtra.

३. A omits this and the following three sūtras.

४. A. मस्जिशिपचिमुचियजि

ऋचिरि[1]षिकृतिवृश्चिशृगृदिभ्यः कित् ॥ २. ३. १७० ॥

अमेर्नित् ॥ २. ३. १७१ ॥

उन्देर्नलोपश्च ॥ २. ३. १७२ ॥

पन्यल्यवंरन्धिरभिचमिचत्यतितमियुभ्योऽसच् ॥ २. ३. १७३ ॥

वेतसतामरससारसादयः ॥ २. ३. १७४ ॥

पॅण्डो नसक् ॥ २. ३. १७५ ॥

कृपियुवलिभ्य आसः ॥ २. ३. १७६ ॥

किलेः कित् ॥ २. ३. १७७ ॥

कुरः पासः ॥ २. ३. १७८ ॥

पटिवीभ्यां टिसडिसचौ ॥ २. ३. १७९ ॥

तालेरीसच् ॥ २. ३. १८० ॥

त्रपेरुसच् ॥ २. ३. १८१ ॥

अलेरम्बुसः २. ३. १८२ ॥

लूञो हः ॥ २. ३. १८३ ॥

हिंसेः कित् सिं च ॥ २. ३. १८४ ॥

कलेरहः ॥ २. ३. १८५ ॥

अनेरोकहः ॥ २. ३. १८६ ॥

कटेराहः ॥ २. ३. १८७ ॥

निरिण ऊहक् ॥ २. ३. १८८ ॥

देस्त्यूहः ॥ २. ३. १८९ ॥

वलेरक्षन् ॥ २. ३. १९० ॥

लाक्षाद्राक्षामिक्षादयः ॥ २. ३. १९१ ॥

इति श्रीसरस्वतीकण्ठाभरणनाम्नि व्याकरणे
द्वितीयाध्यायस्य तृतीयः पादः
समाप्तः.

---

१. A omits रिषि
२. A. अञे
३. A. विरधि
४. A wrongly adds a number of sūtras belonging to the next pāda.
५. A. सुञो
६. A. तदेरूहः

अथ चतुर्थः पादः

उणादयो भूतेऽपि[1] ॥ २. ४. १ ॥
भविष्यति गम्यादयः ॥ २. ४. २ ॥
यावत्पुरानिपातयोर्लट् ॥ २. ४. ३ ॥
कथाकर्ह्योर्वा ॥ २. ४. ४ ॥
किंवृत्ते लिप्सायाम् ॥ २. ४. ५ ॥
लिप्स्यमानसिद्धौ च ॥ २. ४. ६ ॥
लोडर्थलक्षणे च ॥ २. ४. ७ ॥
लिङ् चोर्ध्वमौहूर्तिके[2] ॥ २. ४. ८ ॥
माङि लुङ् ॥ २. ४. ९ ॥
स्मपरे लङ् च ॥ २. ४. १० ॥
अनद्यतने लुट्[3] ॥ २. ४. ११ ॥
परिदेवने च ॥ २. ४. १२ ॥
न व्यामिश्रे ॥ २. ४. १३ ॥
लृट् ॥ २. ४. १४ ॥
शतृशानचौ वास्य लङ्वत् ॥ २. ४. १५ ॥
क्रियायां च क्रियार्थायाम् ॥ २. ४. १६ ॥
ण्वुल् च ॥ २. ४. १७ ॥
कर्मणि चाण् ॥ २. ४. १८ ॥
भावे तुमुन्[5] ॥ २. ४. १९ ॥
भाववचनाश्च ॥ २. ४. २० ॥
घञ् ॥ २. ४. २१ ॥

१. A omits अपि and reads next sūtra along with this.
२. A omits this sūtra.
३. A. This sūtra is read after the next.
४. A. चक्रियायाम्
५. A. तुमुन् भावे The two words are written as two different sūtras.

पदरुजविशिभ्यः कर्तरि ॥ २. ४. २२ ॥

स्पृशेरुपतापे ॥ २. ४. २३ ॥

दृजभ्यां[1] णिलुक् च ॥ २. ४. २४ ॥

सर्तेः स्थिरव्याधिबलमत्स्येषु ॥ २. ४. २५ ॥

अकर्तरि कारके च संज्ञायाम् ॥ २. ४. २६ ॥

संख्यातात्परिमाणाख्यायाम् ॥ २. ४. २७ ॥

इङश्च ॥ २. ४. २८ ॥

अपादाने षिद्वा ॥ २. ४. २९ ॥

शृणोतेर्वायुवर्णनिवृतावरणेषु ॥ २. ४. ३० ॥

युजेः कालहलाङ्गयुग्मेषु कित्[2] ॥ २. ४. ३१ ॥

उपसर्गे युवः[3] ॥ २. ४. ३२ ॥

वौ क्षुश्रुवः[4] ॥ २. ४. ३३ ॥

यमियुदुद्रुषः[5] ॥ २. ४. ३४ ॥

अनुपसर्गाद्वा ॥ २. ४. ३५ ॥

व्यनुप्रेषु च भुवः ॥ २. ४. ३६ ॥

उदि च नियः ॥ २. ४. ३७ ॥

अवेः ॥ २. ४. ३८ ॥

परौ द्यूते ॥ २. ४. ३९ ॥

प्रे द्रुस्तुभ्याम् ॥ २. ४. ४० ॥

स्रुवोऽनुपसर्गाच्च[6] ॥ २. ४. ४१ ॥

श्रियः[7] ॥ २. ४. ४२ ॥

उदि वा ॥ २. ४. ४३ ॥

निरभ्योः पूल्वभ्याम्[8] ॥ २. ४. ४४ ॥

१. A. जृदृणिभ्यां

२. A omits कित्.

३. A. रुवः

४. A. क्ष

५. A. समि.

६. A. This and the next sūtra are written together.

७. A. स्तुवो

८. A. This and the next sūtra are written together.

उन्मोर्ग्रः ॥ २. ४. ४५ ॥
किरो धान्ये ॥ २. ४. ४६ ॥
नौ वृञः ॥ २. ४. ४७ ॥
यज्ञे समि स्तुवः ॥ २. ४. ४८ ॥
प्रेस्तोऽन्यत्र ॥ २. ४. ४९ ॥
प्रथने वावशब्दे ॥ २. ४. ५० ॥
छन्दो नाम्नि च ॥ २. ४. ५१ ॥
अवे च ॥ २. ४. ५२ ॥
श्रो वा ॥ २. ४. ५३ ॥
इणो नावज्ञेषे ॥ २. ४. ५४ ॥
परावनुपात्यये ॥ २. ४. ४५ ॥
ण्युपयोः शीङः ॥ २. ४. ५६ ॥
प्रत्यासत्तौ चेरस्तेये ॥ २. ४. ५७ ॥
शरीरनिवासयोः कैश्चादेः ॥ २. ४. ५८ ॥
चितौ च ॥ २. ४. ५९ ॥
सङ्घे चानौत्तराधर्ये ॥ २. ४. ६० ॥
उदि युपूद्रुवः ॥ २. ४. ६१ ॥
ग्रहश्च ॥ २ ४. ६२ ॥
न्यवयोराक्रोशे ॥ २. ४. ६३ ॥
समि मुष्टौ ॥ २. ४. ६४ ॥
परौ यज्ञे ॥ २. ४. ६५ ॥
प्रे लिप्सायाम् ॥ २. ४. ६६ ॥
वा प्रे वणिजाम् ॥ २. ४. ६७ ॥
रश्मौ च ॥ २. ४. ६८ ॥
अवे वर्षप्रतिबन्धे ॥ २. ४. ६९ ॥
आङि रुप्लुभ्याम् ॥ २. ४. ७० ॥

१. A. This and the next sūtra are written together.
२. A. This part is written as a separate sūtra.
३. A. उञि
४. A omits sūtras ६२—१३०.

परौ भुवोऽवज्ञाने ॥ २. ४. ७१ ॥
वृणोतेराच्छादने ॥ २. ४. ७२ ॥
क्रियाभ्यावृत्तिसमयसमूहेषु च ॥ २. ४. ७३ ॥
स्थाम्नाप्राव्यधिहनियुधादिभ्यः कः ॥ २. ४. ७४ ॥
एरच् ॥ २. ४. ७५ ॥
नपुंसके भीवृष्यादिभ्यः ॥ २. ४. ७६ ॥
ऋदोरप् ॥ २. ४. ७७ ॥
वृद्यवशिनिश्चरणिगमिग्रहः ॥ २. ४. ७८ ॥
अक्षेषु ग्लहः ॥ २. ४. ७९ ॥
अदेरुपसर्गे ॥ २. ४. ८० ॥
नौ ण च ॥ २. ४. ८१ ॥
व्यधिजपिभ्यामनुपसर्गे ॥ २. ४. ८२ ॥
स्वनिहसिभ्यां वा ॥ २. ४. ८३ ॥
यमे समुपनिविषु च ॥ २. ४. ८४ ॥
नौ गदनदपठस्वनिभ्यः ॥ २. ४. ८५ ॥
कणोऽनुपसर्गाच्च ॥ २. ४. ८६ ॥
उपसर्गे च वीणायाः ॥ २. ४. ८७ ॥
नित्यं पणः परिमाणे ॥ २. ४. ८८ ॥
मदोऽनुपसर्गात् ॥ २. ४. ८९ ॥
प्रसमो हर्षे ॥ २. ४. ९० ॥
समुदो रजः पशुषु ॥ २. ४. ९१ ॥
प्रजने सर्तेः ॥ २. ४. ९२ ॥
न्यभ्युपविषु ह्वः संप्रसारणं च ॥ २. ४. ९३ ॥
आङि युद्धे ॥ २. ४. ९४ ॥
निपाने वृद्धिश्च ॥ २. ४. ९५ ॥
नाम्न्ययक् च ॥ २. ४. ९६ ॥
समि च द्यूते ॥ २. ४. ९७ ॥
भावेऽनुपसर्गस्य ॥ २. ४. ९८ ॥
हनो वा वध च ॥ २. ४. ९९ ॥

मूर्तिर्निरन्तरमेघेषु घनः ॥ २. ४. १०० ॥

अन्तर्धानोऽन्तर्धणश्च देशे ॥ २. ४. १०१ ॥

प्रघणः प्रघाणश्चागारैकदेशे ॥ २. ४. १०२ ॥

अपघनोद्धनावबङ्गास्याधानयोः ॥ २. ४. १०३ ॥

विघनायोघनौ करणे ॥ २. ४. १०४ ॥

द्रुघणद्रुघनौ च ॥ २. ४. १०५ ॥

स्तम्बे क च ॥ २. ४. १०६ ॥

उपघ्न आश्रये ॥ २. ४. १०७ ॥

परौ डित् ॥ २. ४. १०८ ॥

समुदोर्गणप्रशंसयोः ॥ २. ४. १०९ ॥

नौ निमिते ॥ २. ४. ११० ॥

ङितः क्त्रिः ॥ २. ४. १११ ॥

ट्वितोऽथुच् ॥ २. ४. ११२ ॥

यजियतिप्रच्छिरक्षिभ्यो नः ॥ २. ४. ११३ ॥

विच्छेर्नङ् ॥ २. ४. ११४ ॥

स्वपो नन् ॥ २. ४. ११५ ॥

आङि दः किः ॥ २. ४. ११६ ॥

उपसर्गे धः ॥ २. ४. ११७ ॥

कर्मण्यधिकरणे ॥ २. ४. ११८ ॥

अभिविधाविनुण् ॥ २. ४. ११९ ॥

स्त्रियां क्तिन् ॥ २. ४. १२० ॥

श्रुस्रुपदिसदिविदिक्षमिलभ्यर्देशंसिपचिकण्ड्वयिव्यवक्रुशितुषियजिमन्यासि-
शासिभ्यः ॥ २. ४. १२१ ॥

आङि स्रुजः ॥ २. ४. १२२ ॥

समीणः ॥ २. ४. १२३ ॥

ऊतियूतिजूतिसातिहेतिकीर्तयश्च ॥ २. ४. १२४ ॥

भावे स्यापागापचिभ्यः ॥ २. ४. १२५ ॥

व्रजियज्यासदीण्भ्यः कित् ॥ २. ४. १२६ ॥

षुञ्शीङ्मनिविदिचरिभ्यः संज्ञायाम् ॥ २. ४. १२७ ॥

अजेः समि ॥ २. ४. १२८ ॥
सादिपतिभ्यां जौ ॥ २. ४. १२९ ॥
भञ्जो वा ॥ २. ४. १३० ॥
कृञः श च ॥ २. ४. १३१ ॥
इच्छामृगये च ॥ २. ४. १३२ ॥
परौ सृचरिभ्यां यः ॥ २. ४. १३३ ॥
अटाट्या वा ॥ २. ४. १३४ ॥
जागुः ॥ २. ४. १३५ ॥
अप्रत्ययाच्च ॥ २. ४. १३६ ॥
गुरोर्हलः ॥ २. ४. १३७ ॥
नराध्यऋज्यापिदीपिचायिस्त्रंसिध्वंस्यादेः निष्ठायामनिटः ॥ २. ४. १३८ ॥
षितोऽ ॥ २. ४. १३९ ॥
क्रपेः संप्रसृ णं च ॥ २. ४. १४० ॥
याचितृषिभ्यां नुट् च ॥ २. ४. १४१ ॥
भिदिछिदिविदिदयिरुजिमृजिक्षिपिपुरिपृच्छिभ्योऽसंज्ञायाम् ॥ २. ४. १४२ ॥
गुहितुलिवसिवपिक्षपिक्षिभ्यः संज्ञायाम् ॥ २. ४. १४३ ॥
रिखिलिखिशभिसिधिमिधिगुधिभ्यो गुणश्च ॥ २. ४. १४४ ॥
ऋकृहधृतृभ्यो वृद्धिश्च ॥ २. ४. १४५ ॥
भूषिभीषिचिन्तिकूजिकथिकुम्बिचर्चिस्पृहितोलिदोलिभ्यश्च ॥ २. ४. १४६ ॥
आतश्चोपसर्गे ॥ २. ४. १४७ ॥
भातेश्च ॥ २. ४. १४८ ॥
ण्यासश्रन्थघट्टवन्दविदिभ्यो युच् ॥ २. ४. १४९ ॥
इषोऽनिच्छायाम् ॥ २. ४. १५० ॥
अधिपर्यो वा ॥ २. ४. १५१ ॥
समादिषु पदिसदिविदिशासिश्रुस्रुमहिवृषिमुषिवृतियतीणूभृञ्प्रभृतिभ्यः क्विप्॥ २. ४. १५२ ॥

१. A. अः प्रत्य-
२. A omits अञ्जि
३. A. चुरि
४. A adds the following sūtra
गोषाभीषाघिन्ताकुजाकथाकुञ्चाचर्यास्पृहातोलादोलाश्च ॥
५. A. ऋकृणधृतृभ्यः
६. A. भषि.
७. A. पिति
८. A. विदि
९. A omits भृञ्

क्रुधियुधिक्षुधितृषिस्विषिरुजिक्षुच्छिक्षुद्विमृदिगृतादिभ्यश्च ॥ २. ४. १५३ ॥

हिभीलूभूकण्डूयीकृञ्भिदिच्छिदिनुविद्राशिनक्षिमुजिजरेज्वरत्वरावस्रंवुमॅवादिभ्यो वा ॥ २. ४. १५४ ॥

क्रियाव्यतीहारेऽनीहीक्ष्यादिभ्यो णच् ॥ २. ४. १५५ ॥

आक्रोशे नञ्यनिः ॥ २. ४. १५६ ॥

ण्वुल् ॥ २. ४. १५७ ॥

संज्ञायाम् ॥ २. ४. १५८ ॥

रोगाख्यायां च ॥ २. ४. १५९ ॥

पुंस्यन्यत्रापि ॥ २. ४. १६० ॥

प्रश्नाख्यानयोरिञ्च वा ॥ २. ४. १६१ ॥

पर्यायार्हणोत्पत्तिषु ण्वुच् ॥ २. ४. १६२ ॥

नपुंसके भावे क्तः ॥ २. ४. १६३ ॥

ल्युट् च ॥ २. ४. १६४ ॥

कर्मणि चयेर्नं संस्पर्शात्कर्तुः शरीरसुखम् ॥ २. ४. १६५ ॥

करणाधिकरणयोश्च ॥ २. ४. १६६ ॥

ष्ठिवुक्लिवोर्दीर्घश्च ॥ २. ४. १६७ ॥

कृञः कर्तरि ॥ २. ४. १६८ ॥

व्रश्चिशतिहादिरम्यादिभ्यश्च ॥ २. ४. १६९ ॥

भुज्याच्छाद्यंवस्तुसिच्यादिभ्यः कर्मणि ॥ २. ४. १७० ॥

स्कन्दिपतिश्च्योतिस्रवत्यादिभ्योऽपादाने ॥ २. ४. १७१ ॥

दाञः संप्रदाने च ॥ २. ४. १७२ ॥

पुंसि संज्ञायां घः ॥ २. ४. १७३ ॥

गोचरसंचरवहव्रजव्यजक्रमापणनिगमप्रक्रमभगाकर्षनिकषाश्च ॥ २. ४. १७४ ॥

हलो घञ् ॥ २. ४. १७५ ॥

१. A adds ऋषि

२. A omits जर

३. A. वस्ति

४. A. यवामूदिभ्यः

५. A adds ग्लाम्लाज्याहाभ्यः

६. A. ण्वुल् च

७. A. पर्यायेन

८. A adds वा

९. A. वस्तावसि-

१०. A. वक

अध्यायन्यायोद्यावसंहाराधारावायाश्च ॥ २. ४. १७६ ॥

उदङ्कोऽनुदके ॥ २. ४. १७७ ॥

जालमानायः ॥ २. ४. १७८ ॥

खनो घश्च ॥ २. ४. १७९ ॥

डरेरके कवंकाश्च ॥ २. ४. १८० ॥

इकृष्टितपः स्वरूपे ॥ २. ४. १८१ ॥

अर्थे च ॥ २. ४. १८२ ॥

भावकर्मणोर्दुरीषद्दुःस्सुषु कृच्छ्राकृच्छ्रार्थेषु खलु ॥ २. ४. १८३ ॥

भूकृञ्भ्यां कर्तृकर्मणोरिच्छ्यर्थे ॥ २. ४. १८४ ॥

आतो युच् ॥ २. ४. १८५ ॥

शासियुधिदृशिघृषिमृषिभ्यश्च ॥ २. ४. १८६ ॥

वर्तमानसामीप्ये वर्तमानाद्वा ॥ २. ४. १८७ ॥

आशंसायां भूतवच्च ॥ २. ४. १८८ ॥

क्षिप्रवचने लृट् ॥ २. ४. १८९ ॥

आशंसावचने लिङ् ॥ २. ४. १९० ॥

संभावनायामनिष्पन्ने निष्पन्नवच्च ॥ २. ४. १९१ ॥

नानद्यतनवत् क्रियाप्रबन्धसामीप्ययोः ॥ २. ४. १९२ ॥

भविष्यति मर्यादावचने देशस्य विभागे परस्मिन् ॥ २. ४. १९३ ॥

कालस्य चानहोरात्राणाम् ॥ २. ४. १९४ ॥

परस्मिन् वा ॥ २. ४. १९५ ॥

लिङ्निमित्ते लृङ् क्रियातिपत्तौ ॥ २. ४. १९६ ॥

भूते च ॥ २. ४. १९७ ॥

प्रागुताप्योर्भूते वा ॥ २. ४. १९८ ॥

गर्हायां लडपि जात्वोः ॥ २. ४. १९९ ॥

कथमि लिङ् च वा ॥ २. ४. २०० ॥

१. A. द्याव

२. A. This is written as part of the previous sūtra.

३. A. वाकाश्च.

४. A. दुरीषत्सु

५. A. इच्छ्यर्थे

६. A. डिङ्

किंवृत्ते लिङ्लुटौ ॥ २. ४. २०१ ॥

अनवकृप्त्यमर्षयोरकिंवृत्तेऽपि ॥ २. ४. २०२ ॥

किं किलास्त्यर्थेषु ॥ २. ४. २०३ ॥

यद्यदियदाजातुषु लिङ् ॥ २. ४. २०४ ॥

यच्चयत्रयोर्गर्हायां च ॥ २. ४. २०५ ॥

आश्चर्ये च ॥ २. ४. २०६ ॥

शेषे लृडयदौ ॥ २. ४. २०७ ॥

उताप्योर्बाढार्थे लिङ् ॥ २. ४ २०८ ॥

कामप्रवेदनेऽकच्चिति ॥ २ ४. २०९ ॥

संभावनेऽलमर्थे तदर्थाप्रयोगे ॥ २. ४. २१० ॥

अयसंभावनवचने धातौ वाँ[4] ॥ २. ४. २११ ॥

हेतुफलयोः ॥ २. ४. २१२ ॥

इच्छार्थेषु[5] कामप्रवेदने लोट् च ॥ २. ४. २१३ ॥

समानकर्तृकेषु कर्मणो लिङ् ॥ २. ४. २१४ ॥

विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु ॥ २. ४. २१५ ॥

लोट् ॥ २. ४. २१६ ॥

प्रैषातिसृष्टप्राप्तकालेषु ॥ २. ४. २१७ ॥

लिङ्चोर्ध्वमौहूर्तिके ॥ २. ४. २१८ ॥

स्से लोट्[6] ॥ २. ४. २१९ ॥

अधीष्टे च ॥ २. ४. २२० ॥

कालसमयवेलासु लिङ्यदि ॥ २. ४. २२१ ॥

अर्हशक्तयोः ॥ २. ४. २२२ ॥

धातुसंबन्धे प्रत्ययाः ॥ २. ४. २२३ ॥

क्रियासमभिहारे लोट् तस्य हि स्वौ हि स्वयत् ॥ २. ४. २२४ ॥

१. A adds उद्

२. A. This is written as part of the previous sūtra.

३. A. अयमि सं-

४. A omits वा

५. A. इच्छार्थे

६. A. This is written as part of the previous sūtra; च is added at the end.

७. A adds च

समुच्चये वा[1] ॥ २. ४. २२५ ॥

यथाविध्यनुप्रयोगः पूर्वस्मिन् ॥ २. ४. २२६ ॥

समुच्चये सामान्यवचनस्य ॥ २. ४. २२७ ॥

अलंखल्वोः प्रतिषेधयोर्भावे क्त्वा वा ॥ २. ४. २२८ ॥

मेङ्[2][3] ॥ २. ४. २२९ ॥

परावरयोगे च ॥ २. ४. २३० ॥

अभिन्नकर्तृकयोः पूर्वकालात् ॥ २. ४. २३१ ॥

व्याङ्परिनिमीलियादेरपूर्वकालेऽपि ॥ २. ४. २३२ ॥

आभीक्ष्ण्ये णमुल् च ॥ २. ४. २३३ ॥

नयद्यनाकाङ्क्षे ॥ २. ४. २३४ ॥

[4]आम्रे प्रथमपूर्वेषु ॥ २. ४. २३५ ॥

कर्मण्याक्रोशे कृञः खमुञ् ॥ २. ४. २३६ ॥

[5]स्वाद्वर्थेषु चादीर्घेषु ॥ २. ४. २३७ ॥

अन्यथैवंकथमित्थंसुणमुलप्रयोगार्हात् ॥ २. ४. २३८ ॥

यथातथयोरसूयाप्रतिवचने ॥ २. ४. २३९ ॥

कर्मणि दृशिविदिशिभ्यां साकल्ये ॥ २. ४. २४० ॥

यावति विन्दजीविभ्याम् ॥ २. ४. २४१ ॥

चर्मोदरयोः पूरेः ॥ २. ४. २४२ ॥

वर्षप्रमाण ऊलोपश्चास्य वा ॥ २. ४. २४३ ॥

चेलार्थे क्नोपेः ॥ २. ४. २४४ ॥

गात्रपुरुषयोः स्नातेः ॥ २. ४. २४५ ॥

निर्मूलसमूलयोः कषः ॥ २. ४. २४६ ॥

शुष्कचूर्णरूक्षेषु पिषः ॥ २. ४. २४७ ॥

१. A omits वा

२. A. This portion is written as a separate sūtra.

३. A. This and the next sūtra are written as one.

४. A. अटे

५. A. स्वद्यर्थेषु

६. A This and the next sūtra are written as one.

७. A. उदलोप-

८. A. क्नेरपः

अकृते कृञः ॥ २. ४. २४८ ॥

जीवे ग्रहः ॥ २. ४. २४९ ॥

समूले हनः ॥ २. ४. २५० ॥

करणे च ॥ २. ४. २५१ ॥

स्नेहने पिषः ॥ २ ४. २५२ ॥

हस्तार्थे वर्तिग्रहिभ्याम् ॥ २. ४. २५३ ॥

स्वार्थेषु पुषः ॥ २ ४. २५४ ॥

बन्धेरधिकरणे ॥ २ ४. २५५ ॥

संज्ञायाम् ॥ २. ४. २५६ ॥

कर्त्रोर्जीवपुरुषयोर्नशिवहिभ्याम् ॥ ४ २ २५७ ॥

ऊर्ध्वे शुषि पूरः ॥ २. ४. २५८ ॥

कर्मणि चोपमाने ॥ ४. २. २५९ ॥

कृणादिषु यथा विध्यनुप्रयोगः ॥ २. ४ २६० ॥

उपात्किरो लवने ॥ २. ४. २६१ ॥

दंशेस्तृतीयायाम् ॥ २. ४. २६२ ॥

हिंसादेककर्मकात् ॥ २ ४. २६३ ॥

सप्तम्यां चोपपीडरुधाकर्षः ॥ २. ४. २६४ ॥

आसत्तौ ॥ २. ४. २६५ ॥

प्रमाणे ॥ २. ४. २३६ ॥

पञ्चम्या त्वरायाम् ॥ २. ४. २६७ ॥

द्वितीयायाम् ॥ २. ४. २६८ ॥

अध्रुवे स्वाङ्गे ॥ २. ४ २६९ ॥

परिक्लिश्यमाने च ॥ २. ४. २७० ॥

विशिपतिपदिस्कन्दिभ्यो वीप्साभीक्ष्ण्ययोः ॥ २. ४. २७१ ॥

अस्तितृषिभ्यां क्रियाविच्छेदकाभ्यां कालेषु ॥ २. ४. २७२ ॥

१. A. वर्णिन्दिहिभ्याम्

२. A. This and the next sūtra are written together.

३ A. This and the next sūtra are written together.

४. A. This portion is written as a separate sūtra.

नाम्न्यादिशिग्रहिभ्याम् ॥ २. ४. २७३ ॥

अव्ययेऽनभिप्रेताख्याने कृञः क्त्वा च ॥ २. ४. २७४ ॥

तिर्यच्यपवर्गे ॥ २. ४. २७५ ॥

स्वाङ्गतस्लाघार्थे भुवश्च ॥ २. ४. २७६ ॥

तूष्णीमि च ॥ २. ४. २७७ ॥

अन्वच्यानुलोम्ये ॥ २. ४. २७८ ॥

शकधृषज्ञारभलभसहार्हेच्छार्थेषु कर्मणस्तुमुन् ॥ २. ४. २७९. ॥

श्लाघटास्त्यर्थसमर्थार्थकालसमयवेलासु च ॥ २. ४. २८० ॥

लः कर्मणि च ॥ २. ४. २८१ ॥

क्तिच् कृतः संज्ञायाम् ॥ २. ४. २८२ ॥

आशिषि च ॥ २. ४. २८३ ॥

इति श्रीसरस्वतीकण्ठाभरणनाम्नि व्याकरणे
द्वितीयस्याध्यायस्य चतुर्थः पादः
समाप्तः.

---

१. A. द्रहिभ्यां

२. A. स्वागत-

३. A. This is written as part of the previous sūtra.

४. A. तुमुल्

५ A. श्लाघ

अथ तृतीयोऽध्यायः

लस्तिप्तस्झिसिप्थस्थविब्वस्मस्तानांझथासाथांध्वमिड्ढ्वहिमहिङ्॥ ३. १. १.॥

अत आत इत्॥ ३. १. २॥

झेोऽन्तः॥ ३. १. ३॥

अदभ्यस्तात्॥ ३ १. ४॥

आत्मनेपदेऽनतः॥ ३ १. ५॥

शीङो रुट्॥ ३. १. ६॥

वेतेर्वा॥ ३. १. ७॥

लिङाँशिच् तस्यैश्॥ ३. १. ८॥

परस्मैपदानां णलतुसुस्थलथुसणल्वमाः॥ ३. १. ९॥

वेत्तेर्लोपो वा॥ ३. १ १०॥

ब्रुवः पञ्चानां पञ्चादितो ब्रुव आहः॥ ३. १ ११॥

आत ओणलः॥ ३ १. १२॥

टिदात्मनेपदानां टेरेत्॥ ३. १. १३॥

थासस्से॥ ३. १. १४॥

प्रथमयोर्डारौरसः॥ ३. १. १५॥

लोट एरुः॥ ३. १. १६॥

सेर्हिङ्॥ ३. १ १७॥

आशिषि तुह्योस्तातङ् वा॥ ३ १ १८॥

मेरानिः॥ ३ १. १९॥

आमेतः॥ ३. १. २०॥

सवाभ्यां वामौ॥ ३ १. २१॥

इडादीनामैप्॥ ३. १. २२॥

बमादीनां टापू॥ ३. १. २३॥

तस्थस्थवस्मसां तांतंतवमाः॥ ३. १. २४॥

१. A. ध्वमितिध्वहि

२. A omits this sūtra.

३. B omits this sūtra.

४. A. This sūtra is written as two.

५. A. दाजलं

ङितश्च ॥ ३. १. २५ ॥

इतो लोपः परस्मैपदानाम् ॥ ३. १. २६ ॥

मिपोऽम् ॥ ३. १. २७ ॥

लिङो यासुट् ङिच्च ॥ ३. १. २८ ॥

किदाशिषि ॥ ३. १ २९ ॥

सीयुडात्मनेपदानाम् ॥ ३. १. ३० ॥

झस्य रन् ॥ ३. १. ३१ ॥

इटोऽत् ॥ ३. १. ३२ ॥

सुट्तथोः ॥ ३. १. ३३ ॥

सोलोपोऽनन्त्यस्यानाशिषि ॥ ३. १. ३४ ॥

अतो य इयः ॥ ३. १. ३५ ॥

झेर्जुस् ॥ ३. १. ३६ ॥

सिचः ॥ ३. १. ३७ ॥

लुक्यभुवः ॥ ३. १. ३८ ॥

सिजभ्यस्ताभ्यां लङः ॥ ३. १. ३९ ॥

द्विषाद्ध्यो वा ॥ ३. १. ४० ॥

आत्मनेपदानि भावकर्मणोः ॥ ३. १. ४१ ॥

कर्मकर्तरि च ॥ ३. १. ४२ ॥

कर्तर्यात्मनेभाषेभ्यः ॥ ३. १. ४३ ॥

भेतिः ॥ ३. १. ४४ ॥

क्रियाव्यतिहारे ॥ ३. १. ४५ ॥

न गतिर्हिंसाशब्दार्थहसिभ्योऽहवहिभ्यः ॥ ३. १. ४६ ॥

इतरेतरान्योन्यपरस्परोपपदाश्च ॥ ३. १. ४७ ॥

नेर्विशः ॥ ३. १. ४८ ॥

परिव्ययेभ्यः क्रियः ॥ ३. १. ४९ ॥

विपराभ्यां जेः ॥ ३. १. ५० ॥

आङो दः ॥ ३. १. ५१ ॥

१. A. This and the next sūtra are written as one.

२. A. This and the next sūtra are written as one.

B. दीतः

नविकासस्वास्यप्रसारणयोः ॥ ३. १. ५२ ॥
गमेः कालहरणे ॥ ३. १. ५३ ॥
नुं प्रच्छः ॥ ३. १. ५४ ॥
क्रीडोऽनुपरिभ्यां च ॥ ३. १. ५५ ॥
समोऽकूजने ॥ ३. १. ५६ ॥
शकेः सनो जिज्ञासायाम् ॥ ३. १. ५७ ॥
अवस्करः ॥ ३. १. ५८ ॥
ह्रञो गतं ताच्छील्ये ॥ ३. १. ५९ ॥
आशिषि नाथः ॥ ३. १. ६० ॥
शपः शपथे ॥ ३. १. ६१ ॥
स्थः प्रतिज्ञानिर्णयप्रकाशनेषु ॥ ३. १. ६२ ॥
समवप्रविभ्यश्च ॥ ३. १. ६३ ॥
उदोनूर्ध्वचेष्टायाम् ॥ ३. १. ६४ ॥
उपाद्देवपूजासङ्गतिकरणमित्रकरणेषु ॥ ३. १. ६५ ॥
पथिकर्तृकात् ॥ ३. १. ६६ ॥
मन्त्रकरणात् ॥ ३. १. ६७ ॥
वा लिप्सायाम् ॥ ३. १. ६८ ॥
अकर्मकात् ॥ ३. १ ६९ ॥
समोगमृच्छिपृच्छिस्वृश्रुवेत्यार्तिदृशिभ्यः ॥ ३. १. ७० ॥
उपसर्गादस्यत्यूहिभ्यां वा ॥ ३. १. ७१ ॥
आङो यमहनः स्वाङ्गकर्मकाच्च ॥ ३. १. ७२ ॥
उद्भिभ्यां तपः ॥ ३. १. ७३ ॥
तपः कर्मकाश्च ॥ ३. १. ७४ ॥
निसमुपविभ्यो ह्वः ॥ ३. १. ७५ ॥
स्पर्धायामाङः ॥ ३. १. ७६ ॥
सूचनावक्षेपणसेवासाहसप्रतियत्नप्रकथनोपयोगेषु कृञः ॥ ३. १. ७७ ॥
अधेः प्रसहने ॥ ३. १. ७८ ॥

१. A. नृपृच्छाः
२. A. उपादैव
३. A omits पृच्छि
४. A. This is written as two different sūtras.

वेः शब्दकर्मणः ॥ ३. १. ७९ ॥

अकर्मकात् ॥ ३. १. ८० ॥

पूजोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः ॥ ३. १. ८१ ॥

कर्तृस्थामूर्तकर्मकाच्च ॥ ३. १. ८२ ॥

अप्रतिबन्धोत्साहतायनेषु क्रमः ॥ ३. १. ८३ ॥

उपपराभ्याम् ॥ ३. १. ८४ ॥

आङो ज्योतिरुद्गमने ॥ ३. १. ८५ ॥

वेः पादविहरणे ॥ ३. १. ८६ ॥

प्रोपाभ्यामारम्भे ॥ ३. १. ८७ ॥

अनुपसर्गाद्वा ॥ ३. १. ८८ ॥

अपह्नवे ज्ञः ॥ ३. १. ८९ ॥

अकर्मकाच्च ॥ ३. १. ९० ॥

संप्रतिभ्यामनाध्याने ॥ ३. १. ९१ ॥

भासनोपसान्त्वनज्ञानयत्नोपमन्त्रणेषु वदः ॥ ३. १. ९२ ॥

अनुसंभ्यामकर्मकात् ॥ ३. १. ९३ ॥

विमतौ ॥ ३. १. ९४ ॥

व्यक्तवाचां समूहोक्तौ ॥ ३. १. ९५ ॥

तयोर्वा ॥ ३. १. ९६ ॥

अवाद्गिरः ॥ ३. १. ९७ ॥

समः प्रतिज्ञायाम् ॥ ३. १. ९८ ॥

भृजः श्रद्धावपि ॥ ३. १. ९९ ॥

उदश्वरः सकर्मकात् ॥ ३. १. १०० ॥

समस्तृतीययुक्तात् ॥ ३. १. १०१ ॥

दाणः सा चेच्चतुर्थ्यर्थे ॥ ३. १. १०२ ॥

उपाद्यमः स्वीकारे ॥ ३. १. १०३ ॥

आमः क्रमः प्राग्वत् ॥ ३. १. १०४ ॥

सनः ॥ ३. १. १०५ ॥

१. A. सृःश्र-

२. A. This and the next are written as one sūtra.

स्मृदृशिभ्याम् ॥ ३. १. १०६ ॥

अनोनोर्ङः ॥ ३. १. १०७ ॥

श्रुवोऽनाङ् प्रतेः ॥ ३. १. १०८ ॥

शदेरिशति ॥ ३. १. १०९ ॥

मृङो लुङ्लिङोश्च ॥ ३. १. ११० ॥

उपसर्गादजाद्यन्ताद्युजेरयज्ञपात्रेषु ॥ ३. १. १११ ॥

समः क्ष्णुवः ॥ ३. १. ११२ ॥

भुनक्तेरनवने ॥ ३. १. ११३ ॥

णेरणौ यत्कर्मणौ चेत्स कर्तानाध्याने ॥ ३. १. ११४ ॥

भीस्मिभ्यां हेतोस्तदर्थे ॥ ३. १. ११५ ॥

गृधिवञ्चिभ्यां प्रलम्भने ॥ ३. १. ११६ ॥

लियः पूजाभिभवयोश्च ॥ ३. १. ११७ ॥

मिथ्योपपदात् कृञोऽभ्यासे ॥ ३. १. ११८ ॥

फलवति ॥ ३. १. ११९ ॥

पाठे विभाषितात् ॥ ३. १. १२० ॥

[२]श्रितः ॥ ३. १. १२१ ॥

अपवदः ॥ ३. १. १२२ ॥

समुदाङ्भ्यो यमेरग्रन्थे[१] ॥ ३. १. १२३ ॥

शब्दान्तरगतौ वा ॥ ३. १. १२४ ॥

णिजर्थे च ॥ ३. १. १२५ ॥

यजेर्नित्यम् ॥ ३. १. १२६ ॥

न धातूपपदसंसर्गसामान्योक्तौ ॥ ३. १. १२७ ॥

अनुपराभ्यां कृञः ॥ ३. १. १२८ ॥

अभिप्रत्यतिभ्यः क्षिपः ॥ ३. १. १२९ ॥

प्राद्वहः ॥ ३. १. १३० ॥

परेर्मृषश्च ॥ ३. १. १३१ ॥

१. A. This and the next are written as one sūtra.

२. A omits this sūtra.

३. A adds here a separate sūtra अनुपसर्गात् फुल्लः

रमेर्व्याङ्भ्यां च ॥ ३. १. १३२ ॥

उपात् ॥ ३. १. १३३ ॥

अकर्मकाद्वा ॥ ३. १. १३४ ॥

अणौ चित्तवत् कर्तृकाण्णेः ॥ ३. १. १३५ ॥

चलनाहारार्थात्[1] ॥ ३. १. १३६ ॥

प्रुद्रुस्रुश्रुयुधयुधेङ्नशाजनः ॥ ३. १. १३७ ॥

न पादमायमायसपरिमुहार्तिरुचिनृतिधेङ्दवसः ॥ ३. १. १३८ ॥

वाक्यषः ॥ ३. १. १३९ ॥

द्रुङ्भ्यो लुङि ॥ ३. १. १४० ॥

वृङ्भ्यः स्यसनोः ॥ ३. १. १४१ ॥

लुटि च कृपः ॥ ३. १. १४२ ॥

शेषात्परस्मैपदानि ॥ ३. १. १४३ ॥

यङ्लुकः शब्लुक्च ॥ ३. १. १४४ ॥

समानाधिकरणे युष्मद्यप्रयुज्यमानेऽपि मध्यमः ॥ ३. १. १४५ ॥

प्रहासे च मन्योपपदान्मन्यतेरुत्तम एकवच्च ॥ ३. १. १४६ ॥

अस्मद्युत्तमः ॥ ३. १. १४७ ॥

शेषे प्रथमः ॥ ३. १. १४८ ॥

एकद्विबहुष्वेकवचनद्विवचनबहुवचनानि ॥ ३. १. १४९ ॥

जात्याख्यायामेकस्मिन् बहुवचनमसंख्याप्रयोगे वा ॥ ३. १. १५० ॥

अस्मदो द्वयोश्चाविशेषणे ॥ ३. १. १५१ ॥

युष्मदः पूजायाम् ॥ ३. १. १५२ ॥

अन्येभ्योऽपि दृश्यते ॥ ३. १. १५३ ॥

फल्गुनीप्रोष्ठपदाविशाखादिभ्यो नक्षत्रे ॥ ३. १. १५४ ॥

तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् ॥ ३. १. १५५ ॥

प्रातिपदिकात् स्वौजसमौट्छष्टाभ्यांभिस्ङेभ्यांभ्यस्ङसिभ्यांभ्यस्ङसोसां-ङ्योसुप् ॥ ३. १. १५६ ॥

१. A. गौरर्थात्

२. A. This and the next sūtra are written as one.

३. A. वेस्तूत्तम

४. A adds a separate sūtra क्वचिद्द्विवचनं च

५. A. साङ्योः

अतो भिस ऐस् ॥ ३. १. १५७ ॥
नेदमदसोऽकात् ॥ ३. १. १५८ ॥
टाङसोरिनस्यौ ॥ ३. १. १५९ ॥
ङेङस्योर्यातौ ॥ ३. १. १६० ॥
सर्वनाम्नः स्मैस्मातौ ॥ ३. १. १६१ ॥
ङेः स्मिन् ॥ ३. १. १६२ ॥
जसश्शी ॥ ३. १. १६३ ॥
आदामः साम् ॥ ३. १. १६४ ॥
नान्यच्च संज्ञोपसर्जनात् ॥ ३. १. १६५ ॥
तृतीयासमासवाक्ययोः ॥ ३. १. १६६ ॥
द्वन्द्वे च ॥ ३. १. १६७ ॥
शीवा ॥ ३. १. १६८ ॥
प्रथमचरमतयायाल्पार्धनेमकतिपयेभ्यः ॥ ३. १. १६९ ॥
पूर्वादिभ्यो नवभ्यः स्मात्स्मौ च ॥ ३. १. १७० ॥
स्मै च तृतीयात् ॥ ३. १. १७१ ॥
आप औतः शी ॥ ३. १. १७२ ॥
नपुंसकात् ॥ ३. १. १७३ ॥
जस्सशोः शिः ॥ ३. १. १७४ ॥
अष्टाभ्य औश् ॥ ३. १. १७५ ॥
ष्णस्संख्याया लुक् ॥ ३. १. १७६ ॥
कतेः ॥ ३. १. १७७ ॥
स्वमोर्नपुंसकात् ॥ ३. १. १७८ ॥
अतोऽम् ॥ ३. १. १७९ ॥
इतरादिभ्यः पञ्चभ्यो नेकतरातः ॥ ३. १. १८० ॥
युष्मदस्मद्भ्यां ङसोऽश् ॥ ३. १. १८१ ॥
ङे सुटोऽम् ॥ ३. १. १८२ ॥
शसो नः ॥ ३. १. १८३ ॥

१. A. शिवा
२. A. तथाल्पा-
३. A. This and the following two sūtras are omitted.

भ्यसो भ्यम् ॥ ३. १. १८४ ॥
पञ्चम्या अत् ॥ ३. १. १८५ ॥
ङसेश्च ॥ ३. १. १८६ ॥
आम आकम् ॥ ३. १. १८७ ॥
ह्स्वापो नुट् ॥ ३. १. १८८ ॥
स्त्रीयूभ्याम् ॥ ३. १. १८९ ॥
इयुवुस्थानिभ्यां वा ॥ ३. १. १९० ॥
नित्यं स्त्रियाः ॥ ३. १. १९१ ॥
संख्याया अनतः ॥ ३. १. १९२ ॥
त्रेस्त्रयश्च ॥ ३. १. १९३ ॥
सुपो लुगैकार्थ्ये ॥ ३. १. १९४ ॥
अनुपसर्जनाव्ययात् ॥ ३. १. १९५ ॥
नाव्ययीभावादतोऽपञ्चम्यास्त्यम् ॥ ३. १. १९६ ॥
तृतीयासप्तम्योर्वा ॥ ३. १. १९७ ॥
नित्यमृध्यर्थनदीसंख्यावयवात् सप्तम्याः ॥ ३. १. १९८ ॥
कर्मणि द्वितीया ॥ ३. १. १९९ ॥
समयानिकषाहाधिगन्तरान्तरेणयेनतेनयुक्तात् ॥ ३. १. २०० ॥
द्वित्वेऽध्यादिभिः ॥ ३. १. २०१ ॥
सर्वाभिपर्युभयेभ्यस्तसा ॥ ३. १. २०२ ॥
एनपा ॥ ३. १. २०३ ॥
कर्मप्रवचनीयैः ॥ ३. १. २०४ ॥
सप्तम्याधिक्यस्वाम्ययोः ॥ ३. १. २०५ ॥
पञ्चम्येपाङ्भ्याम् ॥ ३. १. २०६ ॥
परिणा वर्जने ॥ ३. १. २०७ ॥
प्रतिनिधिप्रतिदानयोः ॥ ३. १. २०८ ॥
कालाध्वभ्यां कारकमध्ये च सप्तमी च ॥ ३. १. २०९ ॥

१. B. Here is a lacuna.
२. B. Here is a lacuna.
३. A. मृध्वर्य.
४. A. उएनपा.
५. A. म्यावाङ्भ्याम्.
६. A omits च

द्वितीयात्यन्तसंयोगे ॥ ३. १. २१० ॥
अपवर्गे तृतीया ॥ ३. १. २११ ॥
कर्तृकरणयोश्च ॥ ३. १. २१२ ॥
प्रकृतिप्रायगोत्रनामजातिजानुपुमात्मादिभ्यो गम्यमानक्रियायाः ॥ ३. १. २१३ ॥
न्यक्षकात्स्न्यादिभ्यः क्रियाविशेषणे ॥ ३. १. २१४ ॥
सुखदुःखादिभ्यो वा ॥ ३. १. २१५ ॥
समविषमादिभ्योऽधिकरणे ॥ ३. १. २१६ ॥
द्विद्रोणपञ्चकादिभ्यः कर्मणि वीप्सायाम् ॥ ३. १. २१७ ॥
संज्ञश्च ॥ ३. १. २१८ ॥
अशिष्टव्यवहारे संयच्छतेः संप्रदाने ॥ ३. १. २१९ ॥
सहार्थयोगे ॥ ३. १. २२० ॥
अर्थार्थिपूर्वापरकलहनिपुणमिश्रश्लक्ष्णोनार्थैः[1] ॥ ३. १. २२१ ॥
इत्थंभूतलक्षणात् ॥ ३. १. २२२ ॥
अङ्गाद्विकृतात्तद्विकारेणाङ्गिवचने ॥ ३. १. २२३ ॥
हेतौ ॥ ३. १. २२४ ॥
ऋणे पञ्चमी ॥ ३. १. २२५ ॥
गुणे वा ॥ ३. १. २२६ ॥
न[2] स्त्रियामनुपलब्ध्यादिभ्यः ॥ ३. १. २२७ ॥
षष्ठी हेतोः प्रयोगे ॥ ३. १. २२८ ॥
पर्यायाणां चाद्वितीयाः[3] सर्वनामभ्यः ॥ ३. १. २२९ ॥
चतुर्थी संप्रदाने ॥ ३. १. २३० ॥
परिक्रियः करणे वा ॥ ३. १. २३१ ॥
कृत्यर्थकर्तरि विकारे ॥ ३. १. २३२ ॥
उत्पातेन ज्ञाप्यमाने ॥ ३. १. २३३ ॥
तादर्थ्ये ॥ ३. १. २३४ ॥
तुमर्थाच्च भाववचनात् ॥ ३. १. २३५ ॥
तुमुनोऽप्रयुज्यमानस्य कर्मणि ॥ ३. १. २३६ ॥

१. A. नार्थैः
२. A. न स्त्र्यामनुपलब्ध्यादिभ्यः
३. A omits चा

गत्यर्थानां चेष्टायामनास्थिताध्वनि वा ॥ ३. १. २३७ ॥
मन्यतेः प्रतिकृष्य कुत्सायामुपमानेभ्यः ॥ ३. १. २३८ ॥
ननावव्रकाकशुकसृगालेभ्यः ॥ ३. १. २३९ ॥
नमःस्वस्तिस्वाहास्वधालंवषट्पर्याप्त्यर्थैः ॥ ३. १. २४० ॥
अपादाने पञ्चमी ॥ ३. १. २४१ ॥
ल्यब्लोपे कर्माधिकरणयोः ॥ ३. १. २४२ ॥
प्रश्नाख्यानयोश्च ॥ ३. १. २४३ ॥
प्रभृत्यन्यारादितरर्दिक्कृच्छब्दाञ्चूत्तरपदाजाहियोगे ॥ ३. १. २४४ ॥
ऋते द्वितीया च ॥ ३. १. २४५ ॥
विना तृतीया च ॥ ३. १. २४६ ॥
पृथङ्नानाभ्याम् ॥ ३. १ २४७ ॥
स्तोकाल्पकृच्छ्रकतिपयेभ्योऽसत्त्वार्थेभ्यः करणे ॥ ३. १. २४८ ॥
कालाध्वपरिछेदमूलात्पञ्चमी ॥ ३. १. २४९ ॥
तेन योगोऽकालात्सप्तमी ॥ ३. १. २५० ॥
अध्वनः प्रथमा च ॥ ३. १. २५१ ॥
षष्ठ्यतसर्थैः ॥ ३. १. २५२ ॥
दूरान्तिकार्थबहिर्भिः पञ्चमी च ॥ ३. १. २५३ ॥
दूरान्तिकार्थेभ्योऽसत्त्ववचनेभ्यो द्वितीयातृतीयासप्तम्यश्च ॥ ३. १ २५४ ॥
अधिकरणे सप्तमी ॥ ३. १. २५५ ॥
क्तस्येन्विषयस्य कर्मणि ॥ ३. १. २५६ ॥
निमित्तात्कर्मसंयोगे ॥ ३. १. २५७ ॥
अप्रत्यादिष्वसाधुना ॥ ३. १. २५८ ॥
साधुना[2] च ॥ ३. १. २५९ ॥
निपुणेन चार्चायाम् ॥ ३. १. २६० ॥
क्रियार्हेभ्यः कारकत्वे ॥ ३. १. २६१ ॥
क्रियानर्हेभ्यश्चाकारकत्वे ॥ ३. १. २६२ ॥
तद्विपर्यासे च ॥ ३. १. २६३ ॥

१. A. This and the next sūtra are written as one.
२. A. सापुना च.

यस्य च भावेन भावलक्षणम् ॥ ३. १. २६४ ॥
षष्ठी चानादरे ॥ ३. १. २६५ ॥
स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च ॥ ३. १. २६६ ॥
आयुक्तकुशलाभ्यामासेवायाम् ॥ ३. १. २६७ ॥
यतो निर्धारणे ॥ ३. १. २६८ ॥
पञ्चमी विभक्तात् ॥ ३. १. २६९ ॥
सप्तमी चाधिकेन भूयसः ॥ ३. १. २७० ॥
तृतीयाल्पीयसः ॥ ३. १. २७१ ॥
प्रसितोत्सुकाभ्यां अधिकरणे वा ॥ ३. १. २७२ ॥
नक्षत्राच्च लुपि ॥ ३. १. २७३ ॥
अर्थमात्रे प्रथमा ॥ ३. १. २७४ ॥
संबोधने च ॥ ३. १. २७५ ॥
षष्ठी शेषे ॥ ३. १. २७६ ॥
स्मृत्यर्थदयेशां कर्मणि ॥ ३. १. २७७ ॥
कृञः प्रतियत्ने ॥ ३. १. २७८ ॥
रुजार्थानां भावकर्तृकाणाम् ॥ ३. १. २७९ ॥
न ज्वरिसन्ताप्योः ॥ ३. १. २८० ॥
आशिषि नाथः ॥ ३. १. २८१ ॥
जासिनाटक्राथिपिषां[2] हिंसायाम् ॥ ३. १. २८२ ॥
हनः प्रनिभ्याम् ॥ ३. १. २८३ ॥
व्यपहृपणोः विनिमये ॥ ३. १. २८४ ॥
द्यूते च ॥ ३. १. २८५ ॥
[3]दिवस्तदर्थस्य ॥ ३. १. २८६ ॥
वोपसर्गात् ॥ ३. १. २८७ ॥
[4]शोऽविदर्थस्य करणे ॥ ३. १. २८८ ॥
कृत्वोऽर्थप्रयोगे कालेभ्योऽधिकरणे ॥ ३. १. २८९ ॥

१. A. प्रति प्रतियत्ने
२. A. पिषामहिंसायाम्.
३. A. This and the next sūtra are written as one,
४. A. शो-

प्रतिपदषष्ठचाः पूर्णो विधिः ॥ ३. १. २९० ॥

कर्तृकर्मणोः कृति ॥ ३. १. २९१ ॥

उभयहेतावस्त्र्यकाकारे कर्तरि वा ॥ ३. १ २९२ ॥

[2]द्विषः शतरि ॥ ३. १. २९३ ॥

नलादेशतृन्नुदन्ताव्ययकिकखलर्थेषु ॥ ३. १. २९४ ॥

अकर्मेरुकञि ॥ ३. १. २९५ ॥

अमत्यार्थाद्यधिकरणे निष्ठायाम् ॥ ३. १. २९६ ॥

भावे वा ॥ ३. १. २९७ ॥

अके भविष्यति ॥ ३ १. २९८ ॥

[3]इन्याधमर्ण्ये च ॥ ३. १. २९९ ॥

कृत्येषु कर्तरि वा ॥ ३. १ ३०० ॥

नोभवप्राप्तौ ॥ ३. १. ३०१ ॥

तुल्यार्थैरतुलोपमाभ्यां तृतीया च ॥ ३. १. ३०२ ॥

हितसुखाभ्यां चतुर्थी च ॥ ३. १. ३०३ ॥

आशिष्यायुष्यभद्रार्थकुशलार्थैश्च ॥ ३. १. ३०४ ॥

इति श्रीसरस्वतीकण्ठाभरणनाम्नि व्याकरणे
तृतीयस्याध्यायस्य प्रथमः पादः
समाप्तः

---

१. A omits this sūtra.

२. A. This and the next sūtra are written as one.

३. A. अन्या.

अथ द्वितीयः पादः

सुप्सुपा सहैकार्थीभावे समासः ॥ ३. २. १ ॥

विस्पष्टादीनि गुणविशेषणतायाम्[1] ॥ ३. २. २ ॥

काष्ठादीनि क्रियाविशेषणतायाम् ॥ ३. २. ३ ॥

सर्वचर्माद्यश्वोदशैकादशमाशब्दोर्ध्वमुहूर्तोर्ध्वदेहोर्ध्वेन्द्रमकृतपूर्वादयः[2] तद्धिते[3] ॥ ३. २. ४ ॥

काकतालादय इवार्थे ॥ ३. २. ५ ॥

इवेन विभक्त्यलोपश्च ॥ ३. २. ६ ॥

भूतपूर्वादयः ॥ ३. २. ७ ॥

अव्ययीभावः ॥ ३. २. ८ ॥

अव्ययं विभक्त्यर्थे ॥ ३. २. ९ ॥

समीपसमृद्ध्योश्च ॥ ३. २. १० ॥

असमृद्ध्यर्थाभावात्ययासंप्रतिषु ॥ ३. २. ११ ॥

ख्यातिपश्चादर्थयोः ॥ ३. २. १२ ॥

योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यसदृशे षु ॥ ३. २. १३ ॥

यौगपद्यानुपूर्व्यसंपत्तिलाकल्यान्तवचनेषु ॥ ३. २. १४ ॥

यथा न सादृश्ये ॥ ३. २. १५ ॥

यावदियत्त्वे ॥ ३. २. १६ ॥

प्रतिना मात्रार्थे ॥ ३. २. १७ ॥

संख्याक्षशलाकाः परिणा द्यूतेऽन्यथावृत्तौ ॥ ३. २. १८ ॥

पर्यपाङ्बहिरञ्चवः पञ्चम्या वा[4][5] ॥ ३. २. १९ ॥

लक्षणेनाभिप्रती आभिमुख्ये ॥ ३. २. २० ॥

अनुः सामीप्यायामयोः ॥ ३. २. २१ ॥

१. A. This is written as three different sūtras.

२. A. तायाः

३. A. दहोन्द.

४. A. पर्यवाङ्

५. A omits वा.

तिष्ठद्गुवंहद्भायतीगवानि कालविशेषे न चान्यसमासः ॥ ३. २. २२ ॥
लूनलूयमानपूतपूयमाना यवेन न च व्यतिरेकविभक्तिः ॥ ३. २. २३ ॥
खलेसंहृतसंहियमाणा घुसेन च ॥ ३. २. २४ ॥
सुविनिदुरपरायती पापपुण्यानि समया ॥ ३. २. २५ ॥
समं भूमिपदातिभ्यामन्यपदार्थे ॥ ३. २. २६ ॥
प्रोहरथमृगदक्षिणाभिः ॥ ३. २. २७ ॥
संप्रत्यसंप्रत्यप्रदक्षिणानि वर्तमानावर्तमानवामेषु ॥ ३. २. २८ ॥
पारे मध्येऽग्रेऽन्तः षष्ठ्या वा ॥ ३. २. २९ ॥
संख्या वंश्येन ॥ ३. २. ३० ॥
नदीभिस्समाहारे ॥ ३. २. ३१ ॥
अन्यपदार्थैः संज्ञायाम् ॥ ३. २. ३२ ॥
तत्पुरुषः ॥ ३. २. ३३ ॥
द्वितीयाश्रितातीतपतितगतात्यस्तगमिगामिष्यभुक्त्वादिभिः ॥ ३. २. ३४ ॥
प्राप्तापन्नाभ्यां प्राप्तापन्नौ च द्वितीयया पुंवच्च ॥ ३. २. ३५ ॥
स्वयं सामी क्तेन ॥ ३. २. ३६ ॥
खेट्टा क्षेपे ॥ ३. २. ३७ ॥
कालाः ॥ ३. २. ३८ ॥
अत्यन्तसंयोगे ॥ ३. २. ३९ ॥
तृतीया तत्कृतार्थेन गुणवचनेन ॥ ३. २. ४० ॥
अर्थादिसदृशसमतुल्याधिकैश्च ॥ ३. २. ४१ ॥
अर्धं चतसृभिः ॥ ३. २. ४२ ॥
एकं न विंशत्यादिभिः ॥ ३. २. ४३ ॥
कर्तृकरणे कृता बहुलम् ॥ ३. २. ४४ ॥
कृत्यैरधिकार्थवचने ॥ ३. २. ४५ ॥

१. A भवद्गायति.
२. A. लुङ्
३. A. This and the next sūtra are written together.
४. A omits अवर्तमान
५. A adds तौ च
६. A. This and the next sūtra are written together.
७. A. अर्द्धं
८. A. This and the next sūtra are written together.

भक्ष्यान्नपानपात्रैर्मिश्रीकरणव्यञ्जनयुग्यपूरणानि ॥ ३. २. ४६ ॥

चतुर्थी यता ॥ ३. २. ४७ ॥

सुखहिताभ्याम् ॥ ३. २. ४८ ॥

तादर्थ्ये प्रकृत्या ॥ ३. २. ४९ ॥

बलिरक्षितघाससुराविधादिभिश्च ॥ ३. २. ५० ॥

नित्यमर्थेनेदमर्थे ॥ ३. २. ५१ ॥

पञ्चमीभीतभीतिभीभयभीरुभीलुकजुगुप्सुभिः ॥ ३. २. ५२ ॥

अपेतापोढनिर्गतमुक्तपतितत्रस्तैरर्वा सा ॥ ३. २. ५३ ॥

स्तोकाल्पान्तिकाभ्याशदूरार्थकृच्छ्राणि क्तेन ॥ ३. २. ५४ ॥

शतसहस्रौ परेण ॥ ३. २. ५५ ॥

सप्तमीसिद्धशुष्कपक्वबन्धादिभिः ॥ ३. २. ५६ ॥

शौण्डधूर्तकितवव्याडसंवीतपटुपण्डितकुशलनिपुणचपलान्तरधिभिः प्रसक्ताद्यप्रयोगे ॥ ३. २. ५७ ॥

ध्वाङ्क्षकाकवायसबकादिभिः क्षेपे ॥ ३. २. ५८ ॥

सिंहव्याघ्रवायसबयुधिष्ठिरादिभिः पूजायाम् ॥ ३. २. ५९ ॥

यतावश्यके ॥ ३. २. ६० ॥

संज्ञायाम् ॥ ३. २. ६१ ॥

ऋणमधमोत्तमाभ्याम् ॥ ३. २. ६२ ॥

क्तेनाहोरात्रावयवाः ॥ ३. २. ६३ ॥

तत्र ॥ ३. २. ६४ ॥

सगतिकारकेणापि क्षेपे ॥ ३. २. ६५ ॥

पात्रमवधारणे समितबहुलाभ्यां न चान्यसमासः ॥ ३. २. ६६ ॥

गेहेनोष्ठौ शूरश्वेडिनार्दविजितिव्याडपटुपण्डितप्रगल्भैः ॥ ३. २. ६७ ॥

उदुम्बरः कृमिमशकाभ्यामुपमायाम् ॥ ३. २. ६८ ॥

अवटकूपौ कच्छपमण्डूकाभ्याम् ॥ ३. २. ६९ ॥

नगरं काकादिभिः ॥ ३. २. ७० ॥

गेहेमेहिपिण्डीशूरौ निरीहताभ्याम् ॥ ३. २. ७१ ॥

१. A. सर्वे.
२. A. स्तोकान्तिकदूरार्थ-
३. A. व्याध.
४. A. This is written as two sûtras.
५. A. श्वेडी.

पितरि शूरमातरि पुरुषौक्षियायाम् ॥ ३. २. ७२ ॥

गर्भः सुहिततृप्तदप्तैरनौचित्ये ॥ ३. २. ७३ ॥

कर्णधिरिटिरिचुरुचुराभ्याम् ॥ ३. २. ७४ ॥

विशेषणं विशेष्येण समानाधिकरणेन ॥ ३. २. ७५ ॥

सर्वैकजरत्पुराणनवकेवलपूर्वापरप्रथमचरमजघन्यसमानमध्यमावराश्च ॥ ३. २. ७६ ॥

पूर्वकालोऽपरकालेन ॥ ३. २. ७७ ॥

दिक्संख्ये संज्ञायाम् ॥ ३. २. ७८ ॥

तद्धितार्थोत्तरपदसमाहारे च ॥ ३. २. ७९ ॥

न मत्वर्थे ॥ ३. २. ८० ॥

उपमानानि सामान्यवचनैः ॥ ३. २. ८१ ॥

उपमेयानि व्याघ्रसिंहऋषभपुण्डरीकपद्मपल्वकिसलयेन्दुचन्द्रादिभिः सामान्याप्रयोगे ॥ ३. २. ८२ ॥

कुत्सितानि स्वार्थवचनैः खसूचीखेटदुर्रूटचेलमुखहतकजाल्मापशदकौण्डस्पृष्टधृष्टधूर्तकितवादिभिः ॥ ३. २. ८३ ॥

पाषाणकहतदग्धादीनि कुत्सितैः ॥ ३. २. ८४ ॥

सन्महत्परमोत्तमोत्कृष्टपुमांसपूज्यमानैः ॥ ३. २. ८५ ॥

वृन्दारकनागकुञ्जरव्याघ्रसिंहशार्दूलवृषभर्षभपुङ्गवादिभिः पूज्यमानम् ॥३.२.८६॥

पोटायुवतिस्तोककतिपयगृष्टिधेनुधयाशावेहद्वष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैः जातिः ॥ ३. २. ८७ ॥

प्रशंसावचनैः मतल्लिकामचर्चिकाप्रकाण्डोद्धतल्लुञ्जकपादमिश्रपाशहस्तभिक्षिस्थलपाल्यादिभिः ॥ ३. २. ८८ ॥

चतुष्पादो गर्भिण्याँ ॥ ३. २. ८९ ॥

कृत्यतुल्याख्यान्यजात्या ॥ ३. २. ९० ॥

जातिर्जात्या ॥ ३. २. ९१ ॥

१. A. दुरूट

२. A. काण्डपृष्टस्पृष्ट-

३. A. वचनैश्च. The further portion is treated as a separate sūtra.

४. A adds युवाखलतिपलितवलिनजरद्भिः

वर्णो वर्णेन ॥ ३. २. ९२ ॥

कुमारश्रमणाप्रव्रजिताबन्धकीकुलटागर्भिणीतापसीदास्यध्यापकाभिरूपक - पण्डितकुशलनिपुणचपलपटुमृदुभिः ॥ ३. २. ९३ ॥

क्तेन नञ्विशिष्टेनानञ् ॥ ३. २. ९४ ॥

कृतापकृतभुक्ताभुक्तपीतविपीतगतप्रत्यागतयातानुयातक्रयाक्रयिकापुटापुटिका-फलाफलिकामानोन्मानिकाः ॥ ३. २. ९५ ॥

कतरकतमौ जातिपरिप्रश्ने ॥ ३. २. ९६ ॥

किं क्षेपे ॥ ३. २. ९७ ॥

किंशुककिंशुलुककिंपुरुषकिन्नरकिञ्जल्ककिन्दासादयः संज्ञायाम् ॥ ३. २. ९८ ॥

श्रोण्यूकपूगकुन्दमराशिनिचयराशिविशिष्टनिर्घनेन्द्रदेवमुण्डश्रमणभूतदान्या - ध्यापकब्राह्मणक्षत्रियपटुपण्डितकुशलचपलनिपुणाश्चेय्यर्थे कृतमतमितो-क्तभूतसमाज्ञाताख्यातसंभावितावितावधारितावकल्पितकलितनिराकृतो-पकृतापकृतोदाहृतोदीरितोदितदृष्टविश्रुतादिभिः ॥ ३. २. ९९ ॥

शाकपार्थिवजातौल्वलिकुतपसौश्रुतघृतरौड्योदनपाणिन्याणिमाण्डव्यबलाका - कौशिकविदर्भिकौण्डिन्यपरशुरामादयः प्रियादिलोपे ॥ ३. २. १०० ॥

अधिकान्ता संख्यासंख्ययाधिकलोपश्च ॥ ३. २. १०१ ॥

भागांशादिभिः पूरणान्ता लुक् च वा ॥ ३. २. १०२ ॥

मयूरच्छात्रौ व्यंसकेनोपमायां न चान्यसमासः ॥ ३. २. १०३ ॥

कम्बोजयवनौ मुण्डेन ॥ ३. २. १०४ ॥

एहीडायवाभ्यामन्यपदार्थे नपुंसकत्वे च ॥ ३. २. १०५ ॥

अपेहि च वाणिजस्वागतद्वितीयविघसप्रघसादिभिः क्रियायाम् ॥ ३. २. १०६ ॥

प्रेहि स्वागतवाणिजाभ्याम् ॥ ३. २. १०७ ॥

प्रोह कटकर्दमाभ्यां द्वितीया ॥ ३. २. १०८ ॥

कुन्धिभिन्ध्युत्तमाविचक्षपलवणचूडादिभिः ॥ ३. २. १०९ ॥

१. A. कृताकृत.
२. A adds च.
३. A. किंलुक.
४. A omits राशि
५. A. कण्ड
६. A. म्नाता.
७. A. This portion is written as a separate sūtra.
८. A. नोपया-
९. A. चानेन.
१०. A. This portion is written as a separate sūtra.
११. A. तुन्धिभिन्ध्युद्ध-

आहर चेलवसने वनिताभिः ॥ ३. २. ११० ॥

आख्यातमाख्यातेन सातत्ये ॥ ३. २. १११ ॥

उद्धरोत्सृजावसृजाभ्याम् ॥ ३. २. ११२ ॥

पचपतवपान्युदस्तैर्नैः ॥ ३. २. ११३ ॥

उन्मृजावमृजने ॥ ३. २. ११४ ॥

इहद्वितीयेहपञ्चम्येहिरेयाहिराहोपुरुषिकाहंपूर्विकाहंप्रथमिकामहमहमिकाविचप्रवनिश्चप्रचादयः ॥ ३. २. ११५ ॥

हि कर्मणा बहुलमाभीक्ष्ण्ये कर्तरि ॥ ३. २. ११६ ॥

स्नात्वाकालकपीत्वास्थिरकभुक्त्वासुहितप्रोप्यपार्पायउन्मत्तयाकलानिपत्यरोहिणीनिषद्यश्यामादयः ॥ ३. २. ११७ ॥

आचोवचोच्चनीचाचपराचोच्चावचाकिंचनाकुतोभयानि ॥ ३. २. ११८ ॥

पूर्वापराधरोत्तराण्येकदेशिनैकाधिकरणेन ॥ ३. २. ११९ ॥

सायाह्नमध्याह्नमध्यन्दिनमध्यरात्रादयः ॥ ३. २. १२० ॥

अर्धं समविभागे वा ॥ ३. २. १२१ ॥

अर्धजरतीयार्धवैशसार्धोक्तादयः ॥ ३. २. १२२ ॥

द्वितीयतृतीयचतुर्थतुर्यतुरीयतुलाग्रादयश्च ॥ ३. २. १२३ ॥

कालाः परिणामिना ॥ ३. २. १२४ ॥

नञ् ॥ ३. २. १२५ ॥

शोभिहिताहमर्थालमर्थतद्धितैरसामर्थ्ये ॥ ३. २. १२६ ॥

असूर्यंपश्यापुनर्गेयाश्राद्धभोज्यलवणभोज्यादयश्च ॥ ३. २. १२७ ॥

ईषद्गुणेन ॥ ३. २. १२८ ॥

षष्ठी ॥ ३. २. १२९ ॥

कृद्योगा ॥ ३. २. १३० ॥

याजकपूजकपरिचारकपरिवेषकस्नापकाध्यापकोत्सादकोन्मादकोद्वर्तकहोतृभर्त्रादयः ॥ ३. २. १३१ ॥

रथपत्ती गणकेन ॥ ३. २. १३२ ॥

१. A. पपान्युदनैनैः

२. A. This portion is written as part of the next sūtra.

३. A. अयोवचो

४. A. कृद्योगाकृति.

५. A. भर्त्रादिभिश्च

गुणोत्तरेण तरलोपश्च ॥ ३. २. १३३ ॥

सर्वपश्चात्प्रभृतीनि ॥ ३. २. १३४ ॥

तत्स्थैर्गुणैः ॥ ३. २. १३५ ॥

न निर्धारणे ॥ ३. २. १३६ ॥

प्रतिपदविधाना ॥ ३. २. १३७ ॥

पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन ॥ ३. २. १३८ ॥

मत्याद्यधिकरणक्तेन ॥ ३. २. १३९ ॥

कर्तृकर्महेतुनाकर्मणि ॥ ३. २. १४० ॥

कर्तर्यक्तेन ॥ ३. २. १४१ ॥

कर्तृतृजकाभ्याम् ॥ ३. २. १४२ ॥

नित्यं क्रीडाजीविकयोः ॥ ३. २. १४३ ॥

गतयः ॥ ३. २. १४४ ॥

कुः पापेषदर्थयोः ॥ ३. २. १४५ ॥

दुः निन्दाकृच्छ्रार्थयोः ॥ ३. २. १४६ ॥

स्वर्ता पूजायाम् ॥ ३ २. १४७ ॥

अतिशयातिक्रमणयोश्च ॥ ३. २. १४८ ॥

आङीषदर्थाभिव्याप्त्योः ॥ ३. २ १४९ ॥

प्रादयो गताद्यर्थे प्रथमया ॥ ३. २. १५० ॥

अत्यादयः क्रान्ताद्यर्थे द्वितीयया ॥ ३. २. १५१ ॥

अवादयः कुष्ठाद्यर्थे तृतीयया ॥ ३. २. १५२ ॥

पर्यादयो ग्लानाद्यर्थे चतुर्थ्या ॥ ३ २. १५३ ॥

निरादयः क्रान्ताद्यर्थे पञ्चम्या ॥ ३. २. १५४ ॥

अन्वादयस्तिङोदात्तवता गतिमता च ॥ ३. २. १५५ ॥

न कर्मप्रवचनीयाः ॥ ३. २. १५६ ॥

उपपदमतिङ् ॥ ३. २. १५७ ॥

नाव्ययेनानमा ॥ ३. २. १५८ ॥

१. A. गुणास्तरेण-

२. A. सवर्णश्चा-

३. A. This and the next sūtra are written together.

अमा च प्राक् खमुञः ॥ ३. २. १५९ ॥
तृतीयादीनि क्त्वा च वा ॥ ३. २. १६० ॥
अव्ययं प्रवृद्धादिभिः ॥ ३. २. १६१ ॥

इति श्रीसरस्वतीकण्ठाभरणनाम्नि व्याकरणे
तृतीयाध्यायस्य द्वितीयः पादः
समाप्तः

अथ तृतीयः पादः

शेषो बहुव्रीहिः ॥ ३. ३. १ ॥

अदूराधिकासन्नाः संख्यया संख्येये ॥ ३. ३. २ ॥

बहुव्रीहिः सुजर्थे ॥ ३. ३. ३ ॥

वार्थे च ॥ ३ ३. ४ ॥

अव्ययम् ॥ ३. ३. ५ ॥

अन्यपदार्थे ॥ ३. ३. ६ ॥

अस्तिक्षीरादयः ॥ ३. ३. ७ ॥

उपमानमुपमेयसरूपोत्तरपदलोपश्च ॥ ३. ३. ८ ॥

सप्तमीपूर्वसमानाधिकरणम् ॥ ३. ३. ९ ॥

समुदायविकारषष्ठी समस्तम् ॥ ३. ३. १० ॥

प्रादिभ्यो धातुजं वाच्योत्तरपदलोपः ॥ ३ ३. ११ ॥

नञोऽस्त्यर्थम् ॥ ३. ३. १२ ॥

अनेकं मतुपोऽर्थे ॥ ३. ३. १३ ॥

कर्तृकर्मप्रवचनमप्रथमायाः ॥ ३. ३. १४ ॥

दिङ्नामान्यन्तराले ॥ ३. ३. १५ ॥

तत्र गृहीत्वा तेन ग्रहत्येनि सरूपेऽधिक्रियाव्यतिहारे ॥ ३ ३. १६ ॥

सह तृतीयया तुल्यार्थयोगे ॥ ३ ३. १७ ॥

क्वचित् विद्यमानार्थे ॥ ३. ३. १८ ॥

चार्थे युगपदधिकरणवचनतायां द्वन्द्वः ॥ ३. ३. १९ ॥

दधिसर्पिर्मधूनि पयोमधुसर्पिभिरितरेतरयोगे ॥ ३. ३. २० ॥

इध्मावाग्नृचो बर्हिर्मनःसामभिः ॥ ३. ३. २१ ॥

१. A. संख्या सुजर्थे.
२. A adds च
३. A. युधिक्रि This portion is written as a separate sūtra.
४. A. सह तृतीयां
५. A adds च
६. A. तायाः
७. A. धुनी
८. A. सामिभिः

आदिरवसानेन ॥ ३. ३. २२ ॥

शुक्लः कृष्णेन ॥ ३. ३. २३ ॥

श्रद्धा मेधया ॥ ३. ३. २४ ॥

मेधादीक्षाश्रुताध्ययनानि च तपसा ॥ ३. ३. २५ ॥

याज्याप्रवर्ग्योलूखलान्यनुवाक्योपसदमुसलैः ॥ ३. ३. २६ ॥

हरिब्रह्मशिवस्कन्दपरिव्रज्याद्या वासवप्रजापतिवैश्रवणविशाखकौशिकादिभिः॥ ३. ३. २७ ॥

अधिकरणैतावत्त्वे ॥ ३. ३. २८ ॥

समीपे वा ॥ ३. ३. २९ ॥

संख्याविंशत्यादिभिः संख्यायां समाहारे ॥ ३. ३ ३० ॥

अनुवादे चरणाः खेणोर्लुङि ॥ ३. ३. ३१ ॥

अनपुंसकान्यध्वर्युक्रतवः ॥ ३. ३. ३२ ॥

अध्ययनतः सन्निकृष्टानि ॥ ३ ३. ३३ ॥

अप्राणिजातयः ॥ ३. ३. ३४ ॥

नदीदेशनगराणि भिन्नलिङ्गानि ॥ ३. ३. ३५ ॥

नित्यवैराः ॥ ३. ३. ३६ ॥

कारवः ॥ ३. ३. ३७ ॥

गवाश्वगवाविकगवैडकाजाविकाजैडकानि ॥ ३. ३. ३८ ॥

कुब्जवामनकुब्जकिरातपुत्रपौत्रश्वचण्डालस्त्रीकुमारदासीदासदासीमाणवकोष्ट्रखरोष्ट्रशशभागवतीभागवतानि ॥ ३. ३. ३९ ॥

शाटीप्रच्छदकुटीकुटमूत्रशकृन्मूत्रपुरीषयकृन्मेदोमांसशोणितदर्भशरदर्भपूतीकार्जुनपुरुषतृणोलपानि ॥ ३. ३. ४० ॥

प्राणितूर्याङ्गानि ॥ ३. ३. ४१ ॥

१. A. This and the next sūtra are written together.

२. A. शुक्लकृष्णेन

३. A. This portion is written as a separate sūtra.

४. A. लुङि.

५. A. This and the next sūtra are written together.

६. A. This portion is written as a separate sūtra.

७. A. बकोष्ट्रशशभागवतानि

सेनाङ्गानि बहुत्वे ॥ ३. ३. ४२ ॥

क्षुद्रजन्तवः ॥ ३. ३. ४३ ॥

फलानि ॥ ३. ३. ४४ ॥

वा वृक्षमृगतृणधान्यशकुनिविशेषाः ॥ ३. ३. ४५ ॥

व्यञ्जनानि ॥ ३. ३. ४६ ॥

[1]विरोधीन्यद्रव्याणि ॥ ३. ३. ४७ ॥

शेषमुभयोः ॥ ३. ३. ४८ ॥

प्रायेण पूर्वपदार्थप्रधानोऽव्ययीभावः ॥ ३. ३. ४९ ॥

उत्तरपदार्थप्रधानस्तत्पुरुषः ॥ ३. ३. ५० ॥

अन्यपदार्थप्रधानो बहुव्रीहिः ॥ ३. ३. ५१ ॥

उभयपदार्थप्रधानो द्वन्द्वः ॥ ३. ३. ५२ ॥

कर्मधारये प्रधानोपसर्जनानां परं परं विप्रतिषेधे ॥ ३. ३. ५३ ॥

मत्वर्थीयार्थकर्मधारयात् बहुव्रीहिः ॥ ३. ३. ५४ ॥

कदाचित्कर्मधारयः सर्वधनाद्यर्थः ॥ ३. ३. ५५ ॥

पूर्वपदातिशय आतिशयिकात् बहुव्रीहिः सूक्ष्मतरवस्त्राद्यर्थः ॥ ३. ३. ५६ ॥

उत्तरपदातिशय आतिशायिको बहुव्रीहिः बह्वाढ्यतराद्यर्थः ॥ ३. ३. ५७ ॥

उपसर्जनं पूर्वम् ॥ ३. ३. ५८ ॥

राजदन्तलिप्तवासितसिक्तसंमृष्टमृष्टलुञ्चितनग्नमुषितावक्लिन्नपक्वार्पितोत्तमार्णाधमर्णोत्तमर्णपरशतपरःसहस्रादिषु परम् ॥ ३. ३. ५९ ॥

बिम्बोष्ठबिम्बाधरपुरुषोत्तमादिषु वा ॥ ३. ३. ६० ॥

इदु द्वन्द्वे ॥ ३. ३. ६१ ॥

न स्वातिश्चित्रायाः ॥ ३. ३. ६२ ॥

पतिर्भार्यायाः ॥ ३. ३. ६३ ॥

जायाया जं दं च वा ॥ ३. ३. ६४ ॥

पशुश्च पुत्रात् ॥ ३. ३. ६५ ॥

१. A. विरेधिन्य-

२. B. This and the following three sūtras are written as part of the commentary.

३. A. धान्यावल्कः

४. A. सूक्ष्मतराद्यर्थः

५. A omits मृष्ट-

श्मश्रु केशात् ॥ ३. ३. ६६ ॥
जानुबिन्दू[1] शिरसः ॥ ३. ३. ६७ ॥
सर्पिर्मधुदीर्घलघुगुणवृध्यादिषु वा ॥ ३. ३. ६८ ॥
अजाद्यदन्तम् ॥ ३. ३. ६९ ॥
न शूद्रार्यावन्त्यश्मकाविष्वक्सेनार्जुनादिषु ॥ ३. ३. ७० ॥
धर्मार्थकामार्थशब्दार्थाद्यन्ताग्नीन्द्रचन्द्रार्कादिषु वा ॥ ३. ३. ७१ ॥
अल्पाच्तरम् ॥ ३. ३. ७२ ॥
नोलूखलमुसलतण्डुलकिण्वचित्ररथवाहिकस्नातकराजन्नक्षिभ्रुवदारगवोशीर-
बीजादिषु ॥ ३. ३. ७३ ॥
समीरणाग्न्यादित्यचन्द्रपाणिनीयरौढीयादिषु वा ॥ ३. ३. ७४ ॥
लघ्वक्षरम् ॥ ३. ३. ७५ ॥
न श्रद्धातपसादिषु ॥ ३. ३. ७६ ॥
शकृन्मूत्रकुशकाशादिषु वा ॥ ३. ३. ७७ ॥
अभ्यर्हितम् ॥ ३. ३. ७८ ॥
नै नरनारायणादिषु ॥ ३. ३. ७९ ॥
तपःश्रुतादिषु वा ॥ ३. ३. ८० ॥
मासर्तुनक्षत्राण्यानुपूर्व्येण ॥ ३. ३. ८१ ॥
न पुष्यपुनर्वस्वादिषु ॥ ३. ३. ८२ ॥
वसन्तग्रीष्मादिषु वा ॥ ३. ३. ८३ ॥
ज्यायान् भ्रातृणाम् ॥ ३. ३. ८४ ॥
न पाण्डुधृतराष्ट्रादिषु ॥ ३. ३. ८५ ॥
भीमसेनार्जुनादिषु वा ॥ ३. ३. ८६ ॥
वर्णानां च ॥ ३. ३. ८७ ॥
बहुपूत्क्रमश्च ॥ ३. ३. ८८ ॥
संख्यानामल्पीयँः ॥ ३. ३. ८९ ॥

१. A omits this sūtra
२. A. विरु
३. B. गोलूखल
४. A. रौडियादिषु.
५. A. कादिषु.
६ A omits न
७. A कल्पीयः

बहुव्रीहौ च ॥ ३. ३. ९० ॥

सर्वनाम च सर्वतः ॥ ३. ३. ९१ ॥

विशेषणम् ॥ ३. ३. ९२ ॥

प्रियो वा ॥ ३. ३. ९३ ॥

सप्तमी ॥ ३. ३. ९४ ॥

गङ्गादिभ्यो वा ॥ ३. ३. ९५ ॥

नेन्द्रादिभ्यः ॥ ३. ३. ९६ ॥

प्रहरणेभ्यश्च ॥ ३. ३. ९७ ॥

क्तान्तं वा ॥ ३. ३. ९८ ॥

नित्यं शेषे ॥ ३. ३. ९९ ॥

आहिताग्निर्जातपुत्रजातदन्तजातश्मश्रुपतिघृतपीततैलपीतमद्यपीतविषोढभार्या-गतार्थविच्छिन्नशीर्षादिषु[1] वा ॥ ३. ३. १०० ॥

जातिकालसुखादिभ्यश्च ॥ ३. ३. १०१ ॥

कडारगडुलकाणखञ्जकुण्टकहोडखलतिगौरपिङ्गलवृद्धभिक्षुकंवठरतनवः[2]कर्मधारये ॥ ३. ३. १०२ ॥

सरूपाणामेकशेष एकविभक्तौ ॥ ३. ३. १०३ ॥

स्वरभिन्नानां यस्योत्तरस्वरविधिः ॥ ३. ३. १०४ ॥

विरूपाणामप्येकार्थानाम् ॥ ३. ३. १०५ ॥

पौत्रादिजीवद्भृत्यादिना तान्निमित्त एव चेद्विशेषः ॥ ३. ३. १०६ ॥

स्त्रीपुंवच्च ॥ ३. ३. १०७ ॥

पुमान् स्त्रिया ॥ ३. ३. १०८ ॥

ग्राम्यपशुसंघेष्वतरुणानेकशफेषु स्त्री ॥ ३. ३. १०९ ॥

नपुंसकमनपुंसकेनैकवच्चास्य वा ॥ ३. ३. ११० ॥

पितृश्वशुरौ मातृश्वश्रूभ्याम् ॥ ३. ३. १११ ॥

भ्रातृपुत्रौ स्वसृदुहितृभ्याम् ॥ ३. ३. ११२ ॥

त्यदादीनि सर्वैर्नित्यम् ॥ ३. ३. ११३ ॥

१. B omits जातपुत्र

२. A. गतार्थाच्छिन्न.

३. A. कबरे तनवः

४ A. दीनां

५. A. सर्वैस्त्यदादीनि

तेषामद्वन्द्वतत्पुरुषविशेषणानां पुंनपुंसकतो लिङ्गानि ॥ ३. ३. ११४ ॥
तेषां मिथो यत्परम् ॥ ३. ३. ११५ ॥
क्वचित्पूर्वं च ॥ ३. ३. ११६ ॥
पुरुषाणां च ॥ ३. ३. ११७ ॥
अव्ययीभावो नपुंसकम् ॥ ३. ३. ११८ ॥
द्वन्द्वः समाहार एकवच्च ॥ ३. ३. ११९ ॥
द्विगुश्च ॥ ३. ३. १२० ॥
[1]अदन्तः स्त्री ॥ ३. ३. १२१ ॥
[2]पात्रपथयुगभुवनाद्यन्तो नपुंसकम् ॥ ३. ३. १२२ ॥
[3]षष्ठ्याः कन्थोशीनरेषु तत्पुरुषः संज्ञायाम् ॥ ३. ३. १२३ ॥
उपज्ञोपक्रमं तदादित्वे ॥ ३. ३. १२४ ॥
ईश्वरार्थादराज्ञः सभा ॥ ३. ३. १२५ ॥
यक्षराक्षसपिशाचादिभ्यश्च[4] ॥ ३. ३. १२६ ॥
अशाला[5] ॥ ३. ३. १२७ ॥
सेना सुरा शाला निशा वा ॥ ३. ३. १२८ ॥
छाया ॥ ३. ३. १२९ ॥
नित्यं बाहुल्ये ॥ ३. ३. १३० ॥
पथोऽव्ययात् ॥ ३. ३. १३१ ॥
रात्राह्नवाकाः पुंसि ॥ ३. ३. १३२ ॥
अहोऽसुदिनपुण्याभ्याम् ॥ ३. ३. १३३ ॥
नपुंसके चार्धचार्धाष्टापदसुवर्णशतमानकार्षापणवारवाणगन्धमादनान्धकारापरा-
द्वापूर्वोपवासनिर्यासविमानप्रग्रीवप्रवालवाजपेयराजसूयप्रतिस्वरादिर्षु ॥
३. ३. १३४ ॥
परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः ॥ ३. ३. १३५ ॥
एकविंशत्यादीनां च ॥ ३. ३ १३६ ॥

१. A. परः
२. A. अदन्तस्त्रीवाबन्तः
३. A adds अनो नलोपश्च before this as a separate sūtra.
४. A. This is written as three different sūtras.
५. A omits च.
६. A. अशालायाः
७. A. सदि.
८. A. सरादयः

न प्राप्तापन्नगत्यलंपूर्वाणाम् ॥ ३. ३. १३७ ॥
पूर्ववदश्वबडवौ ॥ ३. ३. १३८ ॥
ह्रस्वो नपुंसके प्रातिपदिकस्य ॥ ३. ३. १३९ ॥
गोरुपसर्जनस्यान्त्यस्य ॥ ३. ३. १४० ॥
टाबादीनाम् ॥ ३. ३. १४१ ॥
लुक्तद्धितलुक्यगोणीसूक्ष्योः ॥ ३. ३. १४२ ॥
लुपि प्रकृतिवल्लिङ्गवचने ॥ ३. ३. १४३ ॥
विशेषणानां चाजातेः ॥ ३. ३. १४४ ॥
न मनुष्ये ॥ ३. ३. १४५ ॥
समास उत्तरपदस्य ॥ ३. ३. १४६ ॥
हरीतक्यादिषु व्यक्तिः ॥ ३. ३. १४७ ॥
खलतिकादिषु वचनम् ॥ ३. ३. १४८ ॥

इति श्रीसरस्वतीकण्ठाभरणनाम्नि व्याकरणे
तृतीयस्याध्यायस्य तृतीयः पादः
समाप्तः

---

१. A omits this sūtra.

अथ चतुर्थः पादः

——: o :——

स्त्रियाम् ॥ ३. ४. १ ॥

अतष्टाप् ॥ ३. ४. २ ॥

अजैडककोकिलाश्वचटकमूषिकेभ्यः ॥ ३. ४. ३ ॥

बालहोडपाकवत्समन्दविलातेभ्यश्च ॥ ३. ४. ४ ॥

पूर्वापहानापरापहनसंप्रहानेभ्यो नस्य च णः ॥ ३. ४. ५ ॥

संभस्त्राजिनशणपिण्डेभ्यः फलात् ॥ ३. ४. ६ ॥

त्रेश्च ॥ ३. ४. ७ ॥

सत्प्राक्काण्डप्रान्तशतैकेभ्यः पुष्पात् ॥ ३. ४. ८ ॥

मूलान्नञः ॥ ३. ४. ९ ॥

शूद्राचामहत्पूर्वाज्जातिः ॥ ३. ४. १० ॥

कन्यकनिष्ठज्येष्ठमध्यमध्यममुग्धेभ्यः ॥ ३. ४. ११ ॥

कुङ् देविविड्भ्याम् ॥ ३. ४. १२ ॥

उष्णिहो वा ॥ ३. ४. १३ ॥

ऋचि पादः ॥ ३. ४. १४ ॥

ऋनो ङीप् ॥ ३. ४. १५ ॥

अधातोरुगितः ॥ ३. ४. १६ ॥

अञ्चः ॥ ३. ४. १७ ॥

अहशो वनो र च ॥ ३. ४. १८ ॥

बहुव्रीहेर्वा ॥ ३. ४. १९ ॥

पादः ॥ ३. ४. २० ॥

अनः ॥ ३. ४. २१ ॥

नित्यं संज्ञायाम् ॥ ३. ४. २२ ॥

ऊधसो नश्च ॥ ३. ४. २३ ॥

दाम्नः संख्यादेः ॥ ३. ४. २४ ॥

१. A. नाम्नः

हायनाद्वयसि ॥ ३. ४. २५ ॥

नानुपधालोपिनः ॥ ३. ४. २६ ॥

मनः ॥ ३. ४. २७ ॥

ङाप् चोभ्याम् ॥ ३. ४. २८ ॥

न स्वस्रादुहितृननान्दृयातृमातृतिस्रचतसृपञ्चन्नादिभ्यः ॥ ३. ४. २९ ॥

अनुपसर्जनादतः ॥ ३. ४. ३० ॥

टिड्ढाणञ्ठक्ठञ्नञ्स्नञ्कञ्क्वरप्ख्युनः ॥ ३. ४. ३१ ॥

न लक्ष्यान्यागमटितः ॥ ३. ४. ३२ ॥

यञोऽषावटात् ॥ ३. ४. ३३ ॥

सर्वतः ष्फो वा ॥ ३. ४. ३४ ॥

लोहितादिभ्यश्शकलपर्यन्तेभ्यो नित्यम् ॥ ३. ४. ३५ ॥

कौरव्यादसुरिमाण्डूकेभ्यो ङित् ॥ ३. ४. ३६ ॥

वयस्यचरमे ॥ ३ ४. ३७ ॥

कुमारादनूढायां च ॥ ३. ४. ३८ ॥

द्विगोः ॥ ३. ४. ३९ ॥

परिमाणात् तद्धितलुक्यसंख्याकालविस्ताचितकम्बल्यात् ॥ ३. ४. ४० ॥

काण्डादक्षेत्रे ॥ ३. ४. ४१ ॥

पुरुषाद्वा ॥ ३. ४. ४२ ॥

केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजेभ्यः संज्ञायाम् ॥ ३.४.४३॥

नुक्चान्तर्वतो गर्भिण्याम् ॥ ३. ४. ४४ ॥

पतिवतो भार्यायाम् ॥ ३. ४. ४५ ॥

पत्युर्न ऊढायाम् ॥ ३. ४. ४६ ॥

सपूर्वस्य वा ॥ ३. ४. ४७ ॥

बहुव्रीहौ ॥ ३. ४. ४८ ॥

१. A. This and the next sūtra are written together.

२. A. चजोषा.

३. A omits पर्य.

४. A. सुमाण्डू-

५. A. This and the next sūtra are written together.

६. B. नुक्य-

७. A. This and the next sūtra are written together.

समानैकवीरपिण्डभ्रातृपुत्रेभ्यः ॥ ३. ४. ४९ ॥

इयेतैतहरितरोहिताद्भ्रातश्च नः ॥ ३. ४. ५० ॥

क्रोऽसितपालिताभ्याम् ॥ ३. ४. ५१ ॥

पितो ङिष् ॥ ३. ४. ५२ ॥

गौरशबलकलमाषसारङ्गपिशङ्गहरिणपाण्डरामरसुन्दरविकलनिष्कलपुष्कले - भ्यः ॥ ३. ४. ५३ ॥

बृहन्महत्तरश्रौरतापसदासचेटविटभिक्षुकबन्धकपुत्रगायत्रेभ्यः ॥ ३. ४. ५४ ॥

मत्स्यमनुष्यमुकयहयगर्वयर्ष्यद्रुणौकणक्रोष्टुतक्षश्वानडुद्भ्यः ॥ ३. ४. ५५ ॥

भौरिकिभौलिकिभौलिङ्गयौद्वाहमान्यालम्ब्यालम्ब्यालक्षिसौधर्मायस्थूणारद्गौ - तमापश्चिकेभ्यः ॥ ३. ४. ५६ ॥

दोटनाटनटपाटसृपाटमूलाटपेटपटपटलपुटकुटफाण्टसेभ्यः ॥ ३. ४. ५७ ॥

धातककेतकतर्कारशर्कारबदरकुवललवलामलकमालतवेतसातसाढकेभ्यः ॥ ३. ४. ५८ ॥

कदरकदलगुलूचवाकुचनाचमाचकुम्भकुसुम्भयूथमेथकरीरसल्लकवल्लकेभ्यः ॥ ३. ४. ५९ ॥

पिप्पलहरीतककोशातकशमतमसुषवशुङ्गभृङ्गबिम्बवर्बरशष्कुण्डापिण्डमण्ड - लेभ्यः ॥ ३. ४. ६० ॥

यूपसूपशूर्पसूर्मसहमठपिठरोदगुर्दपृथिवस्वारकाकणेभ्यः ॥ ३. ४. ६१ ॥

द्रोणबृसासन्दालिन्दकन्दलदेहलशष्कुलशचसूचमञ्जरालजवैजयन्तेभ्यः ॥ ३. ४. ६२ ॥

काकादनगोवादनतेजनरजनदोहनशातनपातनसेचनकार्दनपाटनपेषणास्तरणा - स्थानाधिकरणप्रस्थवरोहणाग्रहायणेभ्यः ॥ ३. ४. ६३ ॥

एषणात्करणे ॥ ३. ४. ६४ ॥

१. A. गवयर्श्य-
२. A. नडुभ्यः
३. A. भौलिङ्गयोद्वाहनालङ्ग्यापनलब्ध्या-
४. A. मापकेभ्यः
C. मापश्चिकेभ्यः
५. A. मूलाटयपोट-
६. A. शुष्क-
७. A. ण्डबर्बर-
८. A omits मण्डलेभ्यः
९. A omits this sūtra.
१०. A. शवादन.
११. A. सचन
१२. A. पूरणा-

सुमङ्गलात् संज्ञायाम् ॥ ३. ४. ६५ ॥
पीनाच्च ॥ ३. ४. ६६ ॥
रेवद्रोहिणाभ्यां नक्षत्रे ॥ ३. ४. ६७ ॥
कटाच्छ्रोण्याम् ॥ ३. ४. ६८ ॥
कूष्माण्डाद्यश्च ॥ ३. ४. ६९ ॥
भाजगोणनागस्थलकुण्डकालकुशकामुककबरेभ्यः पक्वावपनस्थूलाकृत्रिमामत्र - कृष्णायसीरिरंसुकेशवेशेषु ॥ ३. ४. ७० ॥
जानपदाद्वृत्तौ ॥ ३. ४. ७१ ॥
नीलात्प्राण्योषध्योः ॥ ३. ४. ७२ ॥
वा संज्ञायाम् ॥ ३. ४. ७३ ॥
शोणचण्डारालकमलकृपणविकटविशालविशङ्कटभरुजध्वजकल्याणोदारपुरा - णाहन्भ्यः ॥ ३. ४. ७४ ॥
चान्द्रभागादनद्याम् ॥ ३. ४. ७५ ॥
एरक्तिनः ॥ ३. ४. ७६ ॥
पङ्क्तेश्च ॥ ३. ४. ७७ ॥
शक्तेः शस्त्रे ॥ ३. ४. ७८ ॥
ओर्गुणादखरुसंयोगोपधात् ॥ ३. ४. ७९ ॥
पुंनाम्नः पुंयोगादपालकान्तात् ॥ ३. ४. ८० ॥
पूतक्रतुवृषाकप्यग्निकुसितकुसीदनामै च ॥ ३. ४. ८१ ॥
मनोरौ च वा ॥ ३. ४. ८२ ॥
सूर्या देवतायाम् ॥ ३. ४. ८३ ॥
इन्द्रवरुणभवशर्वरुद्रमृडाचार्याणामानुक् च ॥ ३. ४. ८४ ॥
मातुलोपाध्यायाभ्यां वा ॥ ३. ४. ८५ ॥
आर्यक्षत्रियाभ्यां चापुंयोगे ॥ ३. ४. ८६ ॥
हिमारण्याभ्यां महत्वे ॥ ३. ४. ८७ ॥
यवाद्दोषे ॥ ३. ४. ८८ ॥

१. B. सुमङ्गलाच
२. A. श्रोभ्याम्.
३. A. पा-
४. A. ह्यभ्यः
५. A. भागा नद्याम्.
C. चन्द्रभागा-
६. A. This portion is written as a separate sūtra.

यवनाल्लिप्याम् ॥ ३. ४. ८९ ॥
क्रीतात्करणादेः ॥ ३. ४. ९० ॥
स्फादल्पोक्तौ ॥ ३. ४. ९१ ॥
स्वाङ्गादेरकृतमितजातप्रतिपन्नाद्वहुव्रीहेः ॥ ३. ४. ९२ ॥
पाणिगृहीत्यूढा ॥ ३. ४. ९३ ॥
अनाच्छादनजात्यादेर्वा ॥ ३. ४. ९४ ॥
संज्ञायाम् ॥ ३. ४. ९५ ॥
स्वाङ्गादुपसर्जनादसंयोगोपधादबह्वचः ॥ ३. ४. ९६ ॥
नासिकोदरोष्ठजङ्घादन्तकर्णशृङ्गाङ्गगात्रकण्ठात् ॥ ३. ४. ९७ ॥
पुच्छात् ॥ ३. ४. ९८ ॥
कबरमणिविषशरादेः ॥ ३. ४. ९९ ॥
उपमानादेश्च ॥ ३. ४. १०० ॥
पक्षात् ॥ ३. ४. १०१ ॥
न क्रोडखुरगुदशफवालभालगलभगोखघोणादिभ्यः ॥ ३. ४. १०२ ॥
सिंहनञ्विद्यमानादेः ॥ ३. ४. १०३ ॥
नखमुखात्संज्ञायाम् ॥ ३. ४. १०४ ॥
सक्थ्यशिश्वी ॥ ३. ४. १०५ ॥
अस्त्रीविषयादयोपधाज्जातेः ॥ ३. ४. १०६ ॥
पाककर्णपुष्पफलमूलवालान्ताच्च ॥ ३. ४. १०७ ॥
इतो मनुष्यजातेः ॥ ३. ४. १०८ ॥
इभः ॥ ३. ४. १०९ ॥
ऊङुतः ॥ ३. ४. ११० ॥
बाह्वन्तात्कुकमण्डलुभ्यः संज्ञायाम् ॥ ३. ४. १११ ॥
पङ्गोः ॥ ३. ४. ११२ ॥
श्वशुरस्योदन्तलोपश्च ॥ ३. ४. ११३ ॥
ऊरोरुपमानसंहितसहितसहसफवामलक्षणादेः ॥ ३. ४. ११४ ॥
अरज्ज्वादेरप्राणिनो वा ॥ ३. ४. ११५ ॥

१. A. गृहीतीरूढा.
२. A. सनञ्.
३. A. सिंहसिहितसहसफलामल-

अतो ङीन् ॥ ३. ४. ११६ ॥

शृङ्गरुवहतुकपटुगुल्गुलुगोतमब्रह्मभ्योऽणः ॥ ३. ४. ११७ ॥

कमण्डलुवानिधिब्रह्मकृताशोकाकैकसीभ्यो ढकः ॥ ३. ४. ११८ ॥

मुञ्जवात्साभ्यां फकः ॥ ३. ४. ११९ ॥

शिबिकपिभ्यां ज्यङः ॥ ३. ४. १२० ॥

अहमरथाद्यञ्ञः ॥ ३. ४. १२१ ॥

आङ्पर्याङ्भ्यामीहेरिनः ॥ ३. ४. १२२ ॥

वतण्डारालचण्डालेभ्यः ॥ ३. ४. १२३ ॥

भोगवद्गौरिमतोः संज्ञायाम् ॥ ३. ४. १२४ ॥

नृनरयोः वृद्धिश्च ॥ ३. ४. १२५ ॥

यङश्चाप् ॥ ३. ४. १२६ ॥

यञश्चषावटात् ॥ ३. ४. १२७ ॥

यूनस्तिः ॥ ३. ४. १२८ ॥

वह्वज्गुरूपान्तानार्षगोत्राणिञोरन्त्यस्य ष्यङ् ॥ ३. ४. १२९ ॥

कुलाख्यानाम् ॥ ३. ४. १३० ॥

कौडिलाडिव्याड्यापक्षित्यापिशलिसौधातकिभौरिकिभौलिकिशालमलिका-
पिष्ठलिदैवदत्त्यादीनाम् ॥ ३. ४ १३१ ॥

चौपयतचैकयतचैटयतबैल्वयतसैकयतानां च ॥ ३. ४. १३२ ॥

भोजस्य क्षत्रियायाम् ॥ ३. ४. १३३ ॥

सूतस्य युवत्याम् ॥ ३. ४. १३४ ॥

दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकण्ठेविद्धीनां वा ॥ ३. ४. १३५ ॥

इति श्रीसरस्वतीकण्ठाभरणनाम्नि व्याकरणे
तृतीयाध्यायस्य चतुर्थः पादः
समाप्तः

---

१. A. शृङ्ग-
C. सङ्गरु-
२. A. निति ब्रह्म
३. A. मुञ्जवसाभ्यां
B. मुण्ड-
४. A. शबि.
५. मिमे-
६. A. वहात्.
७. A. This and the next sūtra are written together.
८. B breaks off from here to the end of the work.

॥ अथ चतुर्थोऽध्यायः ॥

प्राग्जितादण् ॥ ४. १. १ ॥

दित्यदित्यादित्यपत्यमेभ्यो ण्यः ॥ ४. १. २ ॥

पत्युत्तरपदाच्छ[2] ॥ ४ १. ३ ॥

अश्वशतधनगणराष्ट्रकुलगृहपशुधान्यधर्मधन्वन्सभाप्राणसेनाक्षेत्रादिपूर्वादण् ॥ ४. १. ४ ॥

अः स्यान्नः ॥ ४. १. ५ ॥

लोम्नोऽपत्येषु ॥ ४. १. ६ ॥

पृथिव्या अञ् ॥ ४. १. ७ ॥

अञ् ॥ ४. १. ८ ॥

उत्सोदपानविकरविनदतरुणतलुनधेनुपीलुकुणसवर्णवृषदंशेभ्यः ॥ ४. १. ९ ॥

भरतकुरुसत्वतेन्द्रावसानजनपदपञ्चालोशीनरेभ्यः ॥ ४. १. १० ॥

त्रिष्टुबनुष्टुप्कुधुष्णिक्पङ्क्तिजगतीबृहतीभ्यः ॥ ४. १. ११ ॥

बृहन्महद्रथन्तरमध्यन्दिनभल्लकीयमहानदमहानसमहाप्राणेभ्यः ॥ ४. १. १२ ॥

बष्कयादसमासे ॥ ४. १. १३ ॥

उदस्थानादेशे ॥ ४. १. १४ ॥

ग्रीष्मादच्छन्दसि ॥ ४. १. १५ ॥

देवाद्यञ् च ॥ ४. १. १६ ॥

बहिषष्टीकक् च ॥ ४. १. १७ ॥

द्विगोरनपत्येऽजादेर्लुगद्विः ॥ ४. १. १८ ॥

१. C. यमाण्यः

२. A omits this sūtra.

३. A. क्रुद्धय

४. C. क्षत्राधि-

५. C omits this sūtra.

६. C omits this sūtra.

७. A. उदकपानवकरण-

८. A. पृष्टदंशेभ्यः

९. A. ष्ठिककू

१०. A. This portion is written as a separate sūtra.

प्राग्वतेरञ्निकलिभ्यां ढक् ॥ ४. १. १९ ॥

स्त्रीपुंसाभ्यां नञ्स्नञौ ॥ ४. १. २० ॥

भावे वा ॥ ४. १. २१ ॥

गोरचि यत् ॥ ४. १. २२ ॥

तस्यापत्यम् ॥ ४. १. २३ ॥

आद्यात् ॥ ४. १. २४ ॥

पौत्रादेरस्त्रियां गुर्वायत्ते ॥ ४. १. २५ ॥

अत इञ् ॥ ४. १. २६ ॥

प्राग्णो विदादिभ्यः शेषे ॥ ४. १. २७ ॥

उदङ्कादिभ्यश्च ॥ ४. १. २८ ॥

बाह्वृपबाह्वृपबिन्दुजधेनुचटाकुशिवाकुभ्यो गोत्रादिभ्यः ॥ ४. १. २९ ॥

वृकलाकुकलाचूडाबलाकाजङ्घाछगलाभगलालेहकाध्रुवकाधुवकामुषिकासुमित्रादुर्मित्राभ्यः ॥ ४. १. ३० ॥

युधिष्ठिरार्जुनरामसङ्कर्षणकृष्णगदप्रद्युम्नसाम्बसत्यकशूरासुराजीगर्तेभ्यः ॥ ४. १. ३१ ॥

सुधावत्पुष्पकरसदनुरहदनडुत्पञ्चसप्ताष्टक्षेमवृद्धिमाषशराविशृङ्खलातोदिखर-नादिभ्यः ॥ ४. १. ३२ ॥

प्राकारनगराभ्यां मर्दिनः ॥ ४. १. ३३ ॥

इन्द्राग्निदेवेभ्यः शर्मणः ॥ ४. १. ३४ ॥

उदश्वः संज्ञायाम् ॥ ४. १. ३५ ॥

कुसुभ्यां नाम्नः ॥ ४. १. ३६ ॥

शिरोलोमभ्याम् ॥ ४. १. ३७ ॥

संभूयाभ्यामितौजःशलङ्कूनां लोपश्च ॥ ४. १. ३८ ॥

व्याससुधातृवरुटनिषादचण्डालबिम्बानामकङ् च ॥ ४. १. ३९ ॥

१. A. This portion is written as a separate sūtra.

२. A. प्रागणोऽञ्च

३. A. उदकादि-

४. A. लभकाध्रुवका-

५. A. सप्तार्वाष्ट-

६. A. प्रगारनगराभ्यां मदिनः

७. A. संभूयाद्योमितौजश्छलङ्कूनाम् ।

८. A. बिम्बादीनामकच्च

पुनर्भूपुत्रदुहितृननान्दृनिषादेभ्योऽनन्तरेञ् ॥ ४ १. ४० ॥

परस्त्रियाः परशुश्च ॥ ४. १. ४१ ॥

बिदोर्वकश्यपकुशिकभरद्वाजोपमन्युकिलातविदर्भविश्वानरर्ष्टिषेणेभ्यः पौत्रादौ ॥ ४. १. ४२ ॥

ऋतभागहर्यश्वप्रियकापस्तम्बकुचवारशरद्वच्छुनकधेनुभ्यः ॥ ४. १. ४३ ॥

गोपवनशिग्रुबिन्दुभाजनाश्वावतानश्यामाकशम्बकश्यापर्णेभ्यः ॥ ४. १. ४४ ॥

हरितकिन्दासवह्यस्कार्कलूषवध्योगविष्णुवृद्धप्रतिबोधरथीतररथन्तरगविष्ठिरगविष्ठिलनिषादशम्बरमठरसूदारुपूदाकुभ्यश्च ॥ ४. १. ४५ ॥

गर्गवत्सबाजव्याघ्रपात्संकृतिप्राचीनयोगपुलस्तिरेभशौटशङ्खाग्निवेशेभ्यो यञ् ॥ ४. १. ४६ ॥

धूमावटचमसनमस्वधनञ्जयतृक्षविश्वावसुजरमाणकुरुकतानडुद्भ्यः ॥ ४. १. ४७ ॥

मनुमनायीसूनुस्रुकर्षर्ककथकाक्षतरुक्षतलुक्षतण्डवतण्डकविकतेभ्यः ॥ ४. १. ४८ ॥

शकलकण्वगोकक्षागस्त्यकुण्डिनीयञ्चवल्कपर्णवल्कभर्यजातविरोहितवृषगणरङ्गगणशौण्डिलमुद्गलेभ्यः ॥ ४. १. ४९ ॥

मुसलोलूकजतुकर्णमन्त्रिताश्मरथशर्कराक्षपूतिमाषस्थूरारगतापिङ्गलताकृष्णगोलन्देभ्यः ॥ ४. १. ५० ॥

भिषक्तितिक्षाभडितभण्डितचिकितेन्द्रद्रुदेवद्रुपिप्पलवेकलूवृहदग्निजमदग्निपराशरेभ्यः ॥ ४. १. ५१ ॥

दल्भकुलटकुटीगुचणकचुलुकोजकर्कटालापिन्सवर्णसुवर्णसुलाभिद्विदर्दादिभ्यः ॥ ४. १. ५२ ॥

त्राजादसमासे ॥ ४. १. ५३ ॥

मधोर्ब्राह्मणे ॥ ४. १. ५४ ॥

१. A. स्त्यापरशुक् च
२. A. दर्भेभ्यः
३ A. सद्कुपृषाकुभ्यः
४. C. वत्सव्याज
५. C. संस्कृति
६. A. सदसङ्ख्यानिवेशेभ्यः
७. A. नरमाण
८. A. कर्षकाक्षतरूक्ष
९. A. कर्तेभ्यः
१०. A and C. वर्णवल्क
११. A. भ्रय
१२. A. तण्डिल
१३. A. भिषक्कर्म-
१४. A. तृदा-

ब्रह्मोः कौशिके ॥ ४. १. ५५ ॥

कवेराङ्गिरसे ॥ ४. १. ५६ ॥

बोधात्[1] ॥ ४. १. ५७ ॥

वतण्डात् ॥ ४. १. ५८ ॥

स्त्रियां लुक् ॥ ४. १. ५९ ॥

अश्वाश्मशङ्कुकुटपुटरोहिणखर्जूरपिण्डूरभडिलभण्डिलभडितभण्डिनेभ्यः फञ् ॥
४. १. ६० ॥

प्रहृतरामोदक्षान्तकुलकाशकालगोबाह्वार्कस्वनध्वनपादचक्रेभ्यः ॥ ४. १. ६१ ॥

ग्रीवाग्रविष्ठापविग्रापविन्दागोमिन्वाग्मिन्श्यामधूमधूम्रवस्त्रविश्वानरविदेभ्यः ॥
४. १. ६२ ॥

जडखडार्हग्रीष्मवीक्षविशम्पविशालगिरिचपलनमदासकानडुह्येभ्यः[2][3] ॥ ४ १.६३ ॥

धन्यधर्मार्जुनबैल्योत्सातवकितवशूद्रखदिरसुमनोदुर्मनोभ्यः[4] ॥ ४. १. ६४ ॥

जातात्पुंसि ॥ ४. १. ६५ ॥

शपभरद्वाजाभ्वामात्रेये ॥ ४. १. ६६ ॥

आत्रेयाद्भारद्वाजे ॥ ४. १. ६७ ॥

भर्गात् त्रैगर्ते ॥ ४. १. ६८ ॥

कुञ्जब्रध्नशङ्खभस्मगणलोमशटशाकशुण्डाशुभस्कन्दस्कम्भविशाभ्यः[5] फ्यञ् ॥
४. १. ६९ ॥

स्त्रीबहुषु फक् ॥ ४. १ ७० ॥

नडचरबकमुञ्जेतिकेतिशोपकलमकसप्तलवाजप्यतिकाग्निशर्मभ्यः ॥ ४.१.७१ ॥

वृषगणप्राणनरसायकदासकमित्रपिङ्गरपिङ्गलकिङ्करकिङ्कलकातरकातलेभ्यः[6][7] ॥
४. १. ७२ ॥

द्वीपाजकाश्यकाश्यपकाव्यामुष्यामित्रचित्रलिङ्गकुमारलोहदुर्गेभ्यः[8] ॥ ४. १. ७३ ॥

स्तम्बाग्रशिशपातृणशकटसुमतिमितच्छेजगन्धरयुगन्धरहंसकपञ्चालेभ्यः[9] ॥
४. १. ७४ ॥

१. C. रसः
२. A. This and the next sūtra are written as one sūtra.
३. A. डुहेभ्यः
४. A omits दुर्मनो
५. A. विपाद्भ्यः पञ्
६. A. घ्राण.
७. A. कातमेभ्यः
८. A omits लोह.
९. A. सु॰ तममित-

दण्डिन्हस्तिन्चर्मसिन्सुकृत्यास्थिरकब्राह्मणाश्वचटकबदराश्वखरपकामुकेभ्यः ॥ ४. १. ७५ ॥

ब्रह्मदत्तोदुम्बरशणशोणाश्वबालिशभण्डपेभ्यश्च ॥ ४ १. ७६ ॥

कृष्णरणाभ्यां ब्राह्मणवसिष्ठयोः ॥ ४. १. ७७ ॥

शलङ्कुकोष्ट्रोर्लोपश्च ॥ ४. १. ७८ ॥

हरितादिभ्योऽञ् ॥ ४. १. ७९ ॥

यञिञ्भ्याम् ॥ ४. १. ८० ॥

शरद्वच्छुनकदर्भेभ्यो भार्गववात्स्याग्रायणेषु ॥ ४. १. ८१ ॥

जीवन्तपर्वताभ्यां वा ॥ ४. १. ८२ ॥

द्रोणात् ॥ ४. १. ८३ ॥

शिवप्रोष्ठप्रोष्ठिकचण्डजम्भकुठारानभिम्लानकँहूथोरलविरलपिष्गसुपिष्गेभ्यो - ऽण् ॥ ४. १. ८४ ॥

पिटकपिटाकमृक्षाकवर्तनाक्षविरूपाक्षखदूरकरेखलेखसुखलेखनखञ्जनखँञ्जखञ्जे - रमञ्जमिकेभ्यः ॥ ४. १. ८५ ॥

पर्णकर्णकोहडकहोडककुभोर्णनाभनभागहेहयकुत्स्यवृष्णिकक्षीरह्रदजलह्रदेभ्यः ॥ ४. १. ८६ ॥

यस्कलह्यद्रुह्यायःस्थूणतृणकर्णभलन्दनकुरुपाण्डुवतण्डार्ष्टिषेणतृणतक्षन्भ्यः ॥ ४. १. ८७ ॥

गोपिकागोपालिकाकपिलिकाजगिलिकाबधिरिकारोहितिकार्यश्वेतोक्षिपाव - र्षिकापृथेलासपत्नीभ्यः ॥ ४. १. ८८ ॥

भूमिभूरिमुनिसन्धिजरत्कारुकारुहस्तिपादकपिञ्जलकुण्डोपस्थब्रह्मगुप्तखर्जूर - कर्णमयूरकर्णेभ्यः ॥ ४. १. ८९ ॥

नैश्च विश्रवसो विश्लोपश्च वा ॥ ४. १. ९० ॥

द्वँयचो नद्याः ॥ ४. १. ९१ ॥

विपाशगङ्गाभ्याम् ॥ ४. १. ९२ ॥

१. C. ञः

२. A adds णः and reads the rest as a separate sūtra.

३. A. This and the next sūtra are read as one.

४. A. म्लानभूभूथोरलपिरद्यपिष्टसुपिष्टेभ्यो- ऽण्

५. A. मञ्जीरमञ्जकेभ्यः

६. A. णश्च

७. A. चाद्वयचो

त्रिवेण्यास्त्रिविर्णं च ॥ ४. १. ९३ ॥

मानुष्याश्चावृद्धनाम्नः ॥ ४. १. ९४ ॥

कुञ्जकोकिलाभ्याम् ॥ ४. १. ९५ ॥

ऋषिकुरुवृष्ण्यन्धकेभ्यः ॥ ४. १ ९६ ॥

मातुरुत्संख्यासंभद्रपूर्वायाः ॥ ४. १. ९७ ॥

कैन्यायाः कनीन च ॥ ४. १. ९८ ॥

शुङ्गछगलविकर्णेभ्यो भारद्वाजात्रेयवात्स्येषु ॥ ४. १. ९९ ॥

शालवापीलाभ्यां वा ॥ ४. १. १०० ॥

मण्डूकात् ढक् च ॥ ४. १. १०१ ॥

ङ्याबूङः ॥ ४. १. १०२ ॥

द्व्यचः ॥ ४. १. १०३ ॥

इतो निञः ॥ ४. १. १०४ ॥

शुभ्रविष्टपुरब्रह्मकृतशरद्वतशलाम्यलाणीवप्रवाहणभरतभरमकर्पूरेतरान्यतरा-
जिराश्वतुदगोदन्तेभ्यः ॥ ४. १. १०५ ॥

कुशाम्बविग्रविशशालूकदेवतरालीढसुदत्तसुदक्षवायुदत्ताकशापशकलखदूर -
शुकशुक्रोग्रजीवेभ्यः ॥ ४. १. १०६ ॥

कद्रुपाण्डुमृकण्डुयमष्टमकष्टकर्षूलेखाभ्रशलाकाभ्रशकुनिशकन्ध्यानिधिपरिधि -
विश्रयतिथ्यनुदृष्टयजवस्तिभ्यः ॥ ४. १. १०७ ॥

गङ्गागोधाविधवाशलाकाकुमारिकाकिशोरिकाकुबेरिकाकाम्बिकाशोकाकृकसा-
कृकलासाखडोन्मत्तागन्धपिङ्गलाधर्मिणीरुक्मिणीरोहिणीभ्यः ॥ ४.१.१०८॥

श्वघ्नघ्नमन्सुनामन्सुदामञ्जरातिन्बलीवर्दिञ्जिह्माशिन्दिक्सुवक्षोविमातृमृन्मृद्वा-
दिभ्यः ॥ ४. १. १०९ ॥

लक्षणश्यामयोर्वंसिष्ठे ॥ ४. १. ११० ॥

बडबाया वृषे ॥ ४. १. १११ ॥

१. A. णश्च

२. A omits this word, and reads the further portion together with next sūtra as one.

३. A. संचार्पालाभ्यां

४. A. शतद्वार

५. A. तुन्द

६. A. लवण.

विकर्णकुषीतकात् काश्यपे ॥ ४. १. ११२ ॥

भ्रुवो वुक् च ॥ ४. १. ११३ ॥

कल्याणीसुभगादुर्भगाबन्धकीजरतीबलीवर्दीज्येष्ठाकनिष्ठामध्यमापरस्त्रयनुसृ - ष्टयनुदृष्टीनामिनङ् च ॥ ४. १. ११४ ॥

कुलटाया वा ॥ ४. १. ११५ ॥

चटकादैरक् ॥ ४. १. ११६ ॥

लुक् स्त्रियाम् ॥ ४. १ ११७ ॥

जाँण्डापाण्डादारक् ॥ ४. १. ११८ ॥

गोधाया ढक् च ॥ ४. १. ११९ ॥

अनियतपुंस्काङ्गहीनाभ्यो वा ॥ ४. १. १२० ॥

भ्रातुर्व्यत् ॥ ४. १. १२१ ॥

व्यन् सपत्ने ॥ ४. १. १२२ ॥

छश्च ॥ ४. १. १२३ ॥

स्वसुः ॥ ४. १. १२४ ॥

पितृमात्रादेश्छण् ॥ ४. १. १२५ ॥

ढ्रग्लोपश्च ॥ ४. १. १२६ ॥

क्षत्राज्ञातौ घः ॥ ४. १. १२७ ॥

राज्ञो यत् ॥ ४. १. १२८ ॥

श्वशुरात् ॥ ४. १. १२९ ॥

कुलाट्ठक्ञ् चँ ॥ ४. १. १३० ॥

खः सपूर्वाच्च ॥ ४. १. १३१ ॥

दुष्कुलाड्ढग्वा ॥ ४. १. १३२ ॥

महाकुलाद्ञ्खञौ ॥ ४. १. १३३ ॥

चतुष्पाद्भ्यो ढञ् ॥ ४. १. १३४ ॥

गृष्टिद्दष्टिद्दलिवलिविश्रिकुद्रयजवस्तिमित्रयुभ्यः ॥ ४. १. १३५ ॥

१. A. This portion is written as a separate sūtra.
२. A. लुक्
३. A. This and the next sūtra are written as one.
४. A. जाण्टापाण्टा-
५. A. This and the next sūtra are written as one.
६. A. इग्लो-
७. A omits च
८. A. दखञौ

रेवतीकुक्कुटाक्षवृकबन्धिभ्यष्टक्[1] ॥ ४. १. १३६ ॥

अश्वमणिद्वारेभ्यः पाल्याः ॥ ४. १. १३७ ॥

वैतवृककर्णदण्डेभ्यो ग्राहात्[2] ॥ ४. १. १३८ ॥

पौत्रादेः स्त्रियाः कुत्सिते णश्च ॥ ४. १. १३९ ॥

भगवित्तिंतार्णविन्दवाकशापेयेभ्यः सौवीरेषु ठग्वा[3] ॥ ४. १. १४० ॥

यामुन्दायनिसौयामायनिवार्ष्यायणिभ्यश्छश्च ॥ ४. १. १४१ ॥

फाण्टाहृतेर्णफिञौ ॥ ४. १. १४२ ॥

मिमतात्[4] ॥ ४. १. १४३ ॥

कुरुशकन्धुशङ्कुकर्तृभर्तृपितृमद्वाकक्षैन्कापिञ्जलादिधातकीन्द्रजालिदामोष्णीषिभ्यो ण्यः[5] ॥ ४. १. १४४. ॥

कविमतिपीलाशलाकैरकेज्येहिकेशिनीभ्यः ॥ ४. १. १४५ ॥

शुभ्राभ्रदभ्रमुरपुरकिशोरगर्गराजमारमद्रुपचपथदकेनवेनमूढकुडहृदिकशालीनेभ्यः ॥ ४. १. १४६ ॥

कर्णरथपतिसत्यंवडभीबृहतीभ्यः कारात्[6] ॥ ४. १. १४७ ॥

वान्तार्द्राभ्यां वृक्षात्[7] ॥ ४. १. १४८ ॥

इयावात् पुत्ररथाभ्याम्[8] ॥ ४. १. १४९ ॥

शूर्पाच्च नायात्[9] ॥ ४. १. १५० ॥

विराजकादिभ्यः ॥ ४. १. १५१ ॥

सम्राजः क्षत्रिये ॥ ४. १. १५२ ॥

वामरथवच्छलकलादियज्ञवत् स्वरवर्जम् ॥ ४. १. १५३ ॥

१. A. ष्टन्

२. A. This and the next sūtra are omitted.

३. A. वृकर्णदण्डेवाशाकापायेभ्यः

४. A. तक्षन्...ण्यः is written as a separate sūtra.

५. A. This sūtra is written as two with the following differences in reading:-शुभ्राशुभ्रमुरपुरीकशोरगगराजरामरक् ॥ गुषचफट्टकेनवेनमूढकुट etc.

६. A adds at the beginning वो[वेना]च्छन्दस्योदन्ये-

७. A. गायात्

८. A omits शकल.. सैन्धव (४. १. १५५.)

सेनान्तकारुलक्षणेभ्य इण् च ॥ ४. १. १५४ ॥

तिककितवसैन्धवशुभामित्रदेवरथनीडयज्ञयमुन्दोरसारथ्यलङ्कवेभ्यः फिञ् ॥ ४. १. १५५ ॥

बालभीतग्राम्यरूप्यवरण्योतथ्योदन्योरश्वन्द्रमस्सुयामन्सुपामन्ध्वजवङ्क्षथः ॥ ४. १. १५६ ॥

तैतिलजाजलक्षैजयतसैकयतचौपयतचैटयतौरसकौरव्यगौकक्ष्यशाट्यभौरिकि-भौलिकेभ्यः ॥ ४. १. १५७ ॥

गङ्गासंज्ञोखाशिखावंह्यकारखल्वकाशल्यकालोमकावसुकुरुभ्यः ॥ ४. १. १५८ ॥

दगुकोसलकर्मारछागवृषेभ्यो युट्[1] च ॥ ४. १. १५९ ॥

द्व्यचोऽणः ॥ ४. १. १६० ॥

त्यदादिभ्यो वा ॥ ४. १. १६१ ॥

वृद्धादगोत्रात् ॥ ४. १. १६२ ॥

वाकिनगारेधकार्कट्यकाकलङ्कचर्मिवर्मिभ्यः कुट्[2] च ॥ ४. १. १६३ ॥

पुत्राल्लाद्वा ॥ ४. १. १६४ ॥

अवृद्धात् फिन् बहुलम् ॥ ४. १. १६५ ॥

मनोरण् ॥ ४. १. १६६ ॥

नेश्वाणः कुत्सायाम् ॥ ४. १. १६७ ॥

जातौ यत् घुक् च ॥ ४. १ १६८ ॥

अञ् ॥ ४. १. १६९ ॥

तुल्यनामभ्यः क्षत्रियजनपदेभ्यो राजनि च ॥ ४. १. १७० ॥

साल्वेयगान्धारिभ्यां च ॥ ४. १. १७१ ॥

वृद्धात्[3] कोसलाजादाञ् ञ्यङ् ॥ ४. १. १७२ ॥

द्व्यञ्मगधकलिङ्गशूरमसेभ्योऽण् ॥ ४. १. १७३ ॥

कुरुनादिभ्यो ण्यः ॥ ४. १. १७४ ॥

पाण्डोर्ढ्यण् ॥ ४. १. १७५ ॥

१. A. ब्राह्मकाश्वल्काशल्यका
२. A. युक् च
३. A. गारेटकार्कट्यकालङ्कि
४. A. कुक्
५. C omits this sūtra.
६. A and C. वृद्धेत्

उदुम्बरतिलखलमद्रकारयुगन्धरभुलिङ्गशरदण्डप्रत्यग्रथकलकूटाश्मकेभ्य इञ् ॥ ४. १. १७६ ॥

[2]कम्बोजमुरलकेरलचोलशकखसादिभ्यो लुक् ॥ ४. १. १७७ ॥

स्त्रियां कुरुकुन्त्यवन्तिभ्यः ॥ ४. १. १७८ ॥

अजगोरप्राच्यभर्गकरुषकेकयकश्मीरकौरव्यौरससाल्वसुस्थलेभ्यः ॥ ४. १. १७९ ॥

अजादीनामस्त्रियां बहुषु ॥ ४. १. १८० ॥

यज्ञओरपुनर्भूपशुपुत्रदुहितृननान्दृभ्यः ॥ ४. १. १८१ ॥

एकद्व्योः षष्ठीतत्पुरुषे वा ॥ ४. १. १८२ ॥

कौण्डिन्यस्य कुण्डिनच्च ॥ ४. १. १८३ ॥

यस्कलभ्यद्रह्यायस्थूणतृणकर्णभलन्दनमित्रयुखरपभडिलभण्डिलभाडितभण्डितेभ्यः ॥ ४. १. १८४ ॥

सदामत्तकम्बलभारकर्णाटपिण्डीजङ्घबैकसक्थरक्षोमुखजङ्घारथोत्काशकह्लमन्थकविषपुटेभ्यः ॥ ४. १. १८५ ॥

वर्षुकोपरिमेखलकडरकृषवटाकपुष्करसत्कुन्द्रविश्रियजवास्तिभ्यः ॥ ४. १. १८६ ॥

क्रोष्टुः पादमानाभ्याम् ॥ ४. १. १८७ ॥

शीर्षाच्च मायात् ॥ ४. १. १८८ ॥

अत्रिभृगुकुत्सवसिष्ठाङ्गिरोगोतमेभ्यः ॥ ४. १. १८९ ॥

अगस्त्यः ॥ ४. १. १९० ॥

बह्वृचः प्राच्यादिभ्यः ॥ ४. १. १९१ ॥

उपकलमकभ्रष्टककपिष्ठलकृष्णाजिनकृष्णसुन्दरपिङ्गलकृष्णपिङ्गलकलशीकण्ठदामकण्ठजटिलकबधिरकेभ्यो वा ॥ ४. १. १९२ ॥

जैन्तुगडुकनिदाघापजग्धाडारकचडारकप्रतिलोमानुलोमप्रतानानुपदानभिहितखरिजङ्घेभ्यः ॥ ४. १. १९३ ॥

१. A. उदुम्बरखदिरखल-
२. A adds साल्वांशेभ्यः
३. A. नां स्त्रियां
४. A. परस्त्रीपुत्र. This portion is written as a separate sūtra.
५. C. नाच्च
६. A. वचसक्थ
७. A. विश्रियज
८. A. क्रोष्टोःपाट-
९. A. अग्रस्तयः
१०. C omits this sūtra but a portion of the sūtra is referred to in the commentary.

कशाकृत्स्नसुधायुगकर्णकपर्णकशीतकलेखाभ्रुशलाथलपिष्टसुपिष्टमसूरकर्णकठे - रणपतञ्जलिभ्यः ॥ ४. १. १९४ ॥

तिककितवोऽब्जककुभवङ्क्षरभण्डीरथप्रहितनरकाग्निवेशदासेरकबकनखेश्वगुद[1]- परिणद्धलङ्कशान्तमुखोरसलङ्कटेभ्यो द्वन्द्वे ॥ ४. १. १९५ ॥

षड्भ्यश्चोपकादिभ्यः[2] ॥ ४. १. १९६ ॥

न गोपवनादिभ्योऽष्टभ्यः ॥ ४. १. १९७ ॥

प्राग्जितीयेऽचि[3] ॥ ४. १. १९८ ॥

गोत्रालुक् ॥ ४. १. १९९ ॥

फक्फिञोर्वा ॥ ४. १. २०० ॥

अब्राह्मणात् ॥ ४. १. २०१ ॥

पैलसालङ्किसाल्यकिसाल्वाम्यौदज्यौदमज्यौदमेध्यौदशुद्धिदैवस्थानपैङ्गलादा - यनिराणिराहक्षितिभौलिङ्गयोद्वाहमान्यौज्जिहानिभ्यः ॥ ४. १. २०२ ॥

जनपदनाम्नः क्षत्रियादणः ॥ ४. १. २०३ ॥

मगधकलिङ्गशूरमसकुरुवृष्ण्यन्धकेभ्यश्च ॥ ४. १. २०४ ॥

प्रेष्यादिभ्यः ॥ ४. १. २०५ ॥

न तौल्वलिवारणिधारणिरावणिदैलीपिदैवतिदैवमतिदैवयज्ञिप्रादोहनिचार्फन्द - क्यासुरिपौष्करसाद्यानुराहतीभ्यः ॥ ४. १. २०६ ॥

आनुतिनैमिश्यासिबन्धकिचेङ्किपैप्पलाहिंसिपैरकिपैसीतिवैकर्णिकार्करिकारेणु - पालिभ्यः ॥ ४. १. २०७ ॥

भरतगोत्राच्च ॥ ४. १. २०८ ॥

१. A. नशेरक
२. A. नखगद
३. A adds as a separate sūtra वाभ्याष्टयेष्टकादिभ्याम्
४. A adds गर्गभार्गविका
५. A adds गोर्गे भार्गविका
६. A. This sūtra is read along with the previous.
७. A omits वारणि
८. A. फट्ट
९. A. भरतो

अर्द्वार्षण्येभ्योऽणिञोः ॥ ४. १. २१० ॥
द्व्येकयोः बहुषु लोपिनो बहुषु लुकि लुक् ॥ ४. १. २११ ॥
बहुषु द्व्येकयोरलुक् ॥ ४. १. २१२ ॥

इति श्री सरस्वतीकण्ठाभरणनाम्नि व्याकरणे
चतुर्थस्याध्यायस्य प्रथमः पादः
समाप्तः

---

१. A. ङि- २. A. द्व्येकयोरलुक्.

अथ द्वितीयः पादः

तेन रक्तं रागात् ॥ ४. २. १ ॥
लाक्षारोचनाभ्यां ठक् ॥ ४. २. २ ॥
शकलकर्दमाभ्यां वा ॥ ४. २. ३ ॥
नीलपीताभ्यां मन्कनौ ॥ ४. २. ४ ॥
पीतकाल्लुक् ॥ ४. २. ५ ॥
हरिद्रामहारजनाभ्यामञ् ॥ ४. २. ६ ॥
चन्द्रवृत्तेर्नक्षत्राद्युक्तः कालः ॥ ४. २. ७ ॥
लुप्तदविशेषे[1] ॥ ४. २. ८ ॥
संज्ञायां श्रवणाश्वत्थाभ्याम् ॥ ४. २. ९ ॥
द्वेन्द्वाच्छः[2] ॥ ४. २. १० ॥
दृष्टं साम डिद्वा ॥ ४. २. ११ ॥
वामदेवात् ड्यद्ड्यौ ॥ ४. २. १२ ॥
गोत्रादङ्कवत् ॥ ४ २. १३ ॥
परिवृतो रथः ॥ ४. २. १४ ॥
पाण्डुकम्बलादिनिः ॥ ४. २. १५ ॥
द्वैपवैयाघ्राभ्यां चर्मभ्यामञ् ॥ ४. २. १६ ॥
कुमारात् प्राथम्ये ॥ ४. २ १७॥
तत्रोद्धृतं पात्रेभ्यः ॥ ४. २. १८ ॥
स्थण्डिलात् शेते व्रती ॥ ४. २. १९ ॥
संस्कृतं भक्ष्यम् ॥ ४. २. २० ॥
शूलोखाभ्यां यत् ॥ ४. २. २१ ॥

१. A adds संज्ञायां and omits this word in the next sūtra.

२. A. This is read along with the previous sūtra.

३. A. This is read along with the previous sūtra.

दध्नष्ठक् ॥ ४. २. २२ ॥

उदश्वितो वा ॥ ४. २. २३ ॥

क्षीराड्ढञ् ॥ ४. २. २४ ॥

सास्मिन् पौर्णमासी संज्ञायाम् ॥ ४. २. २५ ॥

अश्वत्थाग्रहायणीभ्यां ठक् ॥ ४. २. २६ ॥

फाल्गुनीश्रवणकार्तिकीचैत्रीभ्यो वा ॥ ४. २. २७ ॥

सास्य देवता ॥ ४. २. २८ ॥

कस्येच्च ॥ ४. २. २९ ॥

शुक्राद्धन् ॥ ४. २. ३० ॥

पैङ्गाक्षीपुत्रादिभ्यश्छः ॥ ४. २. ३१ ॥

शतरुद्रात् घश्च ॥ ४. २. ३२ ॥

अपोनपादपान्नपातोस्तृ चातः ॥ ४. २. ३३ ॥

महेन्द्राद्वा ॥ ४. २. ३४. ॥

सोमात् ष्यण् ॥ ४. २. ३५ ॥

वाय्वृतुपित्रुषसो यत् ॥ ४. २. ३६ ॥

द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छश्च ॥ ४. २. ३७ ॥

कालेभ्यो भववत् ॥ ४. २. ३८ ॥

महाराजप्रोष्ठपदाभ्यां ठञ् ॥ ४. २. ३९ ॥

आदेश्छन्दसः प्रगाथे ॥ ४. २. ४० ॥

यौद्धप्रयोजनेभ्यः संग्रामे ॥ ४. २. ४१ ॥

प्रहरणादस्यां क्रीडायां णः ॥ ४ २. ४२ ॥

भावघञो ञः ॥ ४. २. ४३ ॥

तदधीते तद्वेद ॥ ४. २. ४४ ॥

क्रतुभ्यष्ठक् ॥ ४. २. ४५ ॥

वृत्तिसंग्रहायुर्वेदगुणगणानुपदद्विपदज्योतिषगणितानुसूर्लक्ष्यलक्षणेभ्यः ॥ ४. २. ४६ ॥

१. A. श्रवणा

२. A. This sūtra is read along with the previous.

३. A. पैङ्गिकिषी-

४. A. This is read along with the previous sūtra.

५. A. This is read along with the previous sūtra.

वसन्तवर्षाशरद्धेमन्तशिशिरप्रथमचरमानुगुणकल्पार्थर्वणेतिहासपुराणेभ्यः ॥ ४. २. ४७ ॥

आख्यानाख्यायिकाभ्यः ॥ ४. २. ४८ ॥

लक्षणकल्पसूत्रान्तादकल्पादेः ॥ ४. २. ४९ ॥

विद्यान्तादनङ्क्षत्रधर्मत्रिपूर्वात् ॥ ४. २. ५० ॥

पदोत्तरपदात् ठन्[1] ॥ ४. २. ५१ ॥

शतषष्ठ्यादेः पथः ष्ठन् ॥ ४. २. ५२ ॥

अनुब्राह्मणादिनिः ॥ ४. २. ५३ ॥

क्रमपदशिक्षामीमांसासामभ्यो वुन् ॥ ४. २. ५४ ॥

सर्वसादेर्लुक् ॥ ४. २. ५५ ॥

प्रोक्तात् ॥ ४. २. ५६ ॥

संख्याकनः सूत्रवचनात् ॥ ४. २. ५७ ॥

तस्य समूहः ॥ ४. २. ५८ ॥

भिक्षाक्षेत्रकरीषगर्भिणीदक्षिणाङ्गारसहस्राथर्वाङ्गर्मन्युवतिपदातिपङ्क्तिभ्योऽण्[2] ॥ ४. २. ५९ ॥

खण्डिकाहन्हलबन्धयुगवस्त्रबडवाभिक्षुकशुकोलूकश्वानुदात्तादेरञ्[3] ॥ ४. २. ६० ॥

क्षुद्रकमालवात् सेनायाम्[4] ॥ ४. २. ६१ ॥

गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजवृद्धेभ्यो वुञ् ॥ ४. २. ६२ ॥

केदाराद्यञ्च ॥ ४. २. ६३ ॥

क्वचिनश्च ठञ् ॥ ४. २. ६४ ॥

हस्त्यचित्तेभ्यष्ठक् ॥ ४. २. ६५ ॥

धेनोरनञः ॥ ४. २. ६६ ॥

गणिकाब्राह्मणमाणवबाडवेभ्यो यञ् ॥ ४. २. ६७ ॥

केशाद्वा ॥ ४. २. ६८ ॥

अश्वाच्छः ॥ ४. २. ६९ ॥

पशुपुरुषाभ्यां णढञौ ॥ ४. २. ७० ॥

अहः खः क्रतौ ॥ ४. २. ७१ ॥

पृष्ठाद्यः ॥ ४. २. ७२ ॥

१. A. कार्थेभ्यः
२. A. ठक्
३. A. वधवा
४. A. क्षत्रकमलवाक्सेनायाम्.
५. C. This is written as part of the commentary.

पाशतृणधूमाङ्गारगलर्वातपिटकपिटाकशकटहलनडवनेभ्यश्च ॥ ४. २. ७३ ॥

वातादूलश्च[1] ॥ ४. २. ७४ ॥

गोत्रश्च ॥ ४. २. ७५ ॥

रथात् कड्यच्च ॥ ४. २. ७६ ॥

खलादिनिश्च ॥ ४. २. ७७ ॥

ऊककुन्दुमाभ्याम् ॥ ४. २. ७८ ॥

ग्रामजनबन्धुसहायेभ्यस्तल् ॥ ४. २. ७९ ॥

पितृमातृभ्यां भ्रातरि व्यङुलचौ[2] ॥ ४. २. ८० ॥

पितरि डामहच् ॥ ४. २. ८१ ॥

मातरि षिच्च ॥ ४. २. ८२ ॥

अवेर्दुग्धे सोढदूसमरीसचः ॥ ४. २. ८३ ॥

तिलाश्निष्फलात्पिञ्जपेजौ ॥ ४. २. ८४ ॥

विषयो देशे[3]ः ॥ ४. २. ८५ ॥

राजन्यशैलूषदेवयानवसातिवैतिलवसनोदुम्बराम्बरीषपुत्रवैकर्णार्जुनायनजालन्धरायणशालङ्कायनेभ्यो वुञ् ॥ ४. २. ८६ ॥

वैल्ववनबाभ्रव्यानृतात्मकामेयसांप्रीयदास्यूर्णनाभमालवत्रैगर्तवैराटिभ्यश्च ॥ ४. २ ८७ ॥

भौरिकिभौलिकिचौपयतचैटयतसैकयतकाणेयवाणिजकेभ्यो विधल् ॥ ४.२.८८ ॥

ऐषुकारिसौवीरशयाभ्रशयाण्डशयण्डशौण्डतुण्डदेवदासमित्रेभ्यो भक्तल् ॥ ४. २. ८९ ॥

द्यूताक्षदयाक्षसारस्यदासमित्रचान्द्रस्रखाण्डादेरायनात् ॥ ४. २. ९० ॥

वैश्वादिभ्यो देवधेनवमानवेभ्यः ॥ ४. २. ९१ ॥

निवासे तत्रास्मि ॥ ४. २. ९२ ॥

अदूरभवे ॥ ४. २. ९३ ॥

तेन निर्वृत्ते ॥ ४. २. ९४ ॥

तदिहास्ति च ॥ ४. २. ९५ ॥

१. A. पोत-

२. A. दूलच्

३. A adds न बहुवचनविषयात् as a separate sūtra.

४. A. पीलवसान-

५. A omits वाणि...शयाभ्र in the next sūtra.

ओरञ् ॥ ४. २. ९६ ॥

मतो बह्वृच्प्रकृतेः ॥ ४. २. ९७ ॥

बह्वृचः कूपेषु ॥ ४. २. ९८ ॥

उदक् च विपाशः ॥ ४. २. ९९ ॥

सङ्कलपुष्कलतूलासमूलासपलाशभल्लपालकपालबहुलेभ्यः ॥ ४. २. १०० ॥

उद्यातोडुपोत्पिषोत्पुटोत्पलपूलासिकतापूतिकेभ्यः ॥ ४. २. १०१ ॥

कुम्भनिधानसुदत्तसुदक्षसुनेत्रसुभूमसुभूतराजभूतगोभूतेभ्यः ॥ ४. २. १०२ ॥

गभीरगम्भीरेतराभिषिक्तशाताहतनियतनिवेशेभ्यः ॥ ४. २. १०३ ॥

शरीरसद्योजवरुणकाखणहेमन्वेमन्लोमन्सुमङ्गलेभ्यश्च ॥ ४. २. १०४ ॥

स्त्रीषु सौवीरसाल्वप्राक्षु ॥ ४. २. १०५ ॥

सुवास्तुवर्णुतण्डुभण्डुखण्डुशिखण्डिशैवलिशेफालिकर्पूरिभ्योऽण् ॥४. २. १०६॥

गर्तगाहाभिसक्थदक्षविकर्णकृष्णकर्णशाकर्णकर्कशकर्कन्धुमतीभ्यः ॥४.२.१०७॥

रोण्याः सपूर्वायाश्च ॥ ४. २. १०८ ॥

कोपधाच्च ॥ ४. २. १०९ ॥

अरिहणद्रुहणकिरणसांपरायणौष्ट्रायणभाल्लायणमैत्रायणत्रैगर्तायनवैमतायनसौमतायनखाण्डायनशाण्डिल्यायनोद्दण्डखण्डवीरणोदञ्चनेभ्यो वुञ् ॥ ४. २. ११० ॥

खदिरबधिरभगलोलन्दविपथरैवतविपाशकाशकृत्स्नशिंशपाशिरीषबिल्वजम्बू-जाम्बवत्सुयज्ञसुशर्मन्नरायस्पोषेभ्यश्च ॥ ४. २. १११ ॥

कृशाश्वारिष्टारिष्टमविशालरोमशरोमकसुवर्चलशबलसूकरप्रतरपुरटसुदृशेभ्य-श्छण् ॥ ४. २. ११२ ॥

सुखधूमाजिनाभिजनविनतावनतविकुब्यासकुटमौद्गल्यायोरःपाराशरेभ्यश्च ॥ ४. २. ११३ ॥

ऋश्यन्यग्रोधशरनिलीनानिधानानिबन्धकर्दमपरिगूढोपगूढाश्मोत्तराश्माशानिभ्यः कः ॥ ४. २. ११४ ॥

खण्डदण्डस्थूलबाहुवेणुवीरणखदिरपरिवृत्तपरिवंशवेश्मांशुशर्करारट्टभ्यश्च ॥ ४. २. ११५ ॥

१. A. निहत
२. A reads this along with the previous sūtra.
३. A omits भाल्लायणमैत्रायण.
४. A. पुरगसदृशे-
५. A. विधान

कुमुदषीजबलबजशिरीषाश्वत्थन्यग्रोधयवासविकङ्कतेत्कटशकटकङ्कटदशग्राम - गर्तशर्करापरिवापकूपेभ्यष्ठच् ॥ ४. २. ११६ ॥

काशपाशपलाशाश्वत्थपीयूषवासबिसतृणवननडकर्दमकर्पूरबर्बरबल्वजकण्टक- गुहाभ्य इलः ॥ ४. २. ११७ ॥

तृणनडजनपर्णवर्णार्णवरणबलबुसेभ्यः सः ॥ ४. २. ११८ ॥

प्रेक्षाफलकाबन्धुकाध्रुवकाधुवकायुवकाक्षिपकाकूपकडुकयुकेत्कटकङ्कटशङ्कट - महन्यग्रोधेभ्य इनिः ॥ ४. २. ११९ ॥

अश्मन्नूषयूषमीननदगर्भगह्वगुडनगखण्डशिखाकोटपामन्वृन्दकन्देभ्यो रः ॥ ४. २. १२० ॥

सख्यग्निदत्तदत्तवायुदत्तगोभिलभल्लभल्लपालरोहतमालकदरकरवीराशोकेभ्यो ढकू ॥ ४. २. १२१ ॥

चक्रचक्रवाककुशीरकेसरकसुरससरससरमसमलसप्तलछगलेभ्यश्च ॥ ४. २. १२२ ॥

सङ्काशकश्मीरकम्पिलशूरसेनयूपत्कुम्भसीसरसरकसमलासनासाश्मरोमलो - मभ्यो ण्यः ॥ ४. २. १२३ ॥

कुटतीर्थपुलिनमलिनागस्तिविरत्नविकरसुपथिन्सुपन्थिदार्शनलनासिकाङ्गसकर्ण केभ्यश्च ॥ ४. २. १२४ ॥

बलबुलमूलोलकूलोरलसुललकुलवनेभ्यो यः ॥ ४. २. १२५ ॥

पक्षतुषचित्रकुण्डाण्डकम्बलिकांशुककुम्भसीरकसरकसरससमलेभ्यः ष्फक् ॥ ४. २. १२६ ॥

यमलबिलहस्तहस्तिन्सिङ्गकसकर्णकरोमलोमातिश्वभ्यः ॥ ४. २. १२७ ॥

पथः पन्थ च ॥ ४. २ १२८ ॥

१. A. उत्कट
२. A. बन्धन
३. C omits ध्रुवका
४. A omits धुवका
५. A. युतबुकोत्कट-
६. A. अश्मसूष-
७. A omits कन्द
८. A omits दत्त.
९. A. कुसरकुसुर
१०. A. स्थण्यः
११. A. सुपनिन्सबन्ध
१२. A. सकर्णेभ्यश्च.
१३. A. डुलल
१४. A. लोमाकिभ्यश्च

कर्णवसिष्ठार्कार्कलूषानड्वह्यजित्वर्जावन्तकुलिशकुम्भ्याण्डीबतानकस्फिक्पंञ्च - जनेभ्यः फिञ् ॥ ४. २. १२९ ॥

सुतङ्गममुनिचित्तविप्रचित्तमहा[2]चित्तमहापुत्रश्वेतगडिकजीवाजिरार्जुनबीजवा - पिशुचिशुक्रविप्रेभ्य इञ् ॥ ४. २. १३० ॥

प्रगदिमगदिकलिवखडिवगडिवच्चूडारमार्जारकोविदारेभ्यो ञ्यः ॥ ४. २. १३१॥

वराहपलाशशिरीषनिबद्धपिनद्धस्थूलखदिरशर्कराबाहुविदग्धविभग्ननिमग्ने[3] - भ्यः कक् ॥ ४. २. १३२ ॥

कुमुदकुमुटकुण्डलमुनिस्थलाश्वत्थशालमलिदशग्रामगोमठरथकारशर्करामधु - कर्णशिरीषेभ्यः ष्ठक् ॥ ४. २. १३३ ॥

उत्करशफराश्मखदिरपलाशापिप्पलपिप्पलीमूलत्रैवर्णारण्यपर्णसुपर्णाणकशूर्प - णायश्यवनायेभ्यश्छः ॥ ४. २. १३४ ॥

काशाश्वत्थनिशा[4]तविशा[5]लशालोत्कोशखला[6]जिनतिककितवातपपिचुशर्करावैरा-कणनैचाकचेभ्यः ॥ ४. २. १३५ ॥

क्षुद्राक्षान्तनितान्तवृक्षेन्द्रवृक्षावरोहितभल्लाजन्याजिनेन्द्राग्निचर्मगतार्केभ्यश्च ॥ ४. २. १३६ ॥

[7]नडप्लक्षबिल्ववेणुवेत्रवेतसतृणकाष्ठेक्षुकपोतानां कुक् च ॥ ४. २. १३७ ॥

[8]क्रौञ्चाया ह्रस्वश्च ॥ ४. २. १३८ ॥

तक्ष्णो नलोपश्च ॥ ४. २. १३९ ॥

कुमुदनडमहिषवेतसेभ्यो ड्मतुप् ॥ ४. २. १४० ॥

नडशाडाभ्यां ड्वलच् ॥ ४. २. १४१ ॥

शिखाया वलच् ॥ ४. २. १४२ ॥

जनपदे लुबविदिशादिभ्यः ॥ ४. २. १४३ ॥

वरणशिरीषशालमलिकटुकबदरीगोदपुष्करजालपदाताम्रपर्णीतक्षशिलाशुण्डी-शयाण्डीशृङ्गिभ्यः ॥ ४. २. १४४ ॥

वल्गुवलभीमधुराचम्पापम्पोज्जयिनीगयोरसाकाञ्चीस्कङ्गुगोमतीजम्बूभ्यः ॥ ४. २. १४५ ॥

१. A. This portion is written as a separate sūtra.
२. A omits महाचित्त.
३. A. विमग्नेभ्यः
४. A. निशाल
५. A. खेला
६. A omits this sūtra.
७. A omits this sūtra.

शर्करायां वा ॥ ४. २. १४४ ॥

नद्यां मतुबसुवास्वादिभीमरथभगीरथेभ्यः ॥ ४. २. १४५ ॥

मधुकर्कन्धूबिसस्थाणुवेण्विक्षुशमीकरीरकिंशराशर्याणहिमरोमभ्यः ॥ ४.२.१४६॥

ऋष्यरिष्टशरमरुत्तक्षशिलाखडावटावार्दालीष्टकासुतिशक्तिशलाकासन्दीभ्यश्च॥ ४. २. १४७ ॥

इति श्रीसरस्वतीकण्ठाभरणनाम्नि व्याकरणे
चतुर्थस्याध्यायस्य द्वितीयः पादः
समाप्तः

अथ तृतीयः पादः

—:o:—

शेषे ॥ ४. ३. १ ॥

राष्ट्राद्घः ॥ ४. ३. २ ॥

पारावरात् खः ॥ ४. ३. ३ ॥

व्यस्तविपर्यस्ताच्च ॥ ४. ३. ४ ॥

ग्रामाद्यखञौ ॥ ४ ३. ५ ॥

कर्त्रयुम्भिकुम्भिकुण्डिनपुष्करपुष्कलमोदनमाहिष्मतीवर्मतीनगरेभ्यो ढकञ् ॥ ४. ३. ६ ॥

कुड्याया यलोपश्च ॥ ४. ३. ७ ॥

कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु ॥ ४. ३. ८ ॥

नदीमहीसेतिकीश्रावस्तीवाराणसीकौशाम्बीकाशफरीखादिरीपाठामायासाल्वादौर्वापूर्वनगरीपूर्वनगरेभ्यो ढक् ॥ ४. ३. ९ ॥

बडवाया वृषे ॥ ४. ३. १० ॥

दक्षिणा पश्चात्पुरसस्त्यक् ॥ ४. ३. ११ ॥

बह्वर्दिपर्दिकापिशीभ्यः ष्फक् ॥ ४. ३. १२ ॥

रङ्कोः प्राणिनि वा ॥ ४. ३. १३ ॥

द्युप्रागपागुदक्प्रतीचो यत् ॥ ४. ३. १४ ॥

कन्थायाष्ठक् ॥ ४. ३. १५ ॥

वर्णौ वुक् ॥ ४. ३. १६ ॥

क्वामेहत्रतसिभ्यस्त्यप् ॥ ४. ३. १७ ॥

नेर्ध्रुवे ॥ ४. ३. १८ ॥

निसो गते ॥ ४. ३. १९ ॥

ऐषमोह्यः श्वसो वा ॥ ४. ३. २० ॥

दूरादेत्यः ॥ ४. ३. २१ ॥

उत्तरादाहञ् ॥ ४. ३. २२ ॥

आरण्याण्ण्यः ॥ ४. ३. २३ ॥

१. A. म्यश्च

तीरान्तादञ् ॥ ४. ३. २४ ॥

रूप्यान्तादञः ॥ ४. ३. २५ ॥

दिक्पूर्वपदादसंज्ञायाम् ॥ ४. ३ २६ ॥

मद्रेभ्योऽञ् ॥ ४. ३. २७ ॥

उदीच्यग्रामाद्बह्वचोऽन्तोदात्तात् ॥ ४. ३. २८ ॥

बाह्वीकरोमकपटच्चरगोमतीगोष्ठीनैकतीभ्योऽण् ॥ ४. ३. २९ ॥

प्रस्थोत्तरपदकोपधेभ्यश्च ॥ ४. ३. ३० ॥

पैलदीपपरिषत्परिखोदपानशूरसेनसकृल्लोमभ्यः ॥ ४. ३. ३१ ॥

कमलाद्भिदाकीकराभ्याम् ॥ ४. ३. ३२ ॥

बहुजालकलेभ्यश्च कीटात्[1] ॥ ४. ३. ३३ ॥

शकलादिभ्यो गोत्रात् ॥ ४. ३. ३४ ॥

इञश्च ॥ ४. ३. ३५ ॥

न द्व्यचः प्राच्यात् ॥ ४. ३. ३६ ॥

वृद्धाच्छः ॥ ४. ३. ३७ ॥

एङाद्यच् प्राग्देशात् ॥ ४. ३. ३८ ॥

नृनाम्नो वा ॥ ४. ३. ३९ ॥

गोत्रान्तात्तद्वदजिह्माकात्यहरितकात्यात् ॥ ४. ३. ४० ॥

त्यदादिभ्यः ॥ ४. ३. ४१ ॥

भवतो दश्च ॥ ४. ३. ४२ ॥

ठञ् च ॥ ४. ३. ४३ ॥

ओर्देशात् ॥ ४. ३. ४४ ॥

प्राच्याच्छे ॥ ४. ३. ४५ ॥

काशिचेदिसांयातिभारद्वाजिदासग्रामसौधावतानमोदनमोदमानगोवासनदेवदत्ता-
ञ्जिठश्च ॥ ४. ३. ४६ ॥

संवाहाच्युतशकुलादारिन्दमकरुणकुनामन्हिरण्यामित्रहस्तिकर्षूभ्यश्च ॥
४. ३. ४७ ॥

१. A. फल.

२. A. This portion is written as a separate sūtra.

३. A. This and the next sūtra are written as one.

४. A. भाङ्ग.

सुधासिन्धुदासेभ्यो मित्रात् ॥ ४. ३. ४८ ॥

युवोपदेवेभ्यो राजात् ॥ ४. ३. ४९ ॥

ऊर्ध्वादिभ्यः कालात् ॥ ४. ३. ५० ॥

बाहीकग्रामेभ्यः ॥ ४. ३. ५१ ॥

वोशीनरेषु ॥ ४. ३. ५२ ॥

प्रस्थवहपुरान्तयोपधधन्वार्थेभ्यो वुञ् ॥ ४. ३. ५३ ॥

ईद्रोपधेभ्यः प्राचाम् ॥ ४. ३. ५४ ॥

जनपदेभ्यः ॥ ४. ३. ५५ ॥

तदविधभ्यश्च ॥ ४. ३. ५६ ॥

अवृद्धेभ्योऽपि बहुवचनविषयेभ्यः ॥ ४. ३. ५७ ॥

कच्छाग्निवक्रवर्तान्तेभ्यः ॥ ४. ३. ५८ ॥

धूमपण्डशशादनार्जुनावराजगृहगर्तसत्रासाहसाकेतसांस्तियाचयान्तरीयद्विपेभ्यः ॥ ४. ३. ५९ ॥

तीर्थघोषशष्पमित्रवर्चारुणकुक्षिबर्बरोज्जयिनीपल्लीभक्षालीदक्षिणापथेभ्यः ॥ ४. ३. ६० ॥

द्रुघाहावत्र्याहावाजिकूलमद्रकूलाराज्ञीधार्तराज्ञीपद्वारंमाठरविदेहानर्तपाठेयपाथेयेभ्यः ॥ ४. ३. ६१ ॥

माहकमाद्रकमाषघोषराजाट्टमानदाण्डायनेभ्यः स्थाल्याः ॥ ४. ३. ६२ ॥

कूलात् सौवीरेषु ॥ ४. ३. ६३ ॥

समुद्रान्नौमनुष्ययोः ॥ ४. ३. ६४ ॥

नगरात् कुत्सनप्रावीण्ययोः ॥ ४. ३. ६५ ॥

अरण्यात् पथिन्यायाध्यायहस्तिनरविहारेषु ॥ ४. ३. ६६ ॥

वा गोमये ॥ ४. ३. ६७ ॥

कुरुयुगन्धराभ्याम् ॥ ४. ३. ६८ ॥

वृजिमद्राभ्यां कन् ॥ ४. ३. ६९ ॥

कोपधादण् ॥ ४. ३. ७० ॥

१. A omits this word, and reads the next sūtra along with this.

२. C. This and the next sūtra are omitted.

३. A. हाक्तेसं-

कच्छकुरुसिन्धुसिन्धवन्तगन्धारिकुलूककम्बोजकश्मीरमधुमद्वर्णुरङ्कुद्वीपानूपानुपण्डबिजावकाजवाहसाल्वेभ्यश्च ॥ ४. ३. ७१ ॥

मनुष्यतत्स्थयोर्वुञ् ॥ ४. ३. ७२ ॥

साल्वाद्धेयवाग्वोश्च ॥ ४. ३. ७३ ॥

न पदातौ ॥ ४. ३. ७४ ॥

गर्तान्ताच्छः ॥ ४. ३. ७५ ॥

कटादेः प्राच्यात् ॥ ४. ३. ८६ ॥

करवोपधकन्थापलदनगरग्रामह्रदान्ताच्छे ॥ ४. ३. ७७ ॥

पर्वतात् ॥ ४. ३. ७८ ॥

अनरे वा ॥ ४. ३. ७९ ॥

कृकणपर्णात् भारद्वाजात् ॥ ४. ३. ८० ॥

गर्हान्तस्थसमविषमोत्तमोत्तरान्तरानन्तरान्याङ्गवङ्गमगधेभ्यः ॥ ४. ३. ८१ ॥

कामप्रस्थदन्ताग्रावस्पन्दनाग्निशर्मिदैवशर्मिवाराटकिवाल्मीक्याध्यश्विशौशिर्या - सुर्यानृशंस्याहिंसिभ्यः ॥ ४. ३. ८२ ॥

क्षैमवृत्तिखाडायनिकाठेरणिलाठेराणिभौजिवैजिव्याडिशाडिशौङ्गिसौत्रिसौमि - त्र्यामित्रिभ्यः ॥ ४. ३. ८३ ॥

इषोरग्रेनीकाभ्याम् ॥ ४. ३. ८४ ॥

एकाद्वृक्षपलाशिकाभ्याम् ॥ ४. ३. ८५ ॥

समानाच्च ग्रामात् ॥ ४. ३. ८६ ॥

अधमोत्तमाभ्यां च शाखात् ॥ ४. ३. ८७ ॥

पूर्वपराभ्यां पक्षात् ॥ ४. ३. ८८ ॥

एकमुखपार्श्वेभ्यस्तसः ॥ ४. ३. ८९ ॥

स्वपरजनदेवराज्ञां कुक् च ॥ ४. ३. ९० ॥

पृथिवीमध्यस्य मध्यमश्च ॥ ४. ३. ९१ ॥

निवासस्य चरणेऽण् च ॥ ४. ३. ९२ ॥

वेणुकवेत्रकप्रस्थकमध्यमकोत्तरपदकादिभ्यश्छण् ॥ ४. ३. ९३ ॥

युष्मदस्मदोर्वाखञ् युष्माकास्माकौ चै ॥ ४. ३. ९४ ॥

१. A. कालायनि

२. A. ग्रामनी-

३. C omits च.

अण् च ॥ ४. ३. ९५ ॥

तवकममकावेकत्वे ॥ ४. ३. ९६ ॥

द्वीपादनुसमुद्रं ञ्यः ॥ ४. ३. ९७ ॥

अर्धाद्यत् ॥ ४. ३. ९८ ॥

परापराधमोत्तमादेश्च ॥ ४. ३. ९९ ॥

दिगादेष्टञ् च ॥ ४. ३. १०० ॥

ग्रामजनपदैकदेशादञ् च ॥ ४. ३. १०१ ॥

सपूर्वात् ॥ ४. ३. १०२ ॥

कालेभ्यः ॥ ४. ३. १०३ ॥

कदम्बपुष्पादिभ्यश्च तद्वृत्तिभ्यः ॥ ४. ३. १०४ ॥

शरदः श्राद्धे ॥ ४. ३. १०५ ॥

रोगातपयोर्वा ॥ ४. ३. १०६ ॥

निशाप्रदोषाभ्याम् ॥ ४. ३. १०७ ॥

श्वसस्तुट् च ॥ ४. ३. १०८ ॥

सायंचिरंप्राह्णेप्रगेव्ययेभ्यष्ठ्युः ॥ ४. ३. १०९ ॥

पूर्वाह्णापराह्णाभ्यां वा ॥ ४. ३. ११० ॥

पुरो नः ॥ ४. ३. १११ ॥

परुत्पराराचिरेभ्यस्तः ॥ ४. ३. ११२ ॥

ऋतुनक्षत्रेभ्योऽण् ॥ ४. ३. ११३ ॥

सन्ध्यासन्धिवेलात्रयोदशीचतुर्दशीपञ्चदशीपौर्णमास्यमावास्याप्रतिपद्भ्यश्च ॥ ४. ३. ११४ ॥

संवत्सरात् फलपर्वणोः ॥ ४. ३. ११५ ॥

हेमन्ताद्वा तलोपश्च ॥ ४. ३. ११६ ॥

वर्षाप्रावृड्भ्यां ठगेण्यौ ॥ ४. ३. ११७ ॥

मध्यादः सांप्रतिके ॥ ४. ३. ११८ ॥

आदेश्च मः ॥ ४. ३. ११९ ॥

१. A. पदां च भञ्.

२. A. This and the next sūtra are written as one.

३. A. This portion is written as a separate sūtra.

४. A. न्यौ

अधोऽवसोर्लोपश्च ॥ ४. ३. १२० ॥
अग्रान्तपश्चाद्भ्य इमच् ॥ ४. ३. १२१ ॥
तत्र जातैः ॥ ४. ३. १२२ ॥
प्रावृषष्ठप् ॥ ४. ३. १२३ ॥
संज्ञायां शरदो वुञ् ॥ ४. ३. १२४ ॥
पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्करेभ्यः कन् ॥ ४. ३. १२५ ॥
पथः पन्थ च ॥ ४. ३. १२६ ॥
सिन्ध्ववकराभ्यां वा ॥ ४. ३. १२७ ॥
अमावास्यार्थादश्च ॥ ४. ३. १२८ ॥
स्थानान्तगोशालखरशालाल्लुक् ॥ ४. ३. १२९ ॥
अनूराधास्वातीतिष्यपुनर्वसुहस्तविशाखाबहुलाभ्यः ॥ ४. ३. १३० ॥
वत्सशालाभिजिदश्वयुङ्मृगशिरश्चित्रारेवतीरोहिणीभ्यो वा ॥ ४. ३ १३१ ॥
नित्यं स्त्रियां चित्रादिभ्यः ॥ ४. ३ १३२ ॥
शतभिषजोऽण् च डिद्वा ॥ ४. ३. १३३ ॥
श्रविष्ठाषाढाभ्यां छण् च ॥ ४. ३. १३४ ॥
फल्गुन्याष्ट च ॥ ४. ३. १३५ ॥
अश्विन्यादिभ्यो बहुलम् ॥ ४ ३. १३६ ॥
कृतलब्धक्रीतकुशलप्रायभवसंभूताः ॥ ४. ३. १३७ ॥
कालात् साधुपुष्यत्पच्यमानेषु ॥ ४. ३. १३८ ॥
उप्ते च ॥ ४. ३. १३९ ॥
आश्वयुज्या वुञ् ॥ ४. ३ १४० ॥
ग्रैष्मवसन्ताभ्यां वा ॥ ४. ३. १४१ ॥
देयमृणम् ॥ ४. ३. १४२ ॥
कलाप्यश्वत्थयवबुसेभ्यो वुन् ॥ ४. ३. १४३ ॥
ग्रीष्मावरसमाभ्यां वुञ् ॥ ४. ३. १४४ ॥
संवत्सराग्रहायणीभ्यां ठञ्च ॥ ४. ३. १४५ ॥

१. A. अथोर्वसो
२. A adds as a separate sūtra. डिद्वाणद्भिः
३. A. पुनन्ये पथः पन्थच्
४. A omits this and the following three sūtras.
५. A. ग्रयणीभ्यां

व्याहरति मृगः ॥ ४. ३. १४६ ॥

तदस्य सोढम् ॥ ४. ३. १४७ ॥

तत्र भवः ॥ ४. ३. १४८ ।

दिग्वर्गपूगगणोखामुखजघनवंशानुवंशदेशकालाकाशपक्षसाक्षिभ्यो यत् ॥ ४. ३. १४९ ॥

आद्यन्तान्तरग्रहःपथ्यलीकयूथन्यायमित्रमेघमेधाधार्याद्भ्यश्च ॥ ४ ३. १५० ॥

उदकात् संज्ञायाम् ॥ ४. ३. १५१ ॥

देहांशात्[2] ॥ ४. ३. १५२ ॥

इतिकुक्षिकलशिवस्त्यस्त्यहिभ्यो ढञ् ॥ ४. ३. १५३ ॥

ग्रीवातोऽण् च ॥ ४. ३. १५४ ॥

गम्भीरपञ्चजनाभ्यां[3] ञ्यः ॥ ४. ३ १५५ ॥

चतुर्मासाद्यञ्ञौ ॥ ४. ३. १५६ ॥

संज्ञायामण् लुक् च ॥ ४. ३. १५७ ॥

परेर्मुखौष्ठहनूलूखलेभ्योऽव्ययीभावे ॥ ४. ३. १५८ ॥

उपात्स्थूलाकलापाभ्याम् ॥ ४. ३. १५९ ॥

अनोः पथिपदयूपवंशसीतातिलयवभङ्गामापेभ्यः ॥ ४. ३. १६० ॥

पर्युपानुभ्यः सीरात् ॥ ४. ३. १६१ ॥

अन्तः पूर्वपदाट्ठञ् ॥ ४. ३. १६२ ॥

पर्यनुभ्यां ग्रामात् ॥ ४. ३. १६३ ॥

समानात् ॥ ४. ३. १६४ ॥

तदादेः ॥ ४. ३. १६५ ॥

लोकान्तात् ॥ ४. ३ १६६ ॥

अध्यात्माधिदेवाधिभूतेहलोकपरलोकोर्ध्वेन्दमादिभ्यश्च ॥ ४. ३ १६७ ।

जिह्वामूलाङ्गुलेश्छः ॥ ४. ३. १६८ ॥

वर्गान्तात् ॥ ४. ३. १६९ ॥

१. A. This portion is written as a separate sūtra.

२. A. देहाङ्गात्

३. A. जनबहिरदन्तस्वाभ्यां

४. A omits this sūtra.

५. A adds ऊर्ध्वमुहूर्तात्कस्मादमुष्मिन्नि-पत्यात्मशेषकदाचिदमुत्रपरत्रादि-भ्यश्च ॥

अंशब्दे यत्खौ च ॥ ४. ३. १७० ॥

मध्यान्मण्मीयौ च ॥ ४. ३. १७१ ॥

दिनण्मेध्यं चास्य ॥ ४. ३. १७२ ॥

ललाटाद्भूषणे कन् ॥ ४. ३. १७३ ॥

कर्णात् ॥ ४. ३. १७४ ॥

प्रायेणोपादेष्ठक् ॥ ४. ३. १७५ ॥

जानुनीविभ्यां च ॥ ४. ३. १७६ ॥

स्थामाजिनान्तेभ्यो लुक् ॥ ४. ३. १७७ ॥

मन्त्रेऽग्निष्टोमादिभ्यः ॥ ४. २. १७८ ॥

तस्य व्याख्यान इति कल्पे ॥ ४. ३. १७९ ॥

भवव्याख्यानयोर्व्याख्येयनाम्नः ॥ ४. ३. १८० ॥

बह्वचोऽन्तोदात्ताट्ठञ् ॥ ४. ३. १८१ ॥

यज्ञेभ्यः ॥ ४. ३. १८२ ॥

आध्यायेष्वेवर्षेः ॥ ४. ३. १८३ ॥

पौरोडाशपुरोडाशात् ष्ठन् ॥ ४. ३. १८४ ॥

छन्दसो यदणौ ॥ ४. ३. १८५ ॥

द्व्यजृग्ब्राह्मणप्रथमाध्वरपुरश्चरणानामाख्यातनामाख्यातेभ्यष्ठक् ॥ ४. ३. १८६ ॥

ऋगयनपदव्याख्यानोत्पातोत्पादपुनरुक्तनिरुक्तन्यायनिगमव्याकरणशिक्षोपनिषदृषिभ्योऽण् ॥ ४. ३. १८७ ॥

यज्ञचर्चाक्रमेतरऋक्षणनिमित्तमुहूर्तसंवत्सरेभ्यश्च ॥ ४. ३. १८८ ॥

क्षत्राङ्क्षत्रिवास्तुभ्यश्च विद्यायाः ॥ ४. ३. १८९ ॥

छन्दसो मानभाषाविचितिविजितिभ्यः ॥ ४. ३. १९० ॥

तत आगतः ॥ ४. ३. १९१ ॥

आयस्थानेभ्यष्ठक् ॥ ४. ३. १९२ ॥

शुण्डिकाकुकणखण्डिलोदपानोलपतीर्थभूमितृणपर्णेभ्योऽण् ॥ ४. ३. १९३ ॥

विद्यायोनिसंबन्धेभ्यो वुञ् ॥ ४. ३. १९४ ॥

१. A. This is read along with the previous sūtra.

२. A. दिनङ्मध्यं

३. A adds तत्र भवे च

ऋतष्ठञ्[1] ॥ ४. ३. १९५ ॥

पित्र्यं वा ॥ ४. ३. १९६ ॥

नृहेतुभ्यो रूप्यः ॥ ४. ३. १९७ ॥

मयट् च ॥ ४. ३. १९८ ॥

गोत्रादङ्कवत्[2] ॥ ४. ३. १९९ ॥

प्रभवति ॥ ४. ३. २०० ॥

वालवायाद्ञ्यो विदूरं चास्य ॥ ४. ३. २०१ ॥

तद्गच्छति पथिदूतयोः ॥ ४. ३. २०२ ॥

अभिनिष्क्रामति द्वारम् ॥ ४. ३. २०३ ॥

अधिकृत्य कृते ग्रन्थे ॥ ४. ३. २०४ ॥

शिशुक्रन्दयमसभेन्द्रजननप्रद्युम्नागमनसीतान्वेषणादिभ्यश्छः ॥ ४. ३. २०५ ॥

लुबाख्यायिकासु बहुलम् ॥ ४. ३. २०६ ॥

सोऽस्य निवासः ॥ ४. ३. २०७ ॥

अभिजनश्च ॥ ४. ३. २०८ ॥

गिरिभ्यः शास्त्रजीविषु छः ॥ ४. ३. २०९ ॥

सलातुराच्छण् ॥ ४. ३. २१० ॥

शाण्डिकशङ्खसटशकसर्वकेशसर्वसेनरहबोधकुचवारेभ्यो ञ्यः ॥ ४. ३. २११ ॥

सिन्धुगान्धारिकश्मीरमधुमत्किष्किन्धोरसासाल्ववर्णुगन्दिकन्दरत्कम्बोजेभ्यो-ऽण् ॥ ४. ३. २१२ ॥

तक्षशिलाछगलग्रामणीवत्सोद्धरणकाण्डधारकैर्मेदुरकिन्नरबर्बरावसानकंससं-कुचितेभ्योऽञ्[3] ॥ ४. ३. २१३ ॥

सिह्मक्रोष्टुभ्यां कर्णकात् ॥ ४. ३. २१४ ॥

तूदीवर्मतीभ्यां ढञ् ॥ ४ ३. २१५ ॥

भक्तिः ॥ ४. ३. २१६ ॥

महाराजाट्टक्[4] ॥ ४. ३. २१७ ॥

१. A. ष्ठच्
२. A. सहे - This sūtra is read along with the previous.
३. A. This and the following two sūtras are written as one.
४. A. ग्रन्थ-
५. A. ञ्योऽङ्
६. A. ड्टक्

अचित्तादेशकालात् ॥ ४. ३. २१८ ॥
वासुदेवार्जुनाभ्यां वुन् ॥ ४. ३. २१९ ॥
गोत्राद्वहुलं वृञ् ॥ ४. ३. २२० ॥
क्षत्रियात् ॥ ४. ३, २२१ ॥
जनपदवत्सर्वं तत्सरूपाद्वहुत्वे ॥ ४. ३. २२२ ॥
तेन प्रोक्तम्[2] ॥ ४. ३. २२३ ॥
[3]वेदं वेत्त्यधीते ॥ ४. ३. २२४ ॥
तित्तिरिवरतन्तुखण्डिकोखाच्छण् ॥ ४. ३. २२५ ॥
काश्यपकौशिकाभ्यां [4]ऋषिभ्यां कल्पं च णिनिः ॥ ४. ३. २२६ ॥
शौनकसाङ्गखसापेयशाण्डपेयवाजसनेयखाण्डायनकषायतलस्तम्भस्कन्धदेवदर्श-
रज्जुकण्ठकठशाठेभ्यः ॥ ४. ३. २२७ ॥
हरिद्रुतुम्बुरुलपालम्बिपलिङ्गकमलदयामायनचौभताण्ड्यारुणिभ्यः॥४. ३.२२८॥
कठचरकाल्लुक् ॥ ४. ३. २२९ ॥
कलापिनोऽण्[5] ॥ ४. ३. २३० ॥
छगलिनो ढिनुक् ॥ ४. ३. २३१ ॥
कर्मन्दकृशाश्वाभ्यां भिक्षुनटसूत्रमिनिः ॥ ४. ३. २३२ ॥
पाराशर्यशिलालिभ्यां णिनिः ॥ ४. ३. २३३ ॥
पुराणर्षेः ब्राह्मणम् ॥ ४. ३. २३४ ॥
कल्पे ॥ ४. ३. २३५ ॥
अथर्वणोऽण्[6] वेदे ॥ ४. ३. २३६ ॥
लुक्[7] च वा[8] ॥ ४. ३. २३७ ॥

१. A. This and the next sūtra are omitted.
२. A. प्रोक्तात्
३. A adds before this the following three sūtras:—
छण्णिथित्सुशौनकादिभ्यः ॥
मधुरादिभ्योऽण् ॥
प्राक्कल्पात्तेभ्यः ॥
४. A omits ऋषिभ्यां
५. A. च्याहरणत्ताण्ड्या-
६. A adds another sūtra:—
शाकल्यमुदपि पल्पदेभ्योऽण्
७. A. This portion is written as a separate sūtra.
८. A. This sūtra is written as part of the previous sūtra.
९. A omits वा

वसिष्ठादिभ्योऽनुवाकादिषु ॥ ४. ३. २३८ ॥

तेनैकदिक् ॥ ४. ३. २३९ ॥

तसिश्च ॥ ४. ३. २४० ॥

उरसो यच्च ॥ ४. ३. २४१ ॥

उपज्ञाते ॥ ४. ३. २४२ ॥

कृते ग्रन्थे[2] ॥ ४. ३. २४३ ॥

संज्ञायां मक्षिकासरघागमुत्पुत्तिकादिभ्यः[3] ॥ ४. ३. २४४ ॥

क्षुद्राभ्रमरपटरपात्रपादञ्[4] ॥ ४ ३. २४५ ॥

पुरुषाड्ढञ्[5] ॥ ४. ३. २४६ ॥

कुलालकुम्भकारकर्मारवरुडनिषादचण्डालश्वपाकानडुद्ब्राह्मणपरिषद्देवराजकुरुसेनासैरन्ध्रीबन्धुभ्यो वुञ्[6] ॥ ४. ३. २४७ ॥

तस्येदम्[7] ॥ ४. ३. २४८ ॥

रथाद्वोढरि यत् ॥ ४. ३. २४९ ॥

सपूर्वाच्च ॥ ४. ३. २५० ॥

अङ्गे च ॥ ४. ३. २५१ ॥

पत्रादेरञ्[8] ॥ ४. ३. २५२ ॥

पत्राद्ग्राह्ये[9] ॥ ४. ३. २५३ ॥

अध्वर्युपरिषद्भ्यां च ॥ ४. ३. २५४ ॥

हलसीराड्ढक्[10] ॥ ४. ३. २५५ ॥

द्वन्द्वाद्वैरे वुञ्च देवासुरादिभ्यः ॥ ४. ३. २५६ ॥

विवाहे ॥ ४. ३. २५७ ॥

नटाञ्ञ्यो नृत्ते ॥ ४. ३. २५८ ॥

छन्दोगौक्थिकयाज्ञिकबह्वृचेभ्यो धर्माम्नायसङ्घेषु ॥ ४. ३. २५९ ॥

१. A. This is written as part of the previous sūtra.

२. C omits ग्रन्थे

३. A. This portion is written as a separate sūtra.

४. A. This portion is written as a separate sūtra.

५. A repeats here the previous sūtra as a separate one.

६. A. तस्य स्वं

७. A. This and the following four sūtras are omitted.

आथर्वणिकादणि कलोपश्च ॥ ४. ३. २६० ॥
चरणाद्धुञ् ॥ ४. ३. २६१ ॥
गोत्रादद्ण्डमाणवान्तेवासिषु ॥ ४. ३. २६२ ॥
रैवतिकश्वापिसिक्षैमवृद्धिगौरग्रीव्यौदमेघ्यौदवापिवैजवापिभ्यश्छः ॥४.३.२६३॥
कौपिञ्जलहास्तिपदाभ्यामण् ॥ ४. ३. २६४ ॥
सैङ्घाङ्घोषलक्षणेष्वञ्यञिञः ॥ ४. ३. २६५ ॥
शाकलाद्वा ॥ ४. ३. २६६ ॥
वहेस्तुरिट् च ॥ ४. ३. २६७ ॥
शरणेऽग्नीधोरञ् घश्च ॥ ४. ३. २६८ ॥
समिध आधाने षेण्यण् ॥ ४. ३. २६९ ॥

इति श्री सरस्वतीकण्ठाभरणनाम्नि व्याकरणे
चतुर्थस्याध्यायस्य तृतीयः पादः
समाप्तः

---

१. A adds as a separate sūtra धर्माम्नायसमूहेषु
२. A. संघात्

अथ चतुर्थः पादः

तस्य विकारः ॥ ४. ४. १ ॥

अवयवश्च प्राण्योषधिवृक्षेभ्यः ॥ ४. ४. २ ॥

बिल्ववीहिमुद्गमसूरगोधूमेक्षुवेणुकार्पासीपाटलिकुटीरकर्कन्धूभ्योऽण् ॥ ४. ४. ३ ॥

पलाशखदिरविकङ्कतार्शिशपास्यन्दनकरीरयवासपालाशशिरीषेभ्योऽञ्च ॥ ४. ४. ४ ॥

कोपधादण् ॥ ४. ४. ५ ॥

उवर्णान्तानुदात्तादिप्राणिभ्योऽञ् ॥ ४. ४. ६ ॥

रजतसीसकंसलोहोदुम्बरवीध्रदारुपीतदारुविभीतकरोहितकत्रिकण्टककण्टकारिभ्यश्च ॥ ४. ४. ७ ॥

तालादण् धनुषि ॥ ४. ४. ८ ॥

इन्द्रादालिसादिसायुधेभ्यः ॥ ४. ४. ९ ॥

बार्हिणचपचमरपीयुक्षगवेधुकश्यामाकेभ्यः ॥ ४. ४. १० ॥

हेमार्थात् परिमाणे ॥ ४. ४. ११ ॥

त्रपुजतुनोः षुक् च ॥ ४. ४. १२ ॥

मयडैतयोर्भाषायामभक्ष्याच्छादनयोः ॥ ४. ४. १३ ॥

नित्यमेकाचः ॥ ४. ४. १४ ॥

गोः पुरीषे ॥ ४. ४. १५ ॥

छे ॥ ४. ४. १६ ॥

शरदर्भतृणकुटीसोमबल्बजेभ्यः ॥ ४. ४. १७ ॥

१. A. पूलास-

२. A. उवर्णान्तादनु-

३. A. शाटिशायुधेभ्यः

४. C omits this sūtra.

५. A. मयड्वैतयोः

६. A adds another sūtra नडादेः

७. A. This sūtra is found after ४. ४. १७.

८. A omits this sūtra.

व्रीहेः पुरोडाशे ॥ ४. ४. १८ ॥

तिलयवाभ्यामसंज्ञायाम् ॥ ४. ४. १९ ॥

पिष्टात् ॥ ४. ४. २० ॥

संज्ञायां कन् ॥ ४. ४. २१ ॥

क्रीतवत्परिमाणात् ॥ ४. ४. २२ ॥

शम्याष्लञ् ॥ ४. ४. २३ ॥

उष्ट्राद्वुञ् ॥ ४. ४. २४ ॥

उमोर्णाभ्यां वा ॥ ४. ४. २५ ॥

एणीकोशाड्ढञ् ॥ ४. ४. २६ ॥

पुरुषाद्वधे च ॥ ४. ४. २७ ॥

ह्योगोदेहात्खञ्हियङश्चास्य संज्ञायाम् ॥ ४. ४. २८ ॥

अपो यञ्वा ॥ ४. ४. २९ ॥

पयसो यत् ॥ ४. ४. ३० ॥

द्रोश्च ॥ ४. ४. ३१ ॥

माने वयः ॥ ४. ४. ३२ ॥

फले लुक् ॥ ४. ४. ३३ ॥

प्लक्षन्यग्रोधाश्वत्थेङ्गुदीवेणुबृहतीशिग्रुकर्कन्धुभ्योऽण् ॥ ४. ४. ३४ ॥

जम्ब्वा वा ॥ ४. ४. ३५ ॥

लुप् च ॥ ४. ४. ३६ ॥

हरीतकीपथ्याम्लिकाचिञ्चाद्राक्षामृद्वीकापिप्पलीकणाकोशातकीश्वेतपाक्या-
दिभ्यः ॥ ४. ४. ३७ ॥

फलपाकशोषिभ्यश्च गोधूमादिभ्यः ॥ ४. ४. ३८ ॥

१. A omits this sūtra.

२. A omits संज्ञायां and reads the other word along with sūtra ४. ४. १९.

३. A. This portion is written as a separate sūtra.

४. A adds वा

५. A. पिप्पलीकर्णार्जनवाकिनखरजनीकाडीदधिदोग्धिशङ्कुडीकण्ठकारिकागगरीकाशोकाकोशातकीश्वेतपत्या-दिभ्यः ॥

६. A. This portion is written as a separate sūtra.

पुष्पमूलेषुमालतीशेफालिकामल्लिकानवमालिकांशुमतीबृहतीविदारीहरिद्राभ्यः ॥ ४. ४. ३९ ॥

न वरणपाटलैरण्डाल्वादिभ्यः[1] ॥ ४. ४. ४० ॥

करवीराशोकचम्पककदम्बादिभ्यो लुक्[2] ॥ ४. ४. ४१ ॥

शिरीषहीबेरादिभ्यो वा ॥ ४. ४. ४२ ॥

कंसीयपरशव्ययोर्यञञौ लुक् च ॥ ४. ४. ४३ ॥

नद्विरद्रुमयगोमयफलेभ्यः ॥ ४. ४. ४४ ॥

प्राग्वहतेष्ठक् ॥ ४. ४. ४५ ॥

तेन जितं करणात् ॥ ४. ४. ४६ ॥

जयति दीव्यति खनति ॥ ४. ४. ४७ ॥

संस्कृतम् ॥ ४. ४. ४८ ॥

कुलुत्थकोपधादण् ॥ ४. ४. ४९ ॥

तरति ॥ ४. ४. ५० ॥

गोपुच्छाट्ठञ् ॥ ४. ४. ५१ ॥

द्व्यञ्नौभ्यां ठन् ॥ ४. ४. ५२ ॥

चरति ॥ ४. ४. ५३ ॥

आकर्षात् ष्टुल्[3] ॥ ४. ४. ५४ ॥

पर्पाश्वाश्वत्थरथजालव्यालव्यासपादेभ्यः ष्ठन्[4] ॥ ४. ४. ५५ ॥

श्वगणाट्ठञ् च ॥ ४. ४. ५६ ॥

वेतनवाहार्धवाहपादप्रेषणसुखशय्यास्फिग्वेशशक्तिभ्यो जीवति[7] ॥ ४. ४. ५७ ॥

उपाद्देशवेशहस्तस्थानेभ्यः ॥ ४. ४. ५८ ॥

व्यस्ताच्च धनुर्दण्डात् ॥ ४. ४. ५९ ॥

क्रयविक्रयाट्ठन्[6] ॥ ४. ४. ६० ॥

वस्नात् ॥ ४. ४. ६१ ॥

१. A omits this sūtra.

२. A adds च

३. A. करणिराशोक-

४. A. This is written as part of the previous sūtra.

५. A. This is written as part of the previous sūtra.

६. A. ष्ठक्

७. A omits पादेभ्यः ··· प्रेषण in ४. ४. ५७.

आयुधाच्छ च ॥ ४. ४. ६२ ॥

व्रातात् खञ् ॥ ४. ४. ६३ ॥

उत्सङ्गोडुपोटुपोत्पुटपिटकपिटाकेभ्यो हरति ॥ ४. ४. ६४ ॥

भस्त्राभरटभरणशीर्षभारांसभारेभ्यः ष्ठन् ॥ ४. ४. ६५ ॥

विविधवीविधाद्वा ॥ ४. ४. ६६ ॥

अण् कुटिलिकायाः ॥ ४. ४. ६७ ॥

अक्षद्यूतगतानुगतगतागतयातोपयातपादस्खेदनकण्टकमर्दनेभ्यो निर्वृत्ते ॥ ४. ४. ६८ ॥

जङ्घायाः प्रहृतप्रहाराभ्याम् ॥ ४. ४. ६९ ॥

भावादिमपौ ॥ ४. ४. ७० ॥

क्त्रेः ॥ ४. ४. ७१ ॥

अपमित्यात् कक् ॥ ४. ४. ७२ ॥

याचितात् कन् ॥ ४. ४. ७३ ॥

संसृष्टम् ॥ ४. ४. ७४ ॥

चूर्णादिनिः ४. ४. ७५ ॥

लवणाल्लुक् ॥ ४. ४. ७६ ॥

मुद्गादण् ॥ ४. ४. ७७ ॥

उपसिक्तं व्यञ्जनेभ्यः ॥ ४. ४. ७८ ॥

ओजस्सहोऽम्भसा वर्तते ॥ ४. ४. ७९ ॥

तं प्रत्यनुभ्यामीपलोमकूलेभ्यः ॥ ४. ४. ८० ॥

परेर्मुखपार्श्वाभ्याम् ॥ ४. ४. ८१ ॥

उज्झति ॥ ४ ४. ८२ ॥

रक्षति ॥ ४. ४. ८३ ॥

शब्ददर्दुरं करोति ॥ ४. ४. ८४ ॥

पक्षिमत्स्यमृगान्हन्ति ॥ ४. ४. ८५ ॥

परिपन्थं तिष्ठति च ॥ ४. ४. ८६ ॥

माथान्तपदव्यनुपदाक्रन्दान् धावति ॥ ४. ४. ८७ ॥

१. A. विविधवीविधाद्वा
२. A adds च
३. A. त्रेः
४. A. पन्थि
५. A adds परिपथं चैके

पदान्तप्रतिकण्ठार्थललामं गृह्णाति ॥ ४. ४. ८८ ॥

गर्ह्यम् ॥ ४. ४. ८९ ॥

वृद्धेर्वृधुष् ॥ ४. ४. ९० ॥

दशैकादशकुसीदाभ्यां घ्रुन् ॥ ४. ४. ९१ ॥

धर्माधर्मं चरति ॥ ४. ४. ९२ ॥

प्रतिपथमेति ठंश्च ॥ ४. ४. ९३ ॥

समवायान् समवैति ॥ ४. ४. ९४ ॥

परिषदो ण्यः ॥ ४. ४. ९५ ॥

सेनाया वा ॥ ४. ४. ९६ ॥

लालाटिककौक्कुटिकौ ॥ ४. ४. ९७ ॥

परदारादीन् गच्छति ॥ ४. ४. ९८ ॥

सुस्नातादीन् पृच्छति ॥ ४. ४. ९९ ॥

प्रभूतादीनाह ॥ ४. ४. १०० ॥

मांशब्द इत्यादिभ्यः ॥ ४. ४. १०१ ॥

तस्य धर्म्यम् ॥ ४. ४. १०२ ॥

ऋतोऽञ् ॥ ४. ४. १०३ ॥

विशसितृविभाजयित्रोरिण्णलोपौ च ॥ ४. ४. १०४ ॥

महिषीप्रजावतीयजमाननरानुचारकपुरोहितहोतृमणिपालीभ्योऽण् ॥४.४.१०५॥

व्यनुप्रेभ्यो लेपिकायाः ॥ ४. ४. १०६ ॥

अवक्त्रयः ॥ ४. ४. १०७ ॥

तदस्य पण्यम् ॥ ४. ४. १०८ ॥

लवणाट्ठञ् ॥ ४. ४. १०९ ॥

किसरतगरोशीरहरिद्रागुग्गुलुस्थगलनलदर्पणेभ्यः घ्रुन् ॥ ४. ४. ११० ॥

शलालुनो वा ॥ ४. ४. १११ ॥

शिल्पमृदङ्गादिभ्यो वादनादिवृत्तिभ्यः ॥ ४. ४. ११२ ॥

१. A. समवायार्थात्
२. A. This is written as part of the previous sūtra.
३. A. धर्म्यः
४. A. तृपिभाज
५. A. क्रयः
६. A. घ्रुक्
७. A. This is written as part of the previous sūtra.

मडुकझर्झराभ्यामण् च ॥ ४. ४. ११३ ॥

प्रहरणम् ॥ ४. ४. ११४ ॥

परश्वधाट्ठञ् च ॥ ४. ४. ११५ ॥

शक्तियष्टिभ्यां टीकक् ॥ ४. ४. ११६ ॥

अस्ति नास्ति दिष्टमिति मतिः ॥ ४. ४. ११७ ॥

शीलमपूपादिभ्यो भक्षणादिवृत्तिभ्यः ॥ ४. ४. ११८ ॥

छत्रसत्यानृतविशिखाभ्यो गुरूपसदनादिवृत्तिभ्योऽणः ॥ ४. ४. ११९ ॥

अङ्कस्थः ॥ ४. ४. १२० ॥

शिक्षाभिक्षाभक्षाचुरातपःकर्मकृष्युपस्थानप्ररोहविश्वर्धादिभ्यः ॥ ४. ४. १२१ ॥

कर्माध्ययने वृत्तम् ॥ ४. ४. १२२ ॥

बह्वच्पूर्वपदात् ठच् ॥ ४. ४. १२३ ॥

हितं भक्ष्यं तदस्मै ॥ ४. ४. १२४ ॥

दीयते नियुक्तम् ॥ ४. ४ १२५ ॥

श्राणमांसमांसौदनोदनेभ्यष्टिकन् ॥ ४. ४. १२६ ॥

भक्तादण् च ॥ ४. ४. १२७ ॥

तत्र नियुक्तः ॥ ४ ४ १२८ ॥

अगारान्ताट्टन् ॥ ४. ४. १२९ ॥

अदेशकालादधीते ॥ ४. ४. १३० ॥

कठिनान्तप्रस्तारसंस्थानेभ्यो व्यवहरति ॥ ४. ४. १३१ ॥

निकटश्मशानवृक्षमूलेषु वसति ॥ ४. ४. १३२ ॥

आवसथात् ष्ठल् ॥ ४. ४. १३३ ॥

समानतीर्थाद्यः ॥ ४. ४. १३४ ॥

प्राग्घिताद्यत् ॥ ४. ४. १३५ ॥

तद्वहति युगप्रासङ्गाभ्याम् ॥ ४. ४. १३६ ॥

१. A omits च

२. A adds before this as a separate sūtra. अण् चैके.

३. A. This portion is written as a separate sūtra.

४. A. साभ्यः

५. A. ष्ठच्

६. A adds before this as a separate sūtra युञ्ण्याणैके.

७. A adds वा

८. A. अगाराड्टन्

धुरो ढक् च ॥ ४. ४. १३७ ॥
सर्वोत्तरदक्षिणादेः खः ॥ ४. ४. १३८ ॥
एकादेर्लुक् च ॥ ४. ४. १३९ ॥
शकटादण् ॥ ४. ४. १४० ॥
हलसीराट्टक् ॥ ४. ४. १४१ ॥
संज्ञायां जन्याः ॥ ४. ४. १४२ ॥
विध्यत्यकरणेन ॥ ४. ४. १४३ ॥
धेनगणं लब्धा ॥ ४. ४. १४४ ॥
अन्नाण्णः ॥ ४. ४. १४५ ॥
वशंगतः ॥ ४. ४. १४६ ॥
पदमस्मिन् दृश्यः ॥ ४. ४ १४७ ॥
मूलमस्या दृढम् ॥ ४. ४. १४८ ॥
संज्ञायां धेनुष्या ॥ ४. ४. १४९ ॥
गृहपतिना संयुक्ते ञ्यः ॥ ४. ४. १५० ॥
मूलेनानाम्ये ॥ ४. ४ १५१ ॥
वयसा च तुल्ये ॥ ४ ४. १५२ ॥
नौतुलाविषैस्तार्यसंमितवध्येषु ॥ ४. ४. १५३ ॥
सितया समिते ॥ ४. ४. १५४ ॥
धर्मेण प्राप्यम् ॥ ४. ४. १५५ ॥
पथ्यर्थन्यायाच्चानपेते ॥ ४ ४. १५६ ॥
छन्दसां निर्मिते ॥ ४. ४. १५७ ॥
उरसोऽण् च ॥ ४. ४. १५८ ॥
हृदयस्य प्रियः ॥ ४. ४. १५९ ॥
बन्धने चर्षौ ॥ ४. ४. १६० ॥

१. A. ढक्
२. A. This is read along with the previous sūtra.
३. A. लब्ध्वा.
४. A. This is read as part of the previous sūtra.
५. A adds as a separate sūtra. सपूर्वायाश्च.
६. A. This is read as part of the previous sūtra,
७. A. छन्दसी

मतात्करणे ॥ ४. ४. १६१ ॥

जनाज्जल्पे ॥ ४. ४. १६२ ॥

हलात्कर्षे ॥ ४. ४. १६३ ॥

तदन्ताच्च ॥ ४. ४. १६४ ॥

तत्र साधुः ॥ ४. ४. १६५ ॥

सभाया यः ॥ ४. ४. १६६ ॥

प्रतिपञ्चमहाजनविश्वेभ्यो[1] जनात् खञ्[2] ॥ ४. ४. १६७ ॥

समिदंसमपरेभ्यो युगात् ॥ ४. ४. १६८ ॥

परस्यामुष्यपरेभ्यः कुलात्[3] ॥ ४. ४. १६९ ॥

भक्ताण्णः ॥ ४. ४. १७० ॥

पर्षदो ण्यश्च ॥ ४. ४. १७१ ॥

कथायाष्ठक् ॥ ४. ४. १७२ ॥

विविश्वपूर्वायाश्च ॥ ४. ४. १७३ ॥

जनेजनाभ्यां वादात् ॥ ४ ४. १७४ ॥

वृत्तिसंग्रहगणगुणायुर्वेदवितण्डाभ्यश्च ॥ ४. ४. १७५ ॥

गुडापूपसक्तुमांसौदनकुल्माषवेणुभ्यष्ठञ् ॥ ४. ४. १७६ ॥

समो वाहिघातकग्रामेभ्यः ॥ ४. ४. १७७ ॥

प्रेन्युपेभ्यो वासात् ॥ ४. ४. १७८ ॥

पथ्यतिथिवसतिस्वपतिभ्यो ढञ् ॥ ४. ४. १७९ ॥

समानोदरे शयित[4] यत् ॥ ४. ४. १८० ॥

प्राक्रीताच्छः ॥ ४. ४. १८१ ॥

उगोहविर्बहिरष्टकामेधाल्लुग्युगस्त्वदाक्षरासुरखरदरविषाध्वक्लेपेभ्यो यत् ॥ ४. ४. १८२ ॥

नाभेर्नश्चादेर्हांशात् ॥ ४. ४. १८३ ॥

ऊधसो नश्च ॥ ४. ४. १८४ ॥

शुनः संप्रसारणं दीर्घश्च वा ॥ ४. ४. १८५ ॥

१. A. सर्वविश्वेभ्यो

२. A. खः

३. A. This portion is written as a separate sūtra.

४. A. This is written as part of the previous sūtra.

५. A. शयितरि ॥

कम्बलात्संज्ञायाम् ॥ ४. ४. १८६ ॥

हविर्भ्यो वा ॥ ४. ४. १८७ ॥

यूपदीपाश्वपत्रस्थूणार्गळामुसलकटककर्णवेष्टकापूपसूपौदनपृथुकाभ्युषापोष · तण्डुलकिण्वान्नविकारेभ्यश्च ॥ ४. ४. १८८ ॥

तस्मै हितम् ॥ ४. ४ १८९ ॥

न राजाचार्यवृषब्राह्मणेभ्यः ॥ ४. ४. १९० ॥

शरीरावयवाद्यत् ॥ ४. ४. १९१ ॥

खलयवमाषतिलवृषब्रह्मरथेभ्यः ॥ ४. ४. १९२ ॥

अजाविभ्यां ष्यन् ॥ ४. ४. १९३ ॥

भोगान्तात्मनः खः ॥ ४. ४. १९४ ॥

पञ्चविंशाभ्यां जनात्कर्मधारये ॥ ४. ४. १९५ ॥

सर्वात् ॥ ४ ४. १९६ ॥

महतश्च ठञ् ॥ ४. ४. १९७ ॥

सर्वाण्णो वा ॥ ४. ४. १९८ ॥

पुरुषाड्ढञ् ॥ ४. ४. १९९ ॥

माणवचरकाभ्यां खञ् ॥ ४. ४. २०० ॥

तदर्थं विकृतेः प्रकृतौ ॥ ४. ४. २०१ ॥

ऋषभोपानद्भ्यां ञ्यः ॥ ४. ४. २०२ ॥

चर्मण्यञ् ॥ ४. ४. २०३ ॥

छदिबलिभ्यां ढञ् ॥ ४. ४. २०४ ॥

उपधेः स्वार्थे ॥ ४. ४. २०५ ॥

तदस्यात्र स्यादिति ॥ ४. ४. २०६ ॥

परिखाया ढञ् ॥ ४. ४. २०७ ॥

इति श्रीसरस्वतीकण्ठाभरणनाम्नि व्याकरणे
चतुर्थस्याध्यायस्य चतुर्थः पादः
समाप्तः

---

१. A omits this sūtra.

२. A omits this sutra.

॥ अथ पञ्चमोऽध्यायः ॥

—:o:—

प्राग्वतेष्ठञ् ॥ ५. १. १ ॥
संख्यादेश्चालुकः ॥ ५. १. २ ॥
आर्हादगोपुच्छसंख्यापरिमाणाट्टक् ॥ ५. १. ३ ॥
निष्कपणपादमाषवाहद्रोणषष्टिभ्यश्चासमासे ॥ ५ १. ४ ॥
कंसार्धाभ्यां टिठन् ॥ ५. १. ५ ॥
कार्षापणात् प्रतिश्चास्य वा ॥ ५. १. ६ ॥
शूर्पादञ् ॥ ५. १. ७ ॥
सहस्रवसनविंशतिकशतमानेभ्योऽण् ॥ ५. १. ८ ॥
शतात्केवलात् ठन्यतावस्मिन् ॥ ५. १. ९ ॥
संख्याया अतिशतः कन् ॥ ५. १. १० ॥
कतेश्च ॥ ५. १. ११ ॥
वतोरिङ् च वा ॥ ५. १. १२ ॥
विंशतित्रिंशद्भ्यां ॥ ५. १. १३ ॥
असंज्ञायां ङ्न् ॥ ५. १. १४ ॥
द्विगोर्लुगङ्ञिः ॥ ५. १. १५ ॥
कार्षापणसहस्रसुवर्णशतमानाद्वा ॥ ५. १. १६ ॥
द्वित्रिबह्वादेः निष्कबिस्तात्[4] ॥ ५. १. १७ ॥
विंशतिकात् खः ॥ ५. १. १८ ॥
केवलाभ्यां च खारीकाकणीभ्यामीकन् ॥ ५. १. १९ ॥
पणपादमाषेभ्यो यत् ॥ ५. १. २० ॥
शताद्वा ॥ ५. १. २१ ॥
शाणात् ॥ ५. १. २२ ॥

१. A. पाणिपाद
२. A omits this and the following four sūtras.
३. A omits this sūtra.
४. A. बिस्ताभ्याम्
५. A adds शिवाभ्यां

द्वित्र्यादेरण् च ॥ ५. १. २३ ॥

तेन क्रीतं मूल्यात् ॥ ५. १. २४ ॥

तस्य वापः ॥ ५. १. २५ ॥

पात्रात् ष्ठन् ॥ ५. १. २६ ॥

वातपित्तश्लेष्मसन्निपातेभ्यः शमनकोपनयोः ॥ ५. १. २७ ॥

तस्य निमित्तं संयोगोत्पातौ ॥ ५. १. २८ ॥

द्व्यचोऽसंख्यापरिमाणश्वगणवसूर्णोमाभङ्गावर्षाश्मनो यत् ॥ ५. १. २९ ॥

ब्रह्मवर्चसात् ॥ ५. १. ३० ॥

पुत्राच्छ च ॥ ५. १. ३१ ॥

पृथिवीसर्वभूमिभ्यामञ्ञणौ ॥ ५. १. ३२ ॥

ईश्वरः ॥ ५. १. ३३ ॥

तत्र विदितः ॥ ५. १. ३४ ॥

लोकसर्वलोकाभ्यां ठञ् ॥ ५. १. ३५ ॥

तदत्रास्मै वृद्ध्यायलाभशुल्कोपदं दीयते ॥ ५. १. ३६ ॥

पूरणार्धाट्ठन् ॥ ५. १. ३७ ॥

भागाद्यच्च ॥ ५. १. ३८ ॥

तदस्य परिमाणम् ॥ ५. १. ३९ ॥

जीवितस्य च ॥ ५. १. ४० ॥

संख्यायाः सङ्घसूत्राध्ययनेषु ॥ ५. १. ४१ ॥

संज्ञायां च ॥ ५. १. ४२ ॥

पङ्क्तिः ॥ ५. १. ४३ ॥

१. A. This portion is written as a separate sūtra.

२. A. संयोगात् पातौ. The latter word is written as a separate sūtra.

३. A. गङ्गा

४. A. This and the following two sūtras are written as one.

५. A. शुल्के पादं

६. A. र्थादट्ठन्

७. C adds as a separate sūtra पङ्क्तिः

८. A. This and the next sūtra are written together.

विंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् ॥ ५. १. ४४ ॥

सहस्रायुतनियुतप्रयुतार्बुदन्यर्बुदादयश्च ॥ ५. १. ४५ ॥

पञ्चद्दशतौ वर्गे वा ॥ ५. १. ४६ ॥

स्तोमे डट् ॥ ५. १. ४७ ॥

त्रिंशच्चत्वारिंशद्भ्यां ब्राह्मणाख्यायां डण् ॥ ५. १. ४८ ॥

[2]भृतिवस्नांशाः ॥ ५. १. ४९ ॥

तत्पचति द्रोणादण् च ॥ ५. १. ५० ॥

संभवत्यवहरति च ॥ ५. १. ५१ ॥

पात्राचितादाढकेभ्यः खो वा ॥ ५. १. ५२ ॥

[3]द्विगोः ष्ठंश्च ॥ ५. १. ५३ ॥

कुलिजाल्लुक् च वा ॥ ५. १. ५४ ॥

हरतिवहत्यावहतिवंशकुटजबल्बजमूलस्रट्स्थूणाश्रवणाक्षाश्मेक्षुभ्यो भारात् ॥ ५. १. ५५ ॥

भारेभ्यश्च वंशादिभ्यः ॥ ५. १. ५६ ॥

द्रव्यवस्नाभ्यां कन्ठनौ ॥ ५. १. ५७ ॥

[4]अर्हति ॥ ५. १. ५८ ॥

छेदभेदद्रोहदोहनकर्षसंप्रयोगविप्रयोगविप्रकर्षप्रेषणसंप्रश्नेभ्यो नित्यम् ॥ ५. १. ५९ ॥

विरागाद्विरङ्गश्च ॥ ५. १. ६० ॥

[5]शीर्षच्छेदाद्यच्च ॥ ५. १. ६१ ॥

[6]यज्ञाद्धस्तत्कर्म च ॥ ५. १. ६२ ॥

पात्राद्यश्च ॥ ५. १. ६३ ॥

दण्डमुसलमेधवधमधुपर्कार्घमेघोदकेभकशायुगेभ्यः ॥ ५. १. ६४ ॥

[7]दक्षिणकडङ्करस्थालीबिलेभ्यश्छ च ॥ ५. १. ६५ ॥

[8]आर्त्विज्यं चर्त्विजः खञ् ॥ ५. १. ६६ ॥

१. A. This and the next sūtra are written together.
२. A. हृतिखत्स्रांशः ॥
३. A omits this sūtra.
४. A. आर्हतभोजनादिभ्यः
५. A. शीर्षा-
६. A. यज्ञा-
७. A. दक्षिणारस्थाली-
८. A. आर्तिं चर्त्वचः

अधृष्टाकार्ययोः शालीनकौपीने ॥ ५. १. ६७ ॥

पारायणतुरायणचान्द्रायणेभ्यो वर्तयति ॥ ५. १. ६८ ॥

संशयादापन्नः ॥ ५. १ ६९ ॥

योजनाद्गच्छति ॥ ५. १. ७० ॥

क्रोशयोजनादेः शतात् ततोऽभिगमनार्हे च ॥ ५. १. ७१ ॥

पथः ष्ठन् ॥ ५. १. ७२ ॥

णः पन्थश्च नित्यम् ॥ ५. १. ७३ ॥

अजशङ्कूत्तरवारिजाङ्गलकान्तारादेस्तेनाहृते च ॥ ५. १. ७४ ॥

स्थलादेः ॥ ५. १. ७५ ॥

मधुकमरिचयोरण् ॥ ५. १. ७६ ॥

कालात् ॥ ५. १. ७७ ॥

तेन निर्वृत्तम् ॥ ५. १. ७८ ॥

तस्मै भृतोऽधीष्टः ॥ ५. १. ७९ ॥

तं भूतो भावी ॥ ५. १. ८० ॥

मासाद्वयसि यत्खञौ ॥ ५. १. ८१ ॥

द्विगोर्यण् ॥ ५. १. ८२ ॥

षण्मासाण्ण्यच्च वा ॥ ५. १. ८३ ॥

अवयसि ठंश्च ॥ ५. १. ८४ ॥

समायाः खः ॥ ५. १. ८५ ॥

द्विगोर्वा ॥ ५. १. ८६ ॥

रात्र्यहःसंवत्सराच्च ॥ ५. १. ८७ ॥

वर्षाल्लुक् च ॥ ५. १. ८८ ॥

तेन पच्यन्ते षष्टिरात्रात् कन् रात्रेलोपश्च संज्ञायाम् ॥ ५. १. ८९ ॥

परिजय्यलभ्यकार्यसुकराणि ॥ ५. १. ९० ॥

१. A. This is read along with the previous sūtra.

२. A adds खञौ

३. A. This is read along with the previous sūtra.

४. A. This is read along with the previous sūtra.

५. A. This portion is written as a separate sūtra.

तदस्य ब्रह्मचर्यम्[1] ॥ ५. १. ९१ ॥
तस्य महानाम्न्यादित्यव्रतगोदानादिभ्यः[2] ॥ ५. १. ९२ ॥
तच्चरतीति चैतेभ्यो व्रतवृत्तिभ्यः[3] ॥ ५. १. ९३ ॥
देववततिलव्रतावान्तरदीक्षादिभ्यो डिनिः[4] ॥ ५. १. ९४ ॥
ङुंश्राष्टाचत्वारिंशतो वर्षाणाम्[5] ॥ ५. १. ९५ ॥
चातुर्मास्येभ्यो यलोपश्च[6] ॥ ५. १. ९६ ॥
तस्य दक्षिणा यज्ञेभ्यः[7] ॥ ५. १. ९७ ॥
तत्र दीयते ॥ ५. १. ९८ ॥
कालात्कार्यं[8] च भववत्[9] ॥ ५. १. ९९ ॥
व्युष्टनित्यनिष्क्रमणप्रवेशनतीर्थसङ्क्रामसङ्घाताग्निपदपीलुमूलादिभ्योऽण्[10] ॥ ५. १. १०० ॥
यथाकथाचाण्णः[11] ॥ ५. १. १०१ ॥
तेन हस्ताद्यत्[12] ॥ ५. १. १०२ ॥
शोभते ॥ ५. १. १०३ ॥
कर्मवेशाभ्यां यत्[13] ॥ ५. १. १०४ ॥
तस्मै प्रभवति समस्तापनाद्ग्रामयोगवेशपेषघातपरायमोदनेभ्यः[14] ॥ ५. १. १०५ ॥
निरः पेषघोषाभ्याम्[15] ॥ ५. १. १०६ ॥
निव्युपेभ्यः सर्गात्[16] ॥ ५. १. १०७ ॥
प्रोपाभ्यां वासात्[17] ॥ ५. १. १०८ ॥
सक्तुमांसौदनमांसौदनेभ्यश्च[18] ॥ ५ १. १०९ ॥
योगाद्यच्च[19] ॥ ५. १. ११० ॥
कर्मण उकञ्[20] ॥ ५. १. १११ ॥
सोऽस्य प्राप्तः समयात्[21] ॥ ५. १. ११२ ॥
ऋतूपर्वस्तृप्राशित्रादिभ्योऽण्[22] ॥ ५. १. ११३ ॥
कालाद्यत्[23] ॥ ५. १. ११४ ॥

१. A adds as a separate sūtra सोऽस्य ब्रह्मचर्ये
२. A omits महा
३. A. व्रतयोगा-
४. A. कार्यात् कार्य
५. A. यथाचाणः
६. A. This portion is written as a separate sūtra.
७. A. द्यश्च.
८. A. वस्त्र.

प्रकृष्टष्ठञ् ॥ ५. १. ११५ ॥
प्रयोजनम् ॥ ५. १. ११६ ॥
एकागाराच्चौरे ॥ ५. १. ११७ ॥
अकालात् ठंश्च ॥ ५. १. ११८ ॥
चूडाश्रद्धादिभ्योऽण् ॥ ५. १. ११९ ॥
विशाखाषाढाभ्यां मन्थदण्डयोः ॥ ५. १. १२० ॥
उदुपाभ्यां स्थापेरनान्ताच्छः ॥ ५. १. १२१ ॥
अनोर्वंचिप्रवचिवासिविशिभ्यः ॥ ५. १. १२२ ॥
रुहेः प्राङ्भ्यां च ॥ ५. १. १२३ ॥
समाङो विशिरमिभ्याम् ॥ ५. १. १२४ ॥
विशिपूरिपदिरुहिसमापिभ्यः सपूर्वपदेभ्यः ॥ ५. १. १२५ ॥
स्वर्गधनायुर्यशःकामेभ्यो यत् ॥ ५. १. १२६ ॥
पुण्याहस्वस्तिशान्तिभ्यो वाचनालुङ्[1] ॥ ५. १. १२७ ॥
तेन तुल्यं क्रियाचेद्वतिः ॥ ५. १. १२८ ॥
तत्र तस्येव[2] ॥ ५. १. १२९ ॥
तदर्हम् ॥ ५. १. १३० ॥
तस्य भावस्त्वतलौ ॥ ५. १. १३१ ॥
नञादेस्तत्पुरुषात् ॥ ५. १. १३२ ॥
चतुरसङ्गतलवणबडघुधकतरसलसेभ्यो वा ॥ ५. १. १३३ ॥
पृथुमृदुपटुपाण्डुखण्डचण्डस्वादुसाधुबहुमहदणुतनूरुगुरुलघुभ्य इमनिच्[3] ॥ ५. १. १३४ ॥
होडवत्सपाकाकिञ्चनर्जुचार्वाशुवक्रवृद्धकालतृप्रक्षिप्रक्षुद्रह्रस्वप्रियेभ्यश्च ॥ ५. १. १३५ ॥
वर्णदृढपरिवृढकृशभृशाम्लचुक्रलवणमधुरशीतोष्णजडेभ्यः ष्यञ्च ॥ ५. १. १३६ ॥
बालतरुणमन्दमूकमूलकालमूर्खपण्डितस्थिरबहुलबधिरदीर्घेभ्यश्च ॥ ५. १. १३७ ॥
वेर्यातलातशारदेभ्यः ॥ ५. १. १३८ ॥
समश्च मतिमनोभ्याम् ॥ ५. १. १३९ ॥

१. A. लुकि
२. A. तस्यैव
३. A. इनि च

गुणवचनेभ्योऽसमासकृत्तद्धिताव्ययसर्वनामसंख्याख्येभ्यः कर्मणि च ॥ ५. १. १४० ॥

ब्राह्मणमाणवबाडवधूर्तचोरचपलकुशलनिपुणसुहितपिशुनबालिशालसेभ्यः ॥ ५. १. १४१ ॥

गडुलदीनदायादविदग्धोचितसमग्रशीलतत्परेदम्परयथातथयथापुरयुनःपुनर - भीक्ष्णतरतमप्रकामयथाकामेभ्यश्च ॥ ५. १. १४२ ॥

एकद्वित्रिस्वान्येभ्यो भावात् ॥ ५. १. १४३ ॥

तत्त्वसमविषमपरममध्येभ्यः स्यात् ॥ ५. १. १४४ ॥

निर्दुभ्यां कुलात् ॥ ५. १. १४५ ॥

दुष्काराजभ्यः पुरुषात् ॥ ५. १. १४६ ॥

व्याङ्परेभ्योरावयात् ॥ ५. १. १४७ ॥

गणाधिभ्यां पत्युः ॥ ५. १. १४८ ॥

वेः शायशस्तिभ्याम् ॥ ५. १. १४९ ॥

स्वधिस्वर्जनमहद्युवभ्यो राज्ञः ५. १. १५० ॥

सम्राजः ॥ ५. १. १५१ ॥

अर्हतो नुं च ॥ ५. १. १५२ ॥

समो वेदिविशिभ्यां णिनः ॥ ५. १. १५३ ॥

बहोश्च भाषः ॥ ५. १. १५४ ॥

शीर्षनिविभ्यो हनः ॥ ५. १. १५५ ॥

नञः क्षेत्रज्ञेश्वराविदूरपिशुननृशंसयथातथयथापुरेभ्यः ॥ ५. १. १५६ ॥

सधर्मानुकूलपरिमण्डलविश्वरूपार्वागुदासीनेश्वरप्रतिभूसाक्षिमानुषास्तिक - नास्तिकेतिहयुगपत्पूर्वापरोत्तराधरादिभ्यश्च ॥ ५. १. १५७ ॥

चातुर्वर्ण्यचातुराश्रम्यचातुर्वैद्यत्रैलोक्यत्रैसन्ध्यत्रैकाल्यत्रैशब्द्यत्रैस्वर्यषाङ्गुण्य - सैन्यसान्निध्यसामीप्यौपम्यसौख्यसार्ववैद्यादीनां स्वार्थे ॥ ५. १. १५८ ॥

पत्यन्तपुरुहितवार्षिकग्रामिकचार्मिकधार्मिकसिलिकसूचिकसूचकखण्डिकदण्ड - काजनिकाञ्जलिकप्रचिकच्छत्रकराजम्सरत्कसारथिभ्यो यक् ॥ ५. १. १५९ ॥

सखिदूतवणिग्भ्यो यः ॥ ५. १. १६० ॥

१. A. संख्याभ्यः
२. A. लसद्भ्यः
३. A. व्याङ्
४. A. विदि
५. A and C. नृशंस
६. A. धर्मानु

स्तेनाद्यन्नलोपश्च ॥ ५. १. १६१ ॥

दूतादिभ्यः ष्यञ्च ॥ ५. १. १६२ ॥

कपिज्ञातिभ्यां ढकू ॥ ५. १. १६३ ॥

प्राणिजातिवयोऽर्थोद्गात्रुन्नेतृप्रतिहर्तृकर्तृहोतृप्रशास्त्रध्वर्युवधूसुष्ठुदुष्ठुरथगणक - पत्तिगणकेभ्योऽञ् ॥ ५. १. १६४ ॥

हायनान्तयुवस्थविरभ्रातृयजमानमिथुनपिशुननिपुणकुशलचपलकुलीनानृशंसे - भ्योऽण् ॥ ५. १. १६५ ॥

सहःश्रवणकुतुककुतूहलवृषलकण्डुककमण्डलुकितवपोतुक्षेत्रज्ञपरिव्राजकस - ब्रह्मचारिभ्यश्च ॥ ५. १. १६६ ॥

सुदुर्भ्यां हृदः ॥ ५. १. १६७ ॥

भ्रातुश्च ॥ ५. १. १६८ ॥

कोश्च स्त्रियाः ॥ ५. १. १६९ ॥

पुरुषहृदयाभ्यामसमाँसे ॥ ५. १. १७० ॥

श्रोत्रियाद्यलोपश्च ॥ ५. १. १७१ ॥

इको लघुपूर्वादकवेः ॥ ५. १. १७२ ॥

योपधाद्गुरूपोत्तमादसुप्रख्याद्गुञ् ॥ ५. १. १७३ ॥

सहायात् ष्यञ्च ॥ ५ १. १७४ ॥

द्वन्द्वमनोज्ञप्रियरूपकल्याणाढ्यमेधाविछात्रछान्दसश्रोत्रियचोरधूर्तविश्वदेवयुव- वृद्धामुष्यकुलावश्यंबहुलेभ्यः ॥ ५. १. १७५ ॥

कुलामुष्यंसरोभ्यः पुत्रात् ॥ ५. १. १७६ ॥

ग्रामात्कुमारषण्डाभ्यां च ॥ ५. १. १७७ ॥

गोत्रचरणात् श्लाघात्याकारप्राप्त्यवगमेषु ॥ ५. १. १७८ ॥

मैत्रावरुणाग्नीध्राच्छावाकनेष्टृपोतृब्राह्मणाच्छंसिभ्यश्छः ॥ ५. १. १७९ ॥

ब्रह्मणस्त्वः ॥ ५. १. १८० ॥

इति श्रीसरस्वतीकण्ठाभरणनाम्नि व्याकरणे
पञ्चमाध्यायस्य प्रथमः पादः
समाप्तः

---

१. A. रसेभ्यः

२. A. This portion is written as a separate sūtra.

अथ द्वितीयः पादः

धान्येभ्यो भवने क्षेत्रे खञ् ॥ ५. २. १ ॥
व्रीहिशालिभ्यां ढक् ॥ ५. २. २ ॥
यवयवकषष्टिकेभ्यो यत् ॥ ५. २. ३ ॥
तिलमाषोमाभङ्गाणुभ्यो वा ॥ ५. २. ४ ॥
अश्वादेकाहगमे खञ् ॥ ५. २. ५ ॥
गोष्ठाद्भूतपूर्वे ॥ ५. २. ६ ॥
सप्तपदात्तेनावाप्यं सख्ये ॥ ५. २. ७ ॥
सर्वचर्मणः कृतः खश्च ॥ ५. २. ८ ॥
यथामुखसंमुखाभ्यां तदृश्यतेऽस्मिन् ॥ ५. २. ९ ॥
सर्वादिपथ्यङ्गकर्मपत्रपात्रं व्याप्नोति ॥ ५. २. १० ॥
आ प्रपदं प्राप्नोति ॥ ५. २. ११ ॥
अनुपदं बद्धा[1] ॥ ५. २. १२ ॥
अयानयं नेयः ॥ ५. २. १३ ॥
सर्वान्नमत्ति ॥ ५. २. १४ ॥
परोवरपरम्परपुत्रपौत्रमनुभवति ॥ ५. २. १५ ॥
अत्यन्तानुकामं गामी ॥ ५. २. १६ ॥
पारावारं[2] व्यस्तविपर्यस्तं च ॥ ५. २. १७ ॥
अनुग्वलम्[3] ॥ ५. २. १८ ॥
अध्वानं यच्च ॥ ५. २. १९ ॥
अभ्यमित्राच्छ च ॥ ५. २. २० ॥
समां समां समायां समायां विजायते पूर्वपदालुग्यलोपौ च[4] ॥ ५. २. २१ ॥

१. A. बद्ध्वा
२. A. वरं
३. A. अनुपलं
४. A. This portion is written as a separate sūtra.

अद्यश्वो भवति च ॥ ५. २. २२ ॥

आगोः कर्मकारिणि ॥ ५. २. २३ ॥

अषडक्षाशितङ्वलङ्कर्मलिम्पुरुषाध्युत्तरपदादिभ्यः ॥ ५. २. २४ ॥

आदिश्यञ्जो वा ॥ ५. २. २५ ॥

तस्य पाकः पीलुकर्कन्धुशमीकरीरकुवलबदराश्वत्थखदिरेभ्यः कुणप् ॥ ५. २. २६ ॥

कर्णाक्षिनखमुखकेशपादगुल्फभ्रूशृङ्गदन्तोष्ठपुष्पेभ्यो मूले जाहच्[1] ॥ ५ २. २७ ॥

पक्षात्तिः ॥ ५. २. २८ ॥

तेन वित्तश्चुञ्चुप्चणपौ ॥ ५. २. २९ ॥

विनञ्भ्यां नानाञौ न सह ॥ ५. २. ३० ॥

[2]वेर्विस्तृते शालच्छङ्कटचौ ॥ ५. २. ३१ ॥

कटच्च ॥ ५. २. ३२ ॥

समः सङ्कीर्णे ॥ ५. २. ३३ ॥

प्रात्प्रकाशे ॥ ५. २. ३४ ॥

उदोऽधिके ॥ ५. २. ३५ ॥

नेः समीपे ॥ ५. २. ३६ ॥

अवात् कुटारच्चावनते ॥ ५. २. ३७ ॥

नासानतौ टीटच्नाटच्भ्रटचः ॥ ५. २. ३८ ॥

तद्वदिति च ॥ ५. २. ३९ ॥

नेर्बिडच्बिरीसचौ नीरन्ध्रे ॥ ५. २. ४० ॥

इनच्पिटच्काश्चिकचिचिकश्चास्य स्थपुटे ॥ ५. २. ४१ ॥

क्लिन्नाल्लुश्चिल्पिलपुचुलश्चास्य चक्षुषी । ५. २. ४२ ॥

पर्वतासन्नारूढभुवोरुपाधिभ्यां त्यकन् ॥ ५. २. ४३ ॥

[3]अलाबूतिलोमाभङ्गाभ्यो रजसि कटच् ॥ ५. २. ४४ ॥

अवेः सङ्घाते ॥ ५. २. ४५ ॥

विस्तारे पटच् ॥ ५. २. ४६ ॥

१. A. चाहच

२. A. This sūtra is written as part of the previous one.

३. A. अलपूति

पशुनामभ्यः स्थाने गोष्ठच् ॥ ५. २. ४७ ॥

द्वित्वे गोयुगच् ॥ ५. २. ४८ ॥

षट्त्वे षड्गवच् ॥ ५. २. ४९ ॥

तिलादिभ्यः स्नेहे तैलच् ॥ ५. २. ५० ॥

इक्षुमूलकादिभ्यः [2]क्षेत्रे शाकटशाकिनौ ॥ ५. २. ५१ ॥

तत्र घटते कर्मणोऽठच् ॥ ५. २. ५२ ॥

तदस्य संजातं तारकपुष्पमञ्जरीमुकुलकुड्मलकुसुमकोरकाङ्कुरहस्तकस्तबक-पल्लवकिसलयेभ्य इतच् ॥ ५. २. ५३ ॥

कण्टकपुलकरोमाञ्चहर्षोत्कर्षगर्वोत्कण्ठाकल्लोलतरङ्गाङ्गारकशृङ्गारान्धकारेभ्यः ॥ ५. २. ५४ ॥

कन्दलशैवलकुवलयकुतूहलकलङ्ककज्जलकर्दमसीमन्ताभ्ररागवेगर्जीषेभ्यः ॥ ५. २. ५५ ॥

क्षुत्तृड्भुक्षापिपासानिद्रातन्द्राज्वरगरव्याधिव्रणसुखदुःखेभ्यः ॥ ५. २. ५६ ॥

मूत्रपुरीषद्रोहदोहशास्त्रपण्डामुकुरमुद्रागंधफलतिलकचन्द्रकादिभ्यश्च ॥ ५. २. ५७ ॥

गर्भादप्राणिनि ॥ ५. २. ५८ ॥

मानान्मात्रट् ॥ ५. २. ५९ ॥

लुक् चास्य वा ॥ ५. २. ६० ॥

न संशये ॥ ५. २. ६१ ॥

ऊर्ध्वे दघ्नट् द्वयसट् च ॥ ५. २. ६२ ॥

हस्तिपुरुषाभ्यामण् च ॥ ५. २. ६३ ॥

द्विगोर्लुक् ॥ ५. २. ६४ ॥

शन्शच्छतिभ्यो डिनिर्वा ॥ ५. २. ६५ ॥

यत्तदेतेभ्यो वतुप् ॥ ५. २. ६६ ॥

किमिदंभ्यां वो घः ॥ ५. २. ६७ ॥

१. A. This word is written as part of the previous sūtra.

२. A. This portion is written as a separate sūtra.

३. A. गन्ध

४. A. This is written as part of the previous sūtra.

वतोः[1] स्वार्थे मात्रट्ट्रयसटौ ॥ ५. २. ६८ ॥

किमः संख्याप्रश्ने डति च ॥ ५. २. ६९ ॥

अंशे संख्यायास्तयप् ॥ ५. २. ७० ॥

द्वित्रिभ्यामयड्वा ॥ ५. २. ७१ ॥

उभान्नित्यम् ॥ ५. २. ७२ ॥

निमाननिमेययोर्मयट् ॥ ५. २. ७३ ॥

तदस्मिन्नधिकं समानजातीयमितिशतिशद्शान्तायाः शतसहस्रे व्यस्तसमस्ते डः ॥ ५. २. ७४ ॥

तस्य पूरणे डट् ॥ ५. २. ७५ ॥

विंशत्यादिभ्यस्तमड्वा ॥ ५. २ ७६ ॥

निर्यं शतादिमासार्धमाससंवत्सरेभ्यः ॥ ५. २. ७७ ॥

षष्ठ्यादेरसंख्यादेः ॥ ५. २. ७८ ॥

नोमट्षट्कतिपयेभ्यस्थट् ॥ ५. २. ७९ ॥

चतुरः यच्छौ च लोपश्चाङ्गे द्वितीयः ॥ ५. २. ८० ॥

श्रेस्तृ च ॥ ५. २. ८१ ॥

बहुपूगगणसंघेभ्यस्तिथट् ॥ ५. २. ८२ ॥

वतोरिथट् ॥ ५. २. ८३ ॥

भागेष्टमादञौ वा ॥ ५. २. ८४ ॥

षष्ठात् ॥ ५. २. ८५ ॥

माने कंश्च ॥ ५. २. ८६ ॥

तेन ग्रन्थं गृह्णातीति पूरणाल्लुक् चास्य वा ॥ ५. २. ८७ ॥

ग्रहणे वा ॥ ५. २. ८८ ॥

एकादाकिनिच्चासहाये ॥ ५. २. ८९ ॥

तत्र कुशल इत्याकर्षात् ॥ ५. २. ९० ॥

त्सरुपिशाचपिचण्डनिचयाश्मशनिशकुनिजपनपट्टादट्टादपादेभ्यः कन् ॥ ५. २. ९१ ॥

पथः पन्थ च ॥ ५. २. ९२ ॥

१. A. वातोः

२. A. This portion is written as a separate sūtra.

३. A adds वा

४. C omits ५. २. ७७ to ५. २. ९४.

धनहिरण्याभ्यां कामे ॥ ५. २. ९३ ॥
खाङ्गेभ्यः सक्ते ॥ ५. २. ९४ ॥
उदराट्टगाद्यूने ॥ ५. २. ९५ ॥
सस्येन परिजातः ॥ ५. २. ९६ ॥
अंशमवश्यं[1] हारी ॥ ५. २. ९७ ॥
तन्त्रादचिरोद्धृते ॥ ५. २. ९८ ॥
ब्राह्मणात्संज्ञायाम्[2] ॥ ५. २. ९९ ॥
उष्णात् ॥ ५. २. १०० ॥
शीताच्च कारिणि ॥ ५. २. १०१ ॥
अधेरारूढे ॥ ५. २. १०२ ॥
अनोः कमितरि ॥ ५. २. १०३ ॥
अभेर्दीर्घश्च वा ॥ ५. २. १०४ ॥
पार्श्वेनान्विच्छति ॥ ५. २. १०५ ॥
अयःशूलदण्डाजिनाभ्यां ठक् ॥ ५. २. १०६ ॥
सोऽस्य ग्रामणीः ॥ ५. २. १०७ ॥
शृङ्खलाद्बन्धनं करभे ॥ ५. २. १०८ ॥
उत्क उन्मनाः ॥ ५. २. १०९ ॥
कालहेतुफलेभ्यो रोगे ॥ ५. २. ११० ॥
प्रायोऽन्नमस्मिन् संज्ञायाम् ॥ ५. २. १११ ॥
कुल्माषादञ् ॥ ५. २. ११२ ॥
वैटकादिनिः[4] ॥ ५. २. ११३ ॥
साक्षाद्द्रष्टरि संज्ञायाम्[5] ॥ ५. २. ११४ ॥
श्राद्धमनेनाद्य भुक्तं ठंश्च ॥ ५. २. ११५ ॥
पूर्वादिनिः ॥ ५. २. ११६ ॥
सपूर्वात्[6] ॥ ५. २. ११७ ॥

१. C omits अवश्यं
२. A. ब्राह्मणमत्स्यात्
३. A. श्रास्य
४. A. चटकादिनिः
५. A. साक्षाद्द्रष्ट्व्या ॥
६. A. सपूर्वगाणिकात् ॥

इष्टपूर्तश्रुतगृहीतोद्गृहीतार्चितपठितानुपठितव्याकुलितनिराकृतोपाकृतोपकृतावधारितावकल्पितावकीर्णेभ्यः ॥ ५. २. ११८ ॥

आयुक्तासेविताम्नातपरिगणितानुगणितगणितनिकथितनिषादितोपसादित-परिगदितपरिकलितपरिरक्षितसंकलितसंरक्षितेभ्यश्च ॥ ५. २. ११९ ॥

अनुपद्यन्वेष्टा ॥ ५. २. १२० ॥

क्षेत्रियच् परक्षेत्रे चिकित्स्यः ॥ ५. २. १२१ ॥

श्रोत्रियंश्छन्दोऽधीते ॥ ५. २. १२२ ॥

इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा ॥ ५. २. १२३ ॥

तदस्यास्त्यस्मिन्निति मतुप् ॥ ५. २. १२४ ॥

रसरूपवर्णगन्धस्पर्शशब्दस्नेहेभ्यो गुणेभ्यः ॥ ५. २. १२५ ॥

तद्विशेषेभ्यो लुक् ॥ ५. २. १२६ ॥

प्राण्यङ्गादातो लज्वा ॥ ५. २. १२७ ॥

जटाघटाभ्यां क्षेपे ॥ ५. २. १२८ ॥

क्षुद्रजन्तूपतापेभ्यश्च ॥ ५. २. १२९ ॥

सिध्मगडुमणिकर्णपर्णपांसुमांसनाभिपशुप्रज्ञासक्थिहनूदकबीजस्नेहेभ्यः ॥ ५. २. १३० ॥

शीतश्यामकृष्णपिङ्गपेशपक्ष्मपृथुमृदुमञ्जुपत्रपुष्कनिष्पावचटुकपिकण्डूभ्यः ॥ ५. २. १३१ ॥

पार्ष्णिधमन्योर्दीर्घश्च ॥ ५. २. १३२ ॥

वातदन्तबलगललाटानामूर्ध्वं ॥ ५. २. १३३ ॥

वत्सासंभ्यां स्निग्धबलिनोः ॥ ५. २. १३४ ॥

फेनार्तं ॥ ५. २. १३५ ॥

१. C. पूर्व.
२. A. गुणित
३. A. संकथित
४. A. क्षात्रिय-
५. A omits इन्द्रसृष्टं
६. A. युक्
७. A. This sūtra is read along with the previous.
८. A. This portion is written as a separate sūtra.
९. A. चः
१०. A. This sūtra is read along with the previous.

पिच्छोरःपूर्णोदकधुवकाधूवकाप्रज्ञाभ्यश्चेलच् ॥ ५. २. १३६ ॥

जटाघटाकालाभ्यः क्षेपे ॥ ५. २. १३७ ॥

तुन्दोदरपिच्चण्डकलापङ्ककाकयवव्रीहिग्रहगुहाभ्यः ॥ ५. २. १३८ ॥

स्वाङ्गेभ्यो वृद्धौ ॥ ५. २. १३९ ॥

लोमरोमपलुबभ्रुकुरुहरिकपिकर्णेभ्यः शः ॥ ५. २. १४० ॥

पामवामहेमशामश्लेष्मोष्मदद्रुकृमिवलिभ्यो नः ॥ ५. २. १४१ ॥

शाकीपलालीकद्रूणां ह्रस्वश्च ॥ ५. २. १४२ ॥

विष्वचोऽकृतसन्धेरुत्तरपदलोपश्च ॥ ५. २. १४३ ॥

अङ्गात् कल्याणे ॥ ५. २. १४४ ॥

लक्ष्म्या अच् ॥ ५. २. १४५ ॥

प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः ॥ ५. २. १४६ ॥

तपःसहस्राभ्यामण् ॥ ५. २. १४७ ॥

ज्योत्स्नातमिस्राकुण्डलकुतुपविसर्पविषादिकाभ्यः ॥ ५. २. १४८ ॥

सिकताशर्कराभ्याम् ॥ ५. २. १४९ ॥

देशे लुबिलचौ च ॥ ५. २. १५० ॥

दन्तादुन्नतादुरच् ॥ ५. २. १५१ ॥

उषसुषिमुष्कमधुबन्धुनखमुखपांसुपाण्डुभ्यो रः ॥ ५. २. १५२ ॥

खनगसिन्धुकुञ्जेभ्यः संज्ञायाम् ॥ ५. २. १५३ ॥

कच्छ्वा ह्रस्वश्च ॥ ५. २. १५४ ॥

द्युद्रुभ्यां मः ॥ ५. २. १५५ ॥

केशमणिहिरण्यराजीकुमारेष्टकाबिम्बेभ्यो वः ॥ ५. २. १५६ ॥

अर्णसो लोपश्च ॥ ५. २. १५७ ॥

गाण्ड्यजगाभ्यां संज्ञायाम् ॥ ५. २. १५८ ॥

मेधारथाभ्यामिरः ॥ ५. २. १५९ ॥

१. A. प्रज्ञापिण्डेभ्यः

२. A. This is read along with the previous sūtra.

३. A. This is read along with the previous sūtra.

४. A. रोमलोमबभ्रुभुक्कुरुहरि-

५. A. परिसर्प-

६. A. उन्नत उरच्

७. A. बिम्बादिभ्यो

काण्डाण्डाभ्यामीरच् ॥ ५. २. १६० ॥
कृष्यासुतिरजःपरिषद्भ्रातृपुत्रोत्सङ्गेभ्यो वलच् ॥ ५. २. १६१ ॥
दन्तशिखाभ्यां संज्ञायाम् ॥ ५. २. १६२ ॥
ज्योत्स्नातमिस्रोर्जस्विन्नूर्जस्वलमलीमसाः ॥ ५. २. १६३ ॥
नौसभाकुमारिकाकरणयवखदाभ्यष्ठन् ॥ ५. २. १६४ ॥
व्रीहिशालिशीर्षमायाभ्य इनिश्च ॥ ५. २. १६५ ॥
अतः ॥ ५. २. १६६ ॥
धनादुत्तमर्णे ॥ ५. २. १६७ ॥
न द्रव्यादिभ्यः ॥ ५. २. १६८ ॥
कुन्द्रयश्चाकार्यगृहदात्रपोत्रभोगतरविजयसंयमादिभ्यः ॥ ५. २. १६९ ॥
जातेरतण्डुलादेः ॥ ५. २. १७० ॥
लेजादिविषये चाबीजपर्णेपिण्डतुन्दोदरादिभ्यः ॥ ५. २. २७१ ॥
एकाचः ॥ ५. २. १७२ ॥
सप्तम्याम् ॥ ५. २. १७३ ॥
एकगोपूर्वादनेकद्रव्यात् ठञ् ॥ ५. २. १७४ ॥
निष्कादेः शतसहस्रात् ॥ ५. २. १७५ ॥
नवयज्ञादिभ्यः ॥ ५. २. १७६ ॥
पूर्णमासोऽण् ॥ ५. २. १७७ ॥
द्वन्द्वोपतापगर्ह्यात् प्राणिस्थादस्वाङ्गादिनिः ॥ ५. २. १७८ ॥
वातातिसारपिशाचानां कुक् च ॥ ५. २. १७९ ॥
वयसि पूरणात् ॥ ५. २. १८० ॥
सुखदुःखतृप्रकृच्छ्रश्रकक्षकृपणसोढप्रतीपप्रणयद्वलौलीकेभ्यः ॥ ५. २. १८१ ॥
मालायाः क्षेपे ॥ ५. २. १८२ ॥
बलात् बाह्वरुपूर्वात् ॥ ५. २. १८३ ॥
सर्वादेर्धनबीजकेशात् ॥ ५. २. १८४ ॥

१. A. This and the next sūtra are written together.
२. A. कुन्द्रयश्च is written as a separate sūtra.
३. A. खज्ञादि.
४. A. म्याम् and the next sūtra is written along with this.
५. A. This portion is written as a separate sūtra.
६. A. हलातुकेभ्य:

अर्थाद्याच्ञायाम् ॥ ५. २. १८५ ॥

तदन्ताच्च ॥ ५. २. १८६ ॥

धर्मशीलवर्णान्तात् ॥ ५. २. १८७ ॥

हस्तकरदन्तेभ्यो जातौ ॥ ५. २. १८८ ॥

वर्णात् ब्रह्मचारिणि ॥ ५. २. १८९ ॥

पुष्करपद्मोत्पलतमालकुमुदकैरवनलिनहिरण्यकर्दमकरीषशिरीषकपित्थतटतर-
ङ्गकल्लोलशालूकेभ्यो देशे ॥ ५. २. १९० ॥

कमलसरोरुहसरोजाम्भोजराजीवारविन्दपङ्कजाब्जपुटकनालीकमृणालबिसता-
मरसयवासमन्मान्तेभ्यो नाम्नि ॥ ५. २ १९१ ॥

शिखाशाखाकेकामालामेखलाबलाकापताकाष्टकाचूडाबडवाघृणावीणाजराग-
दासंज्ञासूनामनीषादंष्ट्राभ्यो वा ॥ ५ २. १९२ ॥

बलकुलोत्साहोदासायासायामप्रयामव्यायामोपयामारोहावरोहपरिणाहेभ्यः ॥
५. २. १९३ ॥

उद्यमस्तबकालपलनिचुलमुकुलमानव्रतकर्मचर्मवर्मधर्मधन्वभ्यश्च ॥ ५. २. १९४ ॥

रूपादाहतप्रशंसयोर्यप् ॥ ५. २. १९५ ॥

हिमादिभ्यः ॥ ५. २. १९६ ॥

अस्मायामेधास्रजो विनिः ॥ ५. २. १९७ ॥

आमयात् दीर्घश्च ॥ ५. २. १९८ ॥

वृन्दादारकन् ॥ ५. २. १९९ ॥

शृङ्गात् ॥ ५. २. २०० ॥

फलबर्हमलाद्यैनच् ॥ ५. २. २०१ ॥

पर्वमरुद्भ्यां तप् ॥ ५. २. २०२ ॥

स्वामिन्नीशे ॥ ५. २. २०३ ॥

गोमिन् पूज्ये ॥ ५. २. २०४ ॥

वाचो ग्मिनिः ॥ ५ २. २०५ ॥

आलजाटचौ कुत्सायाम् ॥ ५. २. २०६ ॥

अर्शसुरश्च तुरतुन्दपलिताभ्रजटाघटाम्ललवणादिभ्योऽच् ॥ ५. २. २०७ ॥

स्वाङ्गात् हीनात् ॥ ५. २. २०८ ॥

१. A. बहु.
२. A. रुदानत.
३. A. एवमादिभ्यः
४. A. अशस्तुरश्च

वर्णात् ॥ ५. २. २०९ ॥

तुन्दिवलिवटेर्भः ॥ ५. २. २१० ॥

कंशंभ्याम् ॥ ५. २. २११ ॥

तितुवयस्तायुः ॥ ५. २. २१२ ॥

युस् ॥ ५. २. २१३ ॥

ऊर्णाहंशुभंभ्यः ॥ ५. २. २१४ ॥

सूकसाम्नोश्छः ॥ ५. २. २१५ ॥

अध्यायानुवाकयोर्लुग्वा ॥ ५. २. २१६ ॥

विमुक्तदेवासुररक्षोऽसुरास्यहत्यपरिसारकोपसत्सत्वदिडोर्वशीदशार्णदशार्हे - भ्योऽण् ॥ ५. २. २१७ ॥

वसुमन्तुपर्त्वायेन्तुबर्हवन्तुवृत्रहन्तृवयःपतत्रिसुपर्णसोमापूषन्हविर्धानाम्ना - विष्णुभ्यश्च ॥ ५. २. २१८ ॥

गोषदिषेत्वाकृष्णोऽस्यादेवीरापदेवस्यत्वादेवीर्धियेतदेवेभ्यो वुन् ॥ ५. १. २१९ ॥

प्रतूर्तमातरिश्वन्सहस्रशीर्षाचास्पतकृशानुरक्षोहणस्वाहाप्राणेभ्यश्च ॥ ५. २. २२० ॥

निद्रातन्द्राश्रद्धादयाहृदयेभ्यो वालुचूँ ॥ ५. २. २२१ ॥

शीतोष्णतृप्रेभ्यस्तन्न सहते ॥ ५. २. २२२ ॥

हिमात् सहते चेलुः ॥ ५. २. २२३ ॥

बलवाताभ्यां चूलः ॥ ५. २. २२४ ॥

इति श्रीसरस्वतीकण्ठाभरणनाम्नि व्याकरणे
पञ्चमस्याध्यायस्य द्वितीयः पादः
समाप्तः

---

१. A omits this sūtra.

२. A. कंसाभ्या भः

३. A. वितुवयस्तायुस् and omits the next sūtra.

४. A. भवन्तु

५. A. दैवीं धियं मोततदे-

६. A. This portion is written as a separate sūtra.

७. A. वालुकृ च

८. A. शीतोष्णतृप्रेभूमनिन्दाप्रशंसानित्य - योगेभ्यस्तन्न सहते ॥
भूमनिन्दाप्रशंसानित्ययोगादित्या - शयः ॥
संश्लेषतो बहुलनोर्थैक्ये द्विः ॥
नार्थे शौक्षिकं चस्तन्न सहते ॥

अथ तृतीयः पादः

—:o:—

षष्ठ्या व्याश्रये तस् ॥ ५. ३. १ ॥

रोगात्प्रतीकारे ॥ ५. ३. २ ॥

अतिग्रहाव्यथनक्षेपेष्वकर्तरि तृतीयायाः ॥ ५. ३. ३ ॥

हीयमानपापयुक्तात् ॥ ५. ३. ४ ॥

प्रतिना पञ्चम्याः ॥ ५. ३. ५ ॥

अपादाने चाहीयरुहोः ॥ ५. ३. ६ ॥

सर्वोभयार्थे पर्यभिभ्याम् ॥ ५. ३. ७ ॥

तृतीयासप्तमीभ्यां चादिमध्यान्ताग्रपक्षपार्श्वपृष्ठमुखसर्वविश्वोभयान्यपूर्वयत्तदे-
केदंप्रमाणादिभ्यः ॥ ५. ३. ८ ॥

अद्यादिसर्वनामकिंभ्यः पञ्चम्याः ॥ ५. ३. ९ ॥

बहोश्च संख्यायाः ॥ ५. ३. १० ॥

सप्तम्यास्त्रल् ॥ ५. ३. ११ ॥

इदमो हः ॥ ५. ३. १२ ॥

किमोऽत् ॥ ५. ३. १३ ॥

भवदीर्घायुरायुष्मद्देवानांप्रियैस्तेऽन्याभ्यश्च ॥ ५. ३. १४ ॥

तेष्विदम इश् ॥ ५. ३. १५ ॥

एतदोऽश् ॥ ५. ३. १६ ॥

किमः कुः ॥ ५. ३. १७ ॥

काति ॥ ५. ३. १८ ॥

एकान्यकियत्तभ्यः सप्तम्याः काले दा ॥ ५. ३. १९ ॥

सर्वात्स चास्य वा ॥ ५. ३. २० ॥

तदो दानीम् ॥ ५. ३. २१ ॥

इदम इश् च ॥ ५. ३. २२ ॥

१. A. पृथु

२. A omits this sūtra.

३. A. This portion is written as part of the next sūtra.

अधुना च ॥ ५. ३. २३ ॥
किंयत्तदेतदन्येभ्योऽनद्यतनेर्हिल्वा ॥ ५. ३. २४ ॥
एतश्चेदमः ॥ ५. ३. २५ ॥
द्यैश्चाह्न्यश्च ॥ ५. ३. २६ ॥
समानस्य द्यः सश्च ॥ ५. ३. २७ ॥
पूर्वान्यान्यतरेतरापराधरोत्तरेभ्य एद्युस् ॥ ५. ३. २८ ॥
उभयाद्युश्च ॥ ५. ३. २९ ॥
पूर्वतरपरतराभ्यां एद्यविः परश्च ॥ ५. ३. ३० ॥
आरिः संवत्सरे ॥ ५. ३. ३१ ॥
पूर्वादुच्च ॥ ५. ३. ३२ ॥
परात् ॥ ५. ३. ३३ ॥
इदमः समसिसँणिश्च ॥ ५. ३. ३४ ॥
तृतीयायाः प्रकारे थमिच्च ॥ ५. ३. ३५ ॥
किमः ॥ ५. ३. ३६ ॥
सर्वोभयान्येतरापरयत्तदादिभ्यस्थाल् ॥ ५. ३. ३७ ॥
क्रियाप्रकारे धा संख्यायाः ॥ ५. ३. ३८ ॥
अधिकरणविचाले च ॥ ५. ३ ३९ ॥
षोढा वा ॥ ५. ३. ४० ॥
एकाद्धयमुञ् ॥ ५. ३. ४१ ॥
एधाच्च ॥ ५. ३. ४२ ॥
तद्वति धँण् ५. ३. ४३ ॥
प्रकारवति जातीयः ॥ ५. ३. ४४ ॥
स्थूलेषुमणिमधुधान्यतिलकालपुण्ड्रैरण्डचण्डचञ्चद्बृहन्महद्भ्यः कन् ॥ ५.३.४५ ॥

१. A. हील्वा. This is written as a separate sūtra.
२. A. This is read along with the previous sūtra.
३. A. स्सद्यः
४. A. मिणश्च
५. A. This is read along with the previous sūtra.
६. A adds as a separate sūtra द्वित्रिभ्यां धमुच्
७. A. धम्.

कुमार्याः पुत्रश्वशुराभ्याम् ॥ ५. ३. ४६ ॥

पत्रमूलाद्यस्ताच्च ॥ ५. ३. ४७ ॥

अवदातात् सुरायाम् ॥ ५. ३. ४८ ॥

सुरायाः[1] अहौ ॥ ५. ३. ४९ ॥

गोमूत्रादाच्छादने ॥ ५. ३. ५० ॥

जीर्णाच्छालिषु ॥ ५. ३. ५०. ३. ५१ ॥

यवाद्ब्रीहिषु ॥ ५. ३. ५२ ॥

कृष्णात्तिलेषु ॥ ५. ३. ५३ ॥

अणोर्माषेषु ॥ ५. ३. ५४ ॥

माषात्परिमाणे ॥ ५. ३. ५५ ॥

दिक्कृच्छब्दाददिग्देशकालार्थात् सप्तमीपञ्चमीप्रथमाभ्योऽस्तातिः ॥ ५. ३. ५६ ॥

अञ्चो लुक् ॥ ५. ३. ५७ ॥

पूर्वाधरयोः[3] पुरधौ च ॥ ५. ३. ५८ ॥

आभ्यामसिश्च ॥ ५. ३. ५९ ॥

अवरस्याव च ॥ ५. ३. ६० ॥

वास्तातिं ॥ ५. ६. ६१ ॥

अपरस्यातिः पञ्चा च ॥ ५. ३. ६२ ॥

दिक्पूर्वपदस्य च ॥ ५. ३. ६३ ॥

अर्धे लुक् ॥ ५. ३. ६४ ॥

ऊर्ध्वस्य रिलिरिष्टातिलावुपश्च ॥ ५. ३. ६५ ॥

परावराभ्यामतसुज्वा ॥ ५. ३. ६६ ॥

अधरादातिः ॥ ५. ३. ६७ ॥

दक्षिणोत्ताराभ्याम् ॥ ५. ३. ६८ ॥

तसिश्च ॥ ५. ३. ६९ ॥

आञ्चापञ्चम्याः ॥ ५. ३. ७० ॥

१. A. दाताः सुराः
२. A. सुरा अहौ
३. A. पूर्वापरयोः
४. A. This is read along with the previous sūtra.
५. A. रिरिष्टातिलाल्लुपश्च
६. A. आच्चा.

आहि च दूरे ॥ ५. ३. ७१ ॥

एनबदूरे वा ॥ ५. ३. ७२ ॥

याप्ये पाशप् ॥ ५. ३. ७३ ॥

भूतपूर्वे चरट् ॥ ५. ३. ७४ ॥

षष्ठ्या रूप्य च ॥ ५. ३. ७५ ॥

द्विबहुसजातीयाविदूरप्रकर्षे गुणक्रियावचनेभ्यः तरप्तमपौ ॥ ५. ३. ७६ ॥

ईयसुन्निष्ठाभ्याम् ॥ ५. ३. ७७ ॥

किमेत्तिङव्ययेभ्यः आभ्यामामद्रव्ये ॥ ५. ३. ७८ ॥

विभज्योपपदे तरप् ॥ ५. ३. ७९ ॥

अभिन्नस्यापि भेदे ॥ ५. ३. ८० ॥

स्वार्थे चाभिन्नोपपन्नादिभ्यः ॥ ५. ३. ८१ ॥

तत्स्थगुणवचनेभ्यस्तरबर्थ ईयसुन्वा ॥ ५. ३. ८२ ॥

तमबर्थ इष्ठन् ॥ ५. ३. ८३ ॥

तयेर्विन्मतोर्लुक् ॥ ५. ३. ८४ ॥

प्रशस्यस्य श्रः ॥ ५. ३. ८५ ॥

वृद्धस्य च ज्यः ॥ ५. ३. ८६ ॥

अन्तिकबाढयोर्नेदसाधौ ॥ ५. ३. ८७ ॥

युवाल्पयोः कन्वा ॥ ५. ३. ८८ ॥

प्रशंसायां रूपप् ॥ ५. ३. ८९ ॥

तिङश्च ॥ ५. ३. ९० ॥

ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ॥ ५. ३. ९१ ॥

वा सुपो बहुच् पुरस्तात् ॥ ५. ३. ९२ ॥

प्राग्दक्षः कः ॥ ५. ३. ९३ ॥

तिङश्चामकच् प्राक् टेः ॥ ५. ३. ९४ ॥

१. A. This portion is written as a separate sūtra.

२. C omits this sūtra.

३. A. This portion is written as a separate sūtra.

४. A omits भेदे

५. A omits this and the following three sūtras.

सर्वनाम्नामसौभादिसुपां च ॥ ५. ३. ९५ ॥

अव्ययानां कश्च दः ॥ ५. ३. ९६ ॥

तूष्णीमः कां[1] ॥ ५. ३. ९७ ॥

शीले को मलोपश्च ॥ ५. ३. ९८ ॥

अज्ञाते ॥ ५. ३. ९९ ॥

कुत्सिते[2] ॥ ५. ३. १०० ॥

संज्ञायां कन् ॥ ५. ३. १०१ ॥

अवक्षेपणे च ॥ ५. ३ १०२ ॥

अनुकम्पायाम् ॥ ५. ३. १०३ ॥

नीतौ च तद्युक्तायाम् ॥ ५. ३. १०४ ॥

वह्वचो मनुष्यनाम्नष्ठज् घनिलचौ वा ॥ ५. ३. १०५ ॥

उपादेरडज्वुचौ च ॥ ५. ३. १०६ ॥

जातिनाम्नः कन् ॥ ५. ३. १०७ ॥

अजिनान्तादुत्तरपदस्य चाकृतसन्धेर्लोपः ॥ ५. ३. १०८ ॥

ठाजादावेकाच्पूर्वपदानाम् ॥ ५. ३. १०९ ॥

षडङ्गुलिदत्तदेवदत्तादीनामूर्ध्वं द्वितीयादचः ॥ ५. ३. ११० ॥

एज्द्वितीयत्वे तदादेः ॥ ५. ३. १११ ॥

शेवँलसुपरिविशालवरुणार्यमादीनां तृतीयात् ॥ ५. ३. ११२ ॥

प्रजापतिदत्तादीनां चतुर्थात् ॥ ५. ३. ११३ ॥

पूर्वपदस्य च ॥ ५. ३. ११४ ॥

हलादावुत्तरपदस्य च वा ॥ ५. ३. ११५ ॥

अप्रत्यये च ॥ ५. ३. ११६ ॥

उगन्तादुत्तरपदलोपे घनिलचोरादिलोपः ॥ ५. ३. ११७ ॥

१. A. कां is written as part of the next sūtra.

२. A. This is written as a part of the previous sūtra.

३. A. This portion is written as a separate sūtra.

४. A. This is written as part of the previous sūtra.

५. A. लोपश्चन्नि

अल्पे ॥ ५. ३. ११८ ॥

ह्रस्वे ॥ ५. ३. ११९ ॥

संज्ञायां कन् ॥ ५. ३. १२० ॥

कुटीशमीशुण्डाभ्यो रः ॥ ५. ३. १२१ ॥

कृत्वा डुपच् ॥ ५. ३. १२२ ॥

कासूगोणीभ्यां ष्टरच् ॥ ५. ३. १२३ ॥

वत्सोक्षर्षभाश्वेभ्यः स्वार्थतनुत्वे ॥ ५. ३. १२४ ॥

किंयत्तदेकान्येभ्यो द्वयोरेकस्य निर्धारणे डतरच् ॥ ५. ३. १२५ ॥

बा बहूनां जातौ डतमच् ॥ ५. ३. १२६ ॥

किमो डतरच् ॥ ५. ३. १२७ ॥

इवे संज्ञायाम् ॥ ५ ३. १२८ ॥

प्रतिकृतौ च ॥ ५. ३. १२९ ॥

लुम्मनुष्ये ॥ ५. ३. १३० ॥

जीविकार्थे चापण्येऽर्चाचित्रध्वजेषु ॥ ५. ३. १३१ ॥

देवहंसवारिजलाजराजशतशङ्कुभ्यः पथात् ॥ ५. ३. १३२ ॥

सिद्धगत्युष्ट्रग्रीवावामरज्जुमत्स्येन्द्रादिभ्यश्च ॥ ५. ३. १३३ ॥

न हस्तदण्डपुष्पादिभ्यः ॥ ५. ३. १३४ ॥

वैस्लेर्ढञ् ॥ ५. ३. १३५ ॥

शिलाया ढश्च ॥ ५. ३. १३६ ॥

शाखामुखमेघजघनचरणस्कन्धोरःशिरशृङ्गाग्रशरणेभ्यो यः ॥ ५. ३. १३७ ॥

द्रोर्भव्ये ॥ ५. ३. १३८ ॥

कुशाग्रार्धजरतिघुणाक्षरादिभ्यश्छः ॥ ५. ३. १३९ ॥

समासाच्च तद्विषयादाकस्मिके ॥ ५. ३. १४० ॥

शर्कराकपालिकाकपाँटिकासिकतानकुलनाराचशतपत्रपुण्डरीकेभ्येऽण् ॥ ५. ३. १४१ ॥

१. A. This is read along with the previous sūtra.
२. A omits this sūtra.
३. A. पण्ये चित्र
४. A omits राज
५. A. रजू
६. C omits this sūtra.
७. A. पालिकाकपारिका

गोर्लोमपुच्छाभ्याम् ॥ ५. ३. १४२ ॥

अस्सपत्न्याः ५. ३. १४३ ॥

अङ्गुलिभरुजाबभ्रुवल्गुमण्डरमण्डलमुनिहरिकपिखलोदश्विद्रुरुतरक्षशष्कुलीकु - लिशगोणीभ्यष्ठक् ॥ ५. ३ १४४ ॥

एकशालायां ष्ठञ्च ॥ ५. ३. १४५ ॥

कर्कलोहिताभ्यामीकक्[1] ॥ ५. ३. १४६ ॥

पूगाद्ग्रामणीपूर्वाञ्ञ्यः ॥ ५. ३. १४७ ॥

व्रातादस्त्रियाम् ॥ ५. ३. १४८ ॥

बाह्वीकेष्वब्राह्मणराज्न्यादायुधजीविसंघाञ्ञ्यट् ॥ ५. ३. १४९ ॥

वृकाट्टेण्यण् ॥ ५. ३. १५० ॥

दामन्यौलपिबैजवाप्यौदङ्कयौडविकाकन्दक्यावित्तिशाकुन्तकिसार्वसेनिबैन्द - विमौञ्जायनिसावित्रीपुत्रेभ्यश्छः ॥ ५. ३. १५१ ॥

कौण्डोपरथदाण्डकिकौष्टुकिजालमानिब्राह्मगुप्तजानकिभ्यस्त्रिगर्तेषु ॥ ५.३.१५२॥

पर्शुरक्षोऽसुरपिशाचबाह्वीकवयोवसुमरुत्सत्वदशार्हाशनिकार्षापणत्रिगर्तभर्तो - शीनरेभ्योऽस्त्रियामण् ॥ ५. ३. १५३ ॥

यौधेयशौक्रेयशौभ्रेयज्यावनेयधार्तेयघार्तेयेभ्योऽञ् ॥ ५. ३. ६५४ ॥

ञ्यादीनां बहुषु लुक् ॥ ५. ३. १५५ ॥

अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्चक्रमद्भ्योऽपत्याणो यञ् ॥ ५. ३. १५६ ॥

इति श्रीसरस्वतीकण्ठाभरणनाम्नि व्याकरणे
पञ्चमाध्यायस्य तृतीयः पादः
समाप्तः

---

१. A. ष्ठन्
२. A. कन्
३. A. लविबीज
४. A. कुवयोवस
५. A. भक्तो
६. A. वार्तेय

अथ चतुर्थः पादः

बह्वल्पार्थात् कारकान्मङ्गले शस् वा ॥ ५. ४. १ ॥
संख्यैकार्थाद्वीप्सायाम् ॥ ५. ४. २ ॥
संख्यापूर्वेभ्यः पादशतमोदकादिभ्यो वुन् ॥ ५. ४. ३ ॥
दण्डदानयोः ॥ ५. ४. ४ ॥
वारसंख्यायाः कृत्वसुच् ॥ ५. ४. ५ ॥
बहोर्वाराविप्रकर्षे धा च ॥ ५. ४. ६ ॥
द्वित्रिचतुर्भ्यः सुच् ॥ ५. ४. ७ ॥
एकस्य सकृच्च ॥ ५. ४. ८. ॥
तत्प्रकृतमिति मयट् ॥ ५. ४. ९ ॥
अस्मिन्निति च ॥ ५. ४. १० ॥
समूहवच्च बहुषु ॥ ५. ४. ११ ॥
अनन्तावसथेतिहभेषजाञ्ञ्यः ॥ ५. ४. १२ ॥
तीयादविद्यायामीकक् ॥ ५. ४. १३ ॥
यावमण्यर्विपीडितास्थिचन्द्रतध्वजाताजातजान्वादिभ्यः कन् ॥ ५. ४. १४ ॥
ऋतावुष्णशीताभ्याम् ॥ ५. ४. १५ ॥
पशौ लूनवियाताभ्याम् ॥ ५. ४. १६ ॥
जातौ प्रियचित्रगुह्यगोलकुब्जादिभ्यः ॥ ५. ४. १७ ॥
अणोर्निपुणे ॥ ५. ४. १८ ॥
पुत्रात्कृत्रिमे ॥ ५. ४. १९ ॥
स्नाताद्वेदसमाप्तौ ॥ ५. ४. २० ॥
शून्याद्रिक्ते ॥ ५. ४. २१ ॥
दानात्कुत्सिते ॥ ५. ४. २२ ॥

१. A. This is written as part of the previous sūtra.
२. A. द्वित्रिभ्यः
३. A. पिपीतास्थिचन्द्रस्तत्ध्वजाजात.
४. A. गुज्ञादिभ्यः

तनोः सूत्रे ॥ ५. ४. २३ ॥

बृहत्या आच्छादने ॥ ५. ४. २४ ॥

कुमारक्रीडनकेभ्यः ॥ ५. ४. २५ ॥

बह्वभिन्नोपपन्नसुकरादेस्तरपः ॥ ५. ४. २६ ॥

ईयसश्च ॥ ५. ४. २७ ॥

लोहितान्मणौ ॥ ५. ४. २८ ॥

रक्ते ॥ ५. ४. २९ ॥

अनित्यवर्णे च ॥ ५. ४. ३० ॥

कालात् ॥ ५. ४. ३१ ॥

क्तादनात्यन्तिके ॥ ५. ४. ३२ ॥

न सामिनेमार्धयोगे ॥ ५. ४. ३३ ॥

जात्यन्ताच्छः बन्धुनि ॥ ५. ४. ३४ ॥

स्थानान्तात् पूर्वपदार्थतुल्ये ॥ ५. ४. ३५ ॥

विनयसमयाकस्मात्कथंचिदत्ययविशेषव्यवहारोपचारानुगादिभ्यष्ठक् ॥
५. ४. ३६ ॥

समो गत्यूहाचारोत्कर्षप्रदानेभ्यः ॥ ५. ४. ३७ ॥

उपायाद्ध्वश्च ॥ ५. ४. ३८ ॥

वाचः सन्देशे ॥ ५. ४. ३९ ॥

तद्युक्तात् कर्मणोऽण् ॥ ५. ४. ४० ॥

ओषधेराजतौ ॥ ५. ४. ४१ ॥

णॅजिनुण्भ्यां नित्यम् ॥ ५. ४. ४२ ॥

प्रज्ञवणिगुशिकूप्रत्यक्षदेवताविद्यामनश्चक्षुःश्रोत्रशत्रुयोधचोरेभ्यो वा ॥
५. ४. ४३ ॥

षोडद्विदज्जुह्वश्चिकीर्षद्वसुमरुत्सत्त्वद्दर्शार्हाशनिबन्धुवयःकुइभ्यः ॥ ५. ४. ४४ ॥

रक्षःपिशाचासुराग्रहायणाग्रयणसाधारणविकृतव्याकृतसन्तपनाद्विताग्निच्छन्दोनामादिभ्यः ॥ ५. ४. ४५ ॥

१. A. This portion is written as a separate sūtra.

२. A. This and the following three sūtras are omitted.

३. A. निषेधे

४. A. ऋजि

५. A omits शत्रु

६. A. षोपन्विदज्जु

कृष्णान्मृगे ॥ ५. ४. ४६ ॥

विसारिणो मत्स्ये ॥ ५. ४. ४७ ॥

मृदस्तिकन् ॥ ५. ४. ४८ ॥

सक्थौ प्रशंसायाम् ॥ ५. ४. ४९ ॥

मनोऽहंभ्यां कारः ५ ४. ५० ॥

वर्गाव्ययेभ्यः स्वरूपे ॥ ५. ४. ५१ ॥

रैरादिफः ॥ ५. ४. ५२ ॥

नामरूपाभ्यां धेयः ॥ ५. ४. ५३ ॥

भागाद्यच्च ॥ ५. ४. ५४ ॥

सूरमर्तक्षेमयविष्ठेभ्यः ॥ ५. ४. ५५ ॥

नेवात् ॥ ५. ४. ५६ ॥

त्नसनपूखानू च ॥ ५. ४. ५७ ॥

प्रात्पुराणे नश्च ॥ ५. ४. ५८ ॥

देवात् तल् ॥ ५. ४. ५९ ॥

देवतान्तात्तदर्थे यत् ॥ ५. ४. ६० ॥

पादार्घाभ्यां च ॥ ५. ४. ६१ ॥

अतिथेर्ञ्यः ॥ ५. ४. ६२ ॥

विशो जातौ ॥ ५. ४. ६३ ॥

अभूततद्भावे कृभ्वस्तियोगे विकारात् च्विः ॥ ५. ४. ६४ ॥

अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च ॥ ५. ४. ६५ ॥

अभिविधौ संपदा च सातिर्वा ॥ ५. ४. ६६ ॥

तदधीने ॥ ५. ४. ६७ ॥

देये त्रा च ॥ ५. ४. ६८ ॥

१. A. कृष्णमृगे. This sūtra is read as part of the previous one.

२. A. This sūtra is read as part of the previous one.

३. A. आर-

४. A omits this sūtra.

५. A omits नश्च

६. A omits तल्

७. A. This portion is written as a separate sūtra.

८. A. This sūtra is read as part of the previous one.

देवमनुष्यमर्त्यपुरुषपुरुबहुभ्यो द्वितीयासप्तम्यन्तेभ्यो बहुलम् ॥ ५. ४. ६९ ॥
अव्यक्तानुकरणादनेकाचोऽनितौ डाच् ॥ ५. ४. ७० ॥
कृञो द्वितीयतृतीयशम्बबीजात्कृषौ ॥ ५. ४. ७१ ॥
संख्यादेर्गुणात् ॥ ५. ४. ७२ ॥
समयाद्यापनायाम् ॥ ५. ४. ७३ ॥
सपत्रनिष्पत्राभ्यामतिव्यथने ॥ ५. ४. ७४ ॥
निष्कुलान्निष्कोषणे ॥ ५. ४. ७५ ॥
प्रियसुखाभ्यामानुकूल्ये ॥ ५. ४. ७६ ॥
दुःखात्प्रातिकूल्ये ॥ ५. ४. ७७ ॥
शूलात्पाके ॥ ५ ४. ७८ ॥
सत्यादशपथे ॥ ५ ४. ७९ ॥
मद्रभद्राभ्यां वपने ॥ ५. ४. ८० ॥
समासान्तः ॥ ५. ४. ८१ ॥
न किमः क्षेपे ॥ ५. ४. ८२ ॥
पूजास्वतिभ्यां प्राग्बहुव्रीहेः ॥ ५. ४. ८३ ॥
नञस्तत्पुरुषे ॥ ५ ४. ८४ ॥
पथो वा ॥ ५ ४. ८५ ॥
पुरप्पथिभ्योऽच् ॥ ५. ४. ८६ ॥
धुरोऽनक्षस्य ॥ ५. ४. ८७ ॥
ऋँचः ॥ ५. ४ ८८ ॥
नञ्बहुभ्यां माणवचरणयोः ॥ ५. ४. ८९ ॥
प्रत्यन्ववेभ्यः सामलोमभ्याम् ॥ ५. ४. ९० ॥
अक्ष्णोऽचक्षुषः ॥ ५. ४. ९१ ॥
स्त्रीपुंसधेन्वनड्वहर्ऋग्यजुषर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवाहोरात्र-रात्रिन्दिवनक्तंदिवाहर्दिवसरजसपुरुषायुषद्व्यायुषड्यायुषजातोक्षमहोक्ष-वृद्धोक्षोपशुनगोष्ठश्वाः ॥ ५. ४. ९२ ॥

१. A omits पुरु
२. A. This sūtra is read along with the previous one.
३. A omits ऋग्यजुष
४. A omits व्यायुष

ब्रह्महस्तिराजपल्वलेभ्यो वर्चसः ॥ ५. ४. ९३ ॥
अवसमन्तेभ्यः तमसः ॥ ५. ४. ९४ ॥
श्वसो वसीयसः ॥ ५. ४. ९५ ॥
निसश्च श्रेयसः ॥ ५. ४. ९६ ॥
अन्ववतप्तेभ्यो रहसः ॥ ५. ४ ९७ ॥
प्रतेरुरसस्सप्तमीस्थात् ॥ ५. ४. ९८ ॥
अनुगवमायामे ॥ ५. ४. ९९ ॥
द्विस्ता वा त्रिस्ता वा वेदिः ॥ ५. ४ १०० ॥
उपसर्गादध्वनः ॥ ५. ४. १०१ ॥
पाण्डूदकृष्णेभ्यो भूमेः ॥ ५. ४. १०२ ॥
संख्यानदीगोदावरीभ्यां च ॥ ५. ४. १०३ ॥
अव्ययाच्चाङ्गुलेस्तत्पुरुषे ॥ ५. ४. १०४ ॥
सर्वैकदेशसंख्यातपुण्यवर्षादीर्घेभ्यश्च रात्रेः[2] ॥ ५. ४. १०५ ॥
सख्यहोभ्यां टच् ॥ ५. ४. १०६ ॥
राज्ञोऽस्त्रियाम् ॥ ५. ४. १०७ ॥
गोरतद्धितलुकि ॥ ५. ४. १०८ ॥
उरसोऽश्ये ॥ ५. ४. १०९ ॥
अनोऽमायस्सरसां जातिसंज्ञयोः ॥ ५. ४. ११० ॥
ग्रामकौटाभ्यां तक्ष्णः ॥ ५. ४. १११ ॥
अतेः शुनः ॥ ५. ४. ११२ ॥
उपमानादप्राणिनि ॥ ५. ४. ११३ ॥
पूर्वोत्तरमृगेभ्यश्च सक्थ्नः ॥ ५. ४. ११४ ॥
नावो द्विगोः ॥ ५. ४. ११५ ॥
अर्धाच्च ॥ ५. ४. ११६ ॥
खार्यावा ॥ ५. ४. ११७ ॥
द्विस्त्रिभ्यामञ्जलेः ॥ ५. ४. ११८ ॥
कुमहद्भ्यां ब्रह्मणः ॥ ५. ४. ११९ ॥
जनपदेभ्यो नित्यम् ॥ ५. ४. १२० ॥

१. A omits राज २. A omits रात्रेः

द्वन्द्वाच्चुदषहन्तात्समाहारे ॥ ५. ४. १२१ ॥

शरद्विपाडनस्सनसुपानद्भिमवदननडुत्पथिद्युदिक्कुद्दग्यत्तच्चतुर्भ्योऽव्ययीभावे ॥ ५. ४. १२२ ॥

प्रतिपरस्समनुभ्योऽक्ष्णः ॥ ५. ४. १२३ ॥

जराया जरश्च ॥ ५. ४. १२४ ॥

अनः ॥ ५. ४. १२५ ॥

नपुंसकाद्वा ॥ ५. ४. १२६ ॥

गिरिनदीपौर्णमास्याग्रहायणीभ्यः ॥ ५. ४. १२७ ॥

[2]ङीयः ॥ ५. ४. १२८ ॥

[1]निसः शतो डच् ॥ ५. ४. १२९ ॥

अबहोः संख्येयबहुव्रीहेः ॥ ५. ४. १३० ॥

सक्थ्यक्ष्णः स्वाङ्गात्यच् ॥ ५. ४. १३१ ॥

अङ्गुलेर्दारुणि ॥ ५. ४. १३२ ॥

द्वित्रिभ्यां मूर्ध्नः ॥ ५. ४. १३३ ॥

अप्पूरण्यास्तत्प्राधान्ये ॥ ५. ४. १३४ ॥

प्रमाण्याः ॥ ५. ४. १३५ ॥

अन्तर्बहिर्भ्यो लोम्नः ॥ ५. ४. १३६ ॥

नक्षत्रान्नेतुः ॥ ५. ४. १३७ ॥

नञ्सुह्युपत्रिभ्यश्चतुरोऽच् ॥ ५. ४. १३८ ॥

नाभेः ॥ ५. ४. १३९ ॥

सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदभद्रपदाः ॥ ५. ४. १४० ॥

नञ्दुःसुभ्यस्सक्थ्नो वा ॥ ५. ४. १४१ ॥

हलिशक्त्योश्च ॥ ५. ४. १४२ ॥

नित्यमसिच् प्रजायाः ॥ ५. ४. १४३ ॥

मन्दाल्पाभ्यां च मेधायाः ५. ४. १४४ ॥

नाञ्नि नासिकायानसोऽस्थूलात् ॥ ५. ४. १४५ ॥

१. A. नद्यत्वमनयत्सत्

२. A omits this sūtra.

३. A. क्वयसनिसर्ग

४. A. असुदिवशार्डि

उपसर्गाच्च ॥ ५. ४. १४६ ॥

वेः खुखग्राः ॥ ५. ४. १४७ ॥

खरखुराभ्यां नस् वा ॥ ५. ४. १४८ ॥

धर्मादनिच् केवलात् ॥ ५. ४. १४९ ॥

सुहरिततृणसोमेभ्यो जम्भात् ॥ ५. ४. १५० ॥

दक्षिणेर्मा लुब्धयोगे ॥ ५. ४. १५१ ॥

इच्क्रियाव्यतीहारे ॥ ५. ४. १५२ ॥

[3]क्रियायां ह्वे दण्डमुसलाभ्याम् ॥ ५. ४. १५३ ॥

उभोभयाभ्यामञ्जलिपाणिहस्तदन्तकर्णेभ्यः ॥ ५. ४. १५४ ॥

बाहोर्लुक् ॥ ५. ४. १५५ ॥

संहतपुच्छयेकँपद्याद्व्यपद्यादयः ॥ ५. ४. १५६ ॥

प्रोह्यपदिनिष्कुच्यैवकीर्णी च ॥ ५. ४. १५७ ॥

मासाद्भृतिप्रत्ययादेष्ठच् ॥ ५. ४. १५८ ॥

प्रसंभ्यां जानुनोर्ज्ञुः ॥ ५ ४. १५९ ॥

ऊर्ध्वाद्वा ॥ ५. ४. १६० ॥

धँनुषो नञ् ॥ ५. ४. १६१ ॥

वासंज्ञायाम् ॥ ५. ४. १६२ ॥

उपमानात् ॥ ५. ४. १६३ ॥

पादस्य पादहस्त्यश्वाजदासीमहेलागणिकाकुसूलजालकटोलगण्डोलकेभ्यः ॥ ५. ४. १६४ ॥

कुम्भजालशतसूत्रस्थूणामुनिशिक्यार्दगोधाकलशीदासीभ्यः ॥ ५. ४. १६५ ॥

विष्णुकृष्णकुणिगुणद्रोणीसट्टकृत्सूकरसूचीशुचिविनञ्जिनरघ्राभ्यश्च॥ ५. ४. १६६॥

संख्यादेः ॥ ५. ४. १६७ ॥

वयसि दन्तस्य दत् ॥ ५. ४. १६८ ॥

षो डन् ॥ ५. ४. १६९ ॥

१. A omits this sūtra.

२. A omits this sūtra.

३. A adds क्रियायाम्

४. A. कपद्यादयः

५. A. ज्यकीर्णी

६. A. मासात्सत्प्रभृति

७. C omits this and the following ten sūtras.

८. A. This is read along with the previous sūtra.

स्त्रियां संज्ञायाम् ॥ ५. ४. १७० ॥

अग्रान्तशुद्धशुभ्रवृषवराहमृषिकश्यावशिखरारोकेभ्यो वा ॥ ५. ४. १७१ ॥

ककुत्ककुदस्यावस्थायाम् ॥ ५ ४. १७२ ॥

त्रिककुत्पर्वते ॥ ५. ४. १७३ ॥

उद्भिभ्यां काकुत्काकुदस्य ॥ ५. ४. १७४ ॥

पूर्णाद्वा ॥५. ४. १७५ ॥

सुहृद्दुर्हृदौ मित्रामित्रयोः ॥ ५. ४. १७६ ॥

उरस्सर्पिर्दधिमधुपोधानच्छालिभ्यः कप् ॥ ५. ४. १७७ ॥

पुमनडुन्नौपयोलक्ष्मीभ्य एकत्वे ॥ ५. ४. १७८ ॥

नञोऽर्थात् ॥ ५. ४. १७९ ॥

इनः स्त्रियाम् ॥ ५. ४. १८० ॥

ङ्यूङ्कृतः ॥ ५. ४. १८१ ॥

शेषाद्वा ॥ ५. ४. १८२ ॥

न सुभ्वादिभ्यः ॥ ५. ४. १८३ ॥

संज्ञायाम् ॥ ५. ४. १८४ ॥

ईयसः ॥ ५. ४. १८५ ॥

ङेर्या ईच्च ॥ ५. ४. १८६ ॥

स्तुतौ भ्रातुः ॥ ५. ४. १८७ ॥

नाडीतन्त्रयोस्स्वाङ्गे ॥ ५. ४. १८८ ॥

निष्प्रवाणिः ॥ ५. ४. १८९ ॥

इति श्रीसरस्वतीकण्ठाभरणनाम्नि व्याकरणे
पञ्चमस्याध्यायस्य चतुर्थः पादः
समाप्तः

—

१. A omits शुद्ध.

अथ षष्ठोऽध्यायः

सन्यङोराद्य एकाज्द्विः ॥ ६. १. १ ॥

श्लु चङि ॥ ६. १. २ ॥

लिट्यनामि ॥ ६. १. ३ ॥

अजादेर्द्वितीयः ॥ ६. १. ४ ॥

नन्द्वास्संयोगादयः ॥ ६. १. ५ ॥

अयिरः पुनः ॥ ६. १. ६ ॥

इष्यतेर्यिः सन् वा ॥ ६. १. ७ ॥

सुब्धातूनां यथेष्टम् ॥ ६. १. ८ ॥

अजादीनां द्वितीयात् ॥ ६. १. ९ ॥

कण्ड्वादीनां तृतीयः ॥ ६. १. १० ॥

दाश्वान् साह्वान् मीढ्वांश्च ॥ ६. १. ११ ॥

क्ङिदेः के ॥ ६. १. १२ ॥

कृसेरचि दीर्घश्च ॥ ६. १. १३ ॥

चरिचलिपतिवदीनामभ्यासस्य ॥ ६. १ १४ ॥

हन्तेर्हश्च घः ॥ ६. १. १५ ॥

पाटेर्णिग्दीर्घः ऊक् च ॥ ६. १. १६ ॥

ष्यङः प्रधानस्य प्रसारणं पुत्रपत्योः केवलयोस्तत्पुरुषे ॥ ६. १. १७ ॥

बन्धुनि बहुव्रीहौ ॥ ६. १. १८ ॥

मातृष्मातृकमातृषु वा ॥ ६. १. १९ ॥

वचिस्वपियजादीनां लिट्यपिति ॥ ६. १. २०. ॥

१. A. नङ्वा

२. C omits पुनः

३. A. तृतीयात्

४. A. दाद्वान्

५. A. This portion is written as a separate sūtra.

६. C omits this sūtra and commentary.

७. A adds वाक्

८. A. रच घः

९, १०. A. These portions are written as separate sūtras.

ग्रहिज्यध्योः ॥ ६. १. २१ ॥
शिङितोः ॥ ६. १. २२ ॥
ज्यावश्रभ्रस्जाम् ॥ ६. १. २३ ॥
पृच्छेरनङि ॥ ६. १. २४ ॥
वशेऽर्थस्यपिति ॥ ६. १. २५ ॥
व्यचोऽञ्णिस्यनसि ॥ ६. १. २६ ॥
किति चैतेषाम् ॥ ६. १. २७ ॥
लिट्यश्विनामभ्यासस्य ॥ ६. १. २८ ॥
ग्रहिस्वपिप्रच्छां सनि ॥ ६. १. २९ ॥
स्वापेश्चङि ॥ ६. १. ३० ॥
स्वपिस्यमिव्येञां यङि ॥ ६. १. ३१ ॥
चायः की ॥ ६. १. ३२ ॥
प्रस्त्याप्रसंस्त्योर्निष्ठायाम् ॥ ६. १. ३३ ॥
स्पर्शद्रवमूर्त्योः श्यः ॥ ६. १. ३४ ॥
प्रतेः ॥ ६. १. ३५ ॥
वौभ्यवाभ्याम् ॥ ६. १. ३६ ॥
स्फायः स्फी ॥ ६. १. ३७ ॥
श्रातेः शृतं क्षीरहविषोः ॥ ६. १. ३८ ॥
श्रपेश्चैकत्र हेतौ ॥ ६. १. ३९ ॥
प्यायः पीरनुपसर्गस्य ॥ ६. १. ४० ॥
आङोऽन्धूधसोः ॥ ६. १. ४१ ॥
लिड्यङोः ॥ ६. १. ४२ ॥
वाश्वेः ॥ ६. १. ४३ ॥

१. A. श्रहि व्यर्धेः
२. A. शिन्
३. A. वशेस्ति
४. A. This is read along with the previous sūtra.
५. A. This is read along with the previous sūtra.
६. A. This portion is read as a separate sūtra.
७. A. नानुपसर्गस्य and this is written as a separate sūtra.
८. A. नूधसोः
९. A. याश्वेः

णौ संश्चङोः ॥ ६. १. ४४ ॥

ह्वः द्वित्वे ॥ ६. १. ४५ ॥

न तस्मिन् ॥ ६. १. ४६ ॥

लिटि वयो यः ॥ ६. १. ४७ ॥

वेञः ॥ ६. १. ४८ ॥

अपिति वा ॥ ६. १. ४९ ॥

ल्यपि ज्यः ॥ ६. १. ५० ॥

व्यः ॥ ६. १. ५१ ॥

परेर्वा ॥ ६. १. ५२ ॥

धातोरुपदेश एचोऽशिदेशोरात् ॥ ६. १. ५३ ॥

अलिटि व्यः ॥ ६. १. ५४ ॥

स्फुरस्फुलोर्घञि ॥ ६. १. ५५ ॥

दीङ एङ्झेतौ ॥ ६. १. ५६ ॥

ल्यपि च ॥ ६. १. ५७ ॥

मिम्योरखलाचि ॥ ६. १. ५८ ॥

लियो वा ॥ ६. १. ५९ ॥

सनि दीङः ॥ ६. १. ६० ॥

अपगुरो णमुलि ॥ ६. १. ६१ ॥

चिस्फुरोर्णौ ॥ ६. १. ६२ ॥

प्रजने वियः ॥ ६. १ ६३ ॥

भियो हेतुभये ॥ ६. १. ६४ ॥

स्मेः स्मये नित्यम् ॥ ६. १. ६५ ॥

लियः पूजाप्रलम्भनाभिभवेषु ॥ ६. १. ६६ ॥

क्रीङ्जीनाम् ॥ ६. १. ६७ ॥

सिध्यतेरपारलौकिके ॥ ६. १. ६८ ॥

१. A. द्वित्वे is written as part of the next sūtra.

२. A. प्य and is written as part of the next sūtra.

३. A. मिथ्योरालि च

४. A. हेतोर्भये

५. A. स्मयतेः

अष्टिवुष्वष्केरादेः षः सः ॥ ६. १. ६९ ॥

सृपिसृजिसृस्तृस्त्यासेकृवर्जमज्झन्त्यपरसादिस्त्रिखिदिखदिर्ल्लञ्स्वपयः षो - पदेशाः ॥ ६. १. ७० ॥

णो नः ॥ ६. १. ७१ ॥

नृतिनन्दिनर्दिनार्किनाटिनाधृनाथृवर्जं नादयो णोपदेशाः ॥ ६. १. ७२ ॥

व्योर्वलि लोपः ॥ ६. १. ७३ ॥

वेरेनचः ॥ ६. १. ७४ ॥

हलस्तिप्सिपः ॥ ६. १. ७५ ॥

सोः ॥ ६. १. ७६ ॥

ङ्याप्रो दीर्घात् ॥ ६. १. ७७ ॥

एङ्ह्रस्वात्संबुद्धेरनतः ॥ ६. १. ७८ ॥

ह्रस्वस्य पिति कृति तुक् ॥ ६. १. ७९ ॥

संहितायां छे ॥ ६. १. ८० ॥

आङ्माङोः ॥ ६. १. ८१ ॥

दीर्घस्य ॥ ६. १. ८२ ॥

पदान्तस्य वा ॥ ६. १. ८३ ॥

इको यणचि ॥ ६. १. ८४ ॥

एचोऽयवायावः ॥ ६. १. ८५ ॥

यि प्रत्ययेऽवैवावौ ॥ ६. १. ८६ ॥

धातोस्तन्निमित्तस्यैव ॥ ६. १. ८७ ॥

गव्यूतिरूर्ध्वमाने ॥ ६. १. ८८ ॥

शक्ये क्षिज्योरयू ॥ ६. १. ८९ ॥

क्रिया क्रियार्थे ॥ ६. १. ९० ॥

एकः पूर्वपरयोः ॥ ६. १. ९१ ॥

अन्तादिवच्च ॥ ६. १. ९२ ॥

१. A. ग्वोः

२. A. वेश्च नः

३. A. This is read along with the previous sūtra.

४. A. एवं दीर्घ

५. A. This portion is written as a separate sūtra.

नाभ्यासोपसर्जनसंबुद्धिनपुंसकह्रस्वत्वोभयाश्रयवर्णविधिषु ॥ ६. १. ९३ ॥
षत्वतुकोरसिद्धः ॥ ६. १. ९४ ॥
न संप्रसारणङीट्सु ॥ ६. १. ९५ ॥
आद्गुणः ॥ ६. १. ९६ ॥
वृद्धिरेवाद्यटः ॥ ६. १. ९७ ॥
एचि ॥ ६. १. ९८ ॥
इणो धोः ॥ ६. १. ९९ ॥
ऊठि ॥ ६. १. १०० ॥
अक्षादूहिन्याः ॥ ६. १. १०१ ॥
स्वादीरेरिणोः ॥ ६. १. १०२ ॥
प्रादूढोढ्येष्येषु ॥ ६. १. १०३ ॥
ऋते तृतीयासमासे ॥ ६. १. १०४ ॥
प्रदशार्णवसनकम्बलैवत्सनराड्णे ॥ ६ १. १०५ ॥
उपसर्गादति धातौ ॥ ६. १. १०६ ॥
वा सुब्ल्युति च ॥ ६. १. १०७ ॥
एङि पररूपम् ॥ ६. १ १०८ ॥
अनियोग एवे ॥ ६. १. १०९ ॥
ओष्ठोत्वोः समासे वा ॥ ६. १. ११० ॥
शककुलपतादिभ्योन्धवटाञ्जल्यादिषु ॥ ६. १. १११ ॥
सीमन्तः केशेषु ॥ ६. १. ११२ ॥
ओमाङोः ॥ ६. १. ११३ ॥
उस्यपदादौ ॥ ६. १. ११४ ॥
अतो गुणे ॥ ६. १. ११५ ॥
अव्यक्तानुकरणस्यानेकाचोऽत इतौ ॥ ६. १. ११६ ॥
न द्वित्वे ॥ ६. १. ११७ ॥
तो वा ॥ ६. १. ११८ ॥
नित्यं डाचि पूर्वस्य ॥ ६. १. ११९ ॥
ओतोंशसोराम् ॥ ६. १. १२० ॥

१. A. तारणे ङि
२. A. कवलवतरा
३. A. This is read along with the previous sûtra.

अकः सवर्णे दीर्घः ॥ ६. १. १२१ ॥
ऋत्यृत ऋ वा ॥ ६. १. १२२ ॥
ऌतॡः ॥ ६. १ १२३ ॥
शसि पूर्वसवर्णः ॥ ६. १. १२४ ॥
ततः शसो नःपुंसि ॥ ६. १. १२५ ॥
आज्जसि ॥ ६. १ १२६ ॥
इदुद्भ्यामौति ॥ ६. १. १२७ ॥
अणोऽमि पूर्वः ॥ ६. १. १२८ ॥
संप्रसारणात् ॥ ६. १. १२९ ॥
एङोऽतिपदादौ ॥ ६. १. १३० ॥
ङसिङसोः ॥ ६. १. १३१ ॥
ऋतउत् ॥ ६. १ १३२ ॥
ख्यत्यात्परस्य ॥ ६. १. १३३ ॥
हशिश्वातो रोः ॥ ६. १. १३४ ॥
गोरो वा ॥ ६. १. १३५ ॥
अच्यवङ् ॥ ६. १. १३६ ॥
नित्यमिन्द्रे ॥ ६. १. १३७ ॥
अक्षे संज्ञायाम् ॥ ६. १. १३८ ॥
प्रगह्यः प्रकृत्या ॥ ६ १. १३९ ॥
प्लुतोऽनितौ ॥ ६. १. १४० ॥
ईयँय वा ॥ ६ १. १४१ ॥
ओण्य च क्वचित् ॥ ६. १. १४२ ॥
अप्लुतादीनामिकोऽसवर्णे ह्रस्वश्चासमासे ॥ ६. १. १४३ ॥
ऋदृत्यकः ॥ ६. १. १४४ ॥
तदस्योर्लोपोऽचिँ पादपूरणं चेत् ॥ ६. १. १४५ ॥

१. A omits this sūtra.
२. A. This is read along with the previous sūtra.
३. A. ङितौ
४. A. ईति
५. A आन च
६. A. This portion is read as a separate sūtra.
७. A. चेनिपाद

एतदश्वानकच्चोऽनञ्समासे हलि ॥ ६. १. १४६ ॥
पदान्ने दिव उत् ॥ ६. १. १४७ ॥
संपरिभ्यां कृञः सुट् ॥ ६. १. १४८ ॥
उपाद्भूषणसमवायप्रतियत्नविकृतवाक्याध्याहारेषु ॥ ६. १. १४९ ॥
किरतौ लवने ॥ ६. १. १५० ॥
हिंसायां प्रतेश्च ॥ ६. १. १५१ ॥
अपाच्चतुष्पाच्छकुनिहृष्टान्नकुलायार्थिषु ॥ ६. १. १५२ ॥
अपरस्पराः क्रियासातत्ये ॥ ६. १. १५३ ॥
पारस्करो देशे ॥ ६. १. १५४ ॥
कारस्करो वृक्षे ॥ ६. १. १५५ ॥
वनस्पतिश्च ॥ ६. १. १५६ ॥
रथस्या नद्याम् ॥ ६. १. १५७ ॥
किष्कुः प्रमाणे ॥ ६. १. १५८ ॥
किष्किन्धा गुहायाम् ॥ ६. १. १५९ ॥
गोष्पदं सेवितासेवितप्रमाणेषु ॥ ६. १. १६० ॥
आस्पदं प्रतिष्ठायाम् ॥ ६. १. १६१ ॥
आश्चर्यमद्भुते ॥ ६. १. १६२ ॥
अयस्करो वर्चस्केः ॥ ६. १. १६३ ॥
अपस्करो रथाङ्गे ॥ ६. १. १६४ ॥
मस्करमस्करिणौ वेणुपरिव्राजकयोः ॥ ६. १. १६५ ॥
प्रस्कण्वहरिश्चन्द्रावृषी ॥ ६. १. १६६ ॥
काश्मीराजस्तुन्दे नगरे ॥ ६. १. १६७ ॥
कुस्तुम्बुरुरोषधौ ॥ ६. १. १६८ ॥
शष्कुलीकृतान्नम् ॥ ६. १. १६९ ॥
वौ विष्किरो वा ॥ ६. १. १७० ॥
प्रतिष्कशः प्रष्टसहायदूतेषु ॥ ६. १. १७१ ॥
तस्करबृहस्पती चोरदेवतयोः ॥ ६. १. १७२ ॥

१. A. This and the following four sūtras are omitted.
२. A. वर्चस्के

प्रात् तुम्पतेर्गवि ॥ ६. १. १७३ ॥
प्रायश्चित्तिचित्तयोः ॥ ६. १. १७४ ॥
परश्शतपरस्सहस्रादयश्च ॥ ६. १. १७५ ॥

इति श्री सरस्वतीकण्ठाभरणनाम्नि व्याकरणे
षष्ठाध्यायस्य प्रथमः पादः
समाप्तः

—

१. A. प्राकम्पतेः

अथ द्वीतीयः पादः

अलुगुत्तरपदे ॥ ६. २. १ ॥
पञ्चम्याः स्तोकान्तिकदूरार्थकृच्छ्रेभ्यः ॥ ६. २ २ ॥
ब्राह्मणाच्छंसी ॥ ६. २. ३ ॥
खिती च एकाचोऽमः ॥ ६. २. ४ ॥
ओजस्सहोम्भस्तमोऽङ्गसेभ्यस्तृतीयायाः ॥ ६. २. ५ ॥
मनसः संज्ञायाम् ॥ ६. २. ६ ॥
आज्ञायिनी ॥ ६. २. ७ ॥
पुङ्गनुभ्यामनुजान्धयोः ॥ ६. २. ८ ॥
आत्मनः पूरणे ॥ ६. २. ९ ॥
परौ च वैयाकरणाख्यायां चतुर्थ्याः ॥ ६. २. १० ॥
सप्तम्यास्तत्पुरुषे कृति बहुलम् ॥ ६. २. ११ ॥
हलदन्तात्संज्ञायाम् ॥ ६. २. १२ ॥
प्राचां कारे हलादौ ॥ ६. २. १३ ॥
मध्यमान्ताभ्यां गुरौ ॥ ६. २. १४ ॥
अमूर्धमस्तकात्स्वाङ्गादकामे ॥ ६. २. १५ ॥
अपो यद्योनिमतिषु ॥ ६. २. १६ ॥
द्युप्रावृड्वर्षाशरत्कालेभ्यो जे ॥ ६. २. १७ ॥
वर्षक्षरशरवराप्सरःप्रभृतिभ्यो वा ॥ ६. २. १८ ॥
बन्धे घञि ॥ ६. २. १९ ॥

१. A. खरी च. This is read as part of the previous sūtra.
२. A. सहोम्भऋभ्योभ्यः
३. A. यिनि च
४. A. पराच्च is read along with the previous sūtra.
५. A adds as a separate sūtra हृद्भ्याम्
६. A. अबो यद्योमात्रिषु

घतनकालेषु कालनाम्नः ॥ ६. २. २० ॥

शयवासवासिष्वकालात् ॥ ६. २. २१ ॥

नेनेबन्धिसिद्धशास्त्रेषु ॥ ६. २. २२ ॥

षष्ठ्या आक्रोशे ॥ ६. २. २३ ॥

पुत्रे वा ॥ ६. २. २४ ॥

वांग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु ॥ ६. २. २५ ॥

अक्सः फग्वुञोः ॥ ६. २. २६ ॥

देवानां प्रियः ॥ ६. २. २७ ॥

शुनश्शेफपुच्छलाङ्गूलेषु संज्ञायाम् ॥ ६. २. २८ ॥

दिवोदासदिवस्पतिवाचस्पतिवास्तोष्पतयः ॥ ६. २. २९ ॥

ऋतो विद्यायोनिसंबन्धिनस्तस्मिन् ॥ ६. २. ३० ॥

स्वसृपत्योर्वा ॥ ६. २. ३१ ॥

आनङृतो द्वन्द्वे ॥ ६. २. ३२ ॥

पुत्रे ॥ ६. २. ३३ ॥

मातुः पितर्यरङ् च ॥ ६ २. ३४ ॥

देवतानामवायूनां वेदे सहश्रुतानाम् ॥ ६. २. ३५ ॥

अग्नेः सोमवरुणयोरीत् ॥ ६. २. ३६ ॥

इद्वृद्धिमत्यविष्णौ ॥ ६. २. ३७ ॥

दिवो द्यावा ॥ ६. २. ३८ ॥

दिवस्पृथिव्यां वा ॥ ६. २. ३९ ॥

उषासोषसः ॥ ६. २. ४० ॥

गुणस्त्र्यनूङ् पुंवत् स्त्रियामेकाधिकरणे ॥ ६. २. ४१ ॥

त्रैलूतभ्ररट्घकल्पन्देश्यरूपप्पाशर्प्छस्थ्यन्क्यङ्क्यानिषु ॥ ६. २. ४२ ॥

१. A. घतनतापेषु

२. A. नेबन्धि

३. A. वादिक्

४. A. पितुरङ्गच्

५. A. This is read along with the previous sūtra.

६. A. This portion is read as a separate sūtra.

७. A. त्रस्तश्च

८. A. शस्त्यन्

यचि तद्धिते ॥ ६. २. ४३ ॥

ढे अन्नायी ॥ ६. २. ४४ ॥

नं प्रधानपूरण्याम् ॥ ६. २. ४५ ॥

भक्तौ च कर्मसाधनायाम् ॥ ६. २. ४६ ॥

प्रियामनोज्ञाकल्याणीसुभगादुर्भगास्वाक्षान्ताकान्तावामावामनासमासचिवाच-
पलाबालातनयादुहितृषु[1] ॥ ६. २. ४७ ॥

द्युतद्धितकोपधासंज्ञापूरण्यः ॥ ६. २. ४८ ॥

तद्धितोऽज्वृद्धिहेतुररक्तविकारे ॥ ६. २. ४९ ॥

स्वाङ्गादीदमानिनि ॥ ६. २. ५० ॥

जातिरयच्[2] तद्धिते च ॥ ६. २. ५१ ॥

पुंवत्कर्मधारयजातीयदेशीयेषु ॥ ६. २. ५२ ॥

त्वतलोर्गुणः ॥ ६. २. ५३ ॥

सर्वनामानि वृत्तिमात्रे ॥ ६. २. ५४ ॥

कुक्कुट्यादयोऽण्डादिषु वा ॥ ६. २. ५५ ॥

घरूकल्पचेलट्टभ्रुवगोत्रमतहतेषु ङ्यो ह्रस्वः ॥ ६. २. ५६ ॥

वैकाचः ॥ ६. २. ५७ ॥

ङगितः पुंवच्च ॥ ६. २. ५८ ॥

ऊङः ॥ ६. २. ५९ ॥

आन्महतः सामानाधिकरणजातीययोरुच्यर्थे ॥ ६. २. ६० ॥

घासकरविशिष्टेषु पुंवच्च ॥ ६. २. ६१ ॥

न पुंवन्निषेधे ॥ ६ २. ६२ ॥

इच्यनँचि दीर्घश्च ॥ ६. २. ६३ ॥

दशस्यैकस्य ॥ ६. २. ६४ ॥

१. A. This is read along with the previous sūtra.

२. A adds च

३. A. न पुतद्धित

४. A. This portion is read as a separate sūtra.

५. A adds as a separate sūtra गुणवचना इत्येव

६. A. त्वतो लुलोः

७. A. नाजि

८. A. दशस्वे

अष्टनः संज्ञायाम् ॥ ६. २. ६५ ॥

कपाले हविषि ॥ ६. २. ६६ ॥

गंवि युक्ते ॥ ६. २. ६७ ॥

द्वेश्च संख्यायाम् प्राक्कृच्छतादबहुव्रीह्यशीत्योः ॥ ६. २. ६८ ॥

चत्वारिंशदादौ वा ॥ ६. २. ६९ ॥

त्रेस्त्रयस्तद्वत् ॥ ६. २. ७० ॥

हृदयस्य हृद्यदण्लेखलासेषु ॥ ६. २. ७१ ॥

ष्यञ् शोकरोगशूलशल्यादिषु वाँ ॥ ६. २. ७२ ॥

हस्तिनोऽपत्याणि ॥ ६. २. ७३ ॥

पत्काषिहिमहतिष्ठन्सुं ॥ ६. २. ७४ ॥

संख्यादेर्वुनि ॥ ६. २. ७५ ॥

ऋचश्शसि ॥ ६. २. ७६ ॥

वा घोषनिष्कमिश्रशब्देषु ॥ ६. २. ७७ ॥

नस्नासिकास्तस्स्रुद्रयोः ॥ ६. २. ७८ ॥

यत्यवर्णे ॥ ६. २. ७९ ॥

शिरसः शीर्षन् ॥ ६. २. ८० ॥

शीर्षेऽचि तद्धिते ॥ ६. २. ८१ ॥

उदकस्योदः संज्ञायाम् ॥ ६. २. ८२ ॥

उत्तरपदस्य च ॥ ६. २. ८३ ॥

पेषं वासवाहनेषु ॥ ६. २. ८४ ॥

एँकहलादौ भाण्डे वा ॥ ६. २. ८५ ॥

मन्थौदनसक्तुबिन्दुव्रजभारहारवीवधगाहेषु ॥ ६. २. ८६ ॥

इको ह्रस्वः ॥ ६. २. ८७ ॥

१. A. This is read along with the previous sūtra.

२. A. This portion is read as a separate sūtra.

३. ष्यञो गश्लो

४. A adds as a separate sūtra पादः पादस्याजातिकोपहतेषु

५. A adds as a separate sūtra यत्यतदर्थहीये

६. A omits this and the following three sūtras.

७. A. एकाद्यायन

८. A. वज्राहहार

न संप्रसारणाव्ययङ्घीयुवृस्थानिनामभ्रुकुंसादीनाम् ॥ ६. २. ८८ ॥

ङ्यापोः संज्ञायां बहुलम् ॥ ६. २. ८९ ॥

त्वे च ॥ ६. २. ९० ॥

इष्टकेषीकामालानां चिततूलभारिषु ॥ ६. २. ९१ ॥

खित्यनव्ययस्य ॥ ६. २. ९२ ॥

हस्वादुर्द्विषतां मुम् ॥ ६. २. ९३ ॥

सत्यागतास्तूनां कारे ॥ ६. २. ९४ ॥

लोकस्य पृणे ॥ ६. २. ९५ ॥

इत्येनभ्याशस्य ॥ ६. २. ९६ ॥

भ्रांष्ट्राग्न्योरिन्धे ॥ ६. २. ९७ ॥

अगिलस्य गिले ॥ ६. २. ९८ ॥

भद्रोष्णयोः करणे ॥ ६. २. ९९ ॥

मध्यस्य दिने ॥ ६. २. १०० ॥

इयेनतिलयोः पाते ञे ॥ ६. २. १०१ ॥

रात्रेः कृत्यखिति वा ॥ ६. २. १०२ ॥

धेनोर्भव्यायाम् ॥ ६. २. १०३ ॥

सूतोग्रराजभोजमेनकुलशैलादिभ्यो दुहितुः पुत्रट् ॥ ६. २. १०४ ॥

मांसस्य पचिघञ्ल्युटोर्लोपः ॥ ६. २. १०५ ॥

समस्ततहितयोः ॥ ६. २. १०६ ॥

तुमश्च काममनसोर्नित्यम् ॥ ६. २. १०७ ॥

कृत्येऽवश्यमः ॥ ६. २. १०८ ॥

नञो नः ॥ ६. २. १०९ ॥

तिङ्यवक्षेपे ॥ ६. २. ११० ॥

तस्मान्नुडचि ॥ ६. २. १११ ॥

नभ्राण्नपान्नवेदोनासत्यनमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकनग्ननागनभागना - राचनाचिकेतनापितनमेरुननान्दनान्तरीयकादिषु प्रकृत्या ॥ ६. २. ११२ ॥

१. A. त्राष्ट and this portion is read as a separate sūtra.

२. A. पात्रेतेत्रेचिञ्

३. A. कृत्यखीति वा

४. A. सूत्रे

एकादन्नाद्यौ संख्यायाम् ॥ ६. २. ११३ ॥

नगोऽप्राणिनि वा ॥ ६. २. ११४ ॥

सहस्य सो बहुव्रीहौ वा ॥ ६. २. ११५ ॥

संज्ञायाम् ॥ ६. २. ११६ ॥

अनुपाख्याधिकयोः ॥ ६. २. ११७ ॥

अव्ययीभावे चाकाले ॥ ६. २. ११८ ॥

ग्रन्थान्ते च ॥ ६. २. ११९ ॥

नाशिष्यगोवत्सहले ॥ ६. २. १२० ॥

समानस्य पक्षज्योतिर्जनपदरात्रिनाभिबन्धुगन्धपिण्डपत्यादिषु ॥ ६. २. १२१ ॥

चरणे ब्रह्मचारिणि ॥ ६. २. १२२ ॥

तीर्थे ये ॥ ६. २. १२३ ॥

उदरे वा ॥ ६. २. १२४ ॥

नामगोत्ररूपस्थानवर्णवयोवचनधर्मजातीषेषु च ॥ ६. २. १२५ ॥

दृग्दृशदृक्षेषु ॥ ६. २. १२६ ॥

वतौ चेदृङ्मादृक्षी ॥ ६. २. १२७ ॥

आ सर्वनाम्नः ॥ ६. २. १२८ ॥

विष्वग्देवयोश्च टेरद्र्यञ्चतौ वा ॥ ६. २. १२९ ॥

समः समिः ॥ ६. २. १३० ॥

सहस्य सध्रिः ॥ ६. २. १३१ ॥

तिरसस्तिर्यति ॥ ६. २. १३२ ॥

अन्तरन्तवर्णान्तोपसर्गेभ्योऽप ईत् ॥ ६. २. १३३ ॥

ऊदनोर्देशे ॥ ६. २. १३४ ॥

आत्समो देवयजने ॥ ६. २. १३५ ॥

छकारकयोरन्यस्य दुक् ॥ ६. २. १३६ ॥

१. A. This is read along with the previous sūtra.

२. A. दिदिश

३. A. This portion is read as a separate sūtra.

४. A. टेरदिरञ्चि वा

५. A. अन्तरौ

अषष्ठीतृतीयास्थस्याशीराशास्थास्थितोत्सुकोऽतिरागेषु ॥ ६. २. १३७ ॥
अर्थे वा ॥ ६. २. १३८ ॥
कोः कत् तत्पुरुषेऽचि ॥ ६. २. १३९ ॥
भ्रिरथवदेषु ॥ ६. २. १४० ॥
तृणे जातौ ॥ ६. २. १४१ ॥
कापथ्यक्षयोः ॥ ६ २. १४२ ॥
ईषदर्थे ॥ ६. २. १४३ ॥
पुरुषे वा ॥ ६. २. १४४ ॥
कवं चोष्णे ॥ ६. २. १४५ ॥
दिक्छब्दात्तीरस्य तारः ॥ ६. २. १४६ ॥
पृषद् उदरोद्धानयोर्लोपः ॥ ६. २. १४७ ॥
अवाप्योत्तंसनद्धादिष्वादेर्वा ॥ ६. २. १४८ ॥
जीवनस्य मृते वादेः । ६. २. १४९ ॥
वारेर्वो वाहके लश्चोत्तरपदादेः ॥ ६. २. १५० ॥
आङो ध्यष्टुः[2] ॥ ६. २. १५१ ॥
शेते महिषः ॥ ६. २. १५२ ॥
पिशाचश्मशाने पिशिताशशवशयनयोः ॥ ६. २. १५३ ॥
वाग्वादस्येऽग्नि वाङ्गलः ॥ ६. २. १५४ ॥
ब्रुवन्तोऽस्यां सीदन्ति बृसी ॥ ६. २. १५५ ॥
ऊर्ध्वं खमस्योदूखलमुलूखलं वा ॥ ६. २. १५६ ॥
दिव्योक एषां दिवौकसः ॥ ६. २. १५७ ॥
कपित्थदधित्थमाहित्थाश्वत्थादयश्च ॥ ६. २. १५८ ॥
संख्याविसायादेरह्नस्याहन् ङौ वा ॥ ६. २. १५९ ॥
सायंलोहतरयोः ॥ ६. २. १६० ॥
सप्तम्यां वासा च ॥ ६. २. १६१ ॥

१. A. वृषत
२. A adds two separate sūtras:
दुरोदाशनाशादहभ्येषूच ॥
षषादेशमुमस्यां रौति मयूरः ॥
३. C omits this and the following eleven sūtras.

विश्वस्य वसुराटोर्दीर्घः ॥ ६. २. १६२ ॥

नरे संज्ञायाम् ॥ ६. २. १६३ ॥

ऋषौ मित्रे ॥ ६. २. १६४ ॥

कोटरमिथकसिध्रकपुरगशारिकाणां वने ॥ ६. २. १६५ ॥

अञ्जनभञ्जनकिंशुककिंलुकसाल्वलोहितकुक्कुटखञ्जननलपिङ्गलानां गिरौ ॥ ६. २. १६६ ॥

मतौ बह्वचोनजिरखदिरखपुरस्थविरस्थलिनमलयकारण्डवचक्रवाकादीनां शावंश-शुचिकुशधूमाहिकविहनुमन्यादीनां च ॥ ६. २. १६७ ॥

बलच्यनुत्साहभ्रातृपितृणाम् ॥ ६. २. १६८ ॥

चितेः कपि ॥ ६. २. १६९ ॥

ढलोपे पूर्वस्याणः ॥ ६. २. १७० ॥

सहिबहोरोदवर्णस्य ॥ ६. २. १७१ ॥

कर्णेचिह्नस्याविष्टाष्टपञ्चभिन्नछिन्नच्छिद्रस्रुवस्वस्तिकस्य ॥ ६. २. १७२ ॥

नेहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ॥ ६. २. १७३ ॥

उपसर्गस्य घञि बहुलम् ॥ ६. २. १७४ ॥

इकः काशे ॥ ६. २. १७५ ॥

दस्ति ॥ ६. २. १७६ ॥

अपीलुदार्वादेर्वहे ॥ ६. २. १७७ ॥

अन्येषामपि दृश्यते ॥ ६. २. १७८ ॥

चौ ॥ ६. २. १७९ ॥

संप्रसारणस्य ॥ ६. २. १८० ॥

इति श्रीसरस्वतीकण्ठाभरणनाम्नि व्याकरणे
षष्ठस्याध्यायस्य द्वितीयः पादः
समाप्तः

---

१. A omits छिन्न

२. A. This is read along with the previous sūtra.

अथ तृतीयः पादः

प्रकृतेः ॥ ६. ३. १ ॥

हलादेरन्त्यस्य ॥ ६. ३. २ ॥

नाम्यतिसृचतसृनोः ॥ ६. ३. ३ ॥

न उपधायाः ॥ ६. ३. ४ ॥

शिसुघशीसंबुध्योः ॥ ६. ३. ५ ॥

सहतोर्नुमि ॥ ६. ३. ६ ॥

अप्तृस्वसृनप्तृनेष्टृक्षत्तृहोतृपोतृप्रशास्तृप्रस्तोत्रुन्नेत्रुद्गातृप्रतिहर्तृप्रतिप्रस्थातॄणाम् ॥ ६. ३. ७ ॥

अत्वसन्तस्याधातोः सौ ॥ ६. ३. ८ ॥

इन्हन्पूषार्यम्णां सौ च ॥ ६. ३. ९ ॥

अज्झनोः सनि झलि ॥ ६. ३. १० ॥

इङो गमः ॥ ६. ३. ११ ॥

तनोर्वा ॥ ६. ३. १२ ॥

क्रमः क्त्वि ॥ ६. ३. १३ ॥

अहञमस्तिङ्यपितिकिति वौ च ॥ ६. ३. १४ ॥

अमि च च्छ्वोः शूठौ ॥ ६. ३. १५ ॥

स्निव्यविमविज्वरित्वरामुपधायाश्च ॥ ६. ३. १६ ॥

राल्लोपः ॥ ६. ३. १७ ॥

प्राग्युवोरग्युग्घुगसिद्धं समानाश्रये ॥ ६. ३. १८ ॥

इनाम्न ॥ ६. ३. १९ ॥

हलोऽनिदितः किङित्युपधायाः ॥ ६. ३. २० ॥

१. A. शौ च

२. A. This portion is written as a separate sūtra.

३. A. समानान्धीये

४. A. This portion is written as a separate sūtra.

शिल्पिपिति ॥ ६. ३. २१ ॥

ग्रन्थिंग्रन्थिष्वञ्जीन्धीनां लिटि ॥ ६. ३. २२ ॥

दम्भेस्सि सनि च ॥ ६. ३. २३ ॥

दंशिषञ्जिष्वञ्जां शपि ॥ ६. ३. २४ ॥

रेञ्जेष्युन् ॥ ६. ३. २५ ॥

घिनुण् ॥ ६. ३. २६ ॥

ल्युडसुन्नविष्ट च ॥ ६. ३. २७ ॥

णौ मृगरमणे ॥ ६. ३. २८ ॥

घञि भावकरणयोः ॥ ६. ३. २९ ॥

स्यदो जवे ॥ ६. ३. ३० ॥

अवोदैधोद्म्प्रश्रथहिमश्रथाः ॥ ६. ३. ३१ ॥

लङ्क्लिक्म्योरुपतापशरीरविकारयोः ॥ ६. ३. ३२ ॥

वनतितनोत्याद्यनिटां ल्यपि लमः ॥ ६. ३. ३३ ॥

मो वा ॥ ६. ३. ३४ ॥

झलि तिङ्त्यपिति ॥ ६. ३. ३५ ॥

क्ङिति ॥ ६. ३. ३६ ॥

जनसनखनामात् ॥ ६. ३. ३७ ॥

सनि ॥ ६. ३. ३८ ॥

ये वा ॥ ॥ ६. ३. ३९ ॥

तनोतेर्यकि ॥ ६. ३. ४० ॥

सनः क्तिचि लोपश्च ॥ ६. ३. ४१ ॥

गमेर्लिङ्यात्मनेपदे ॥ ६. ३. ४२ ॥

सिचि च ॥ ६. ३. ४३ ॥

हनो नित्यम् ॥ ६. ३. ४४ ॥

यमः सूचने ॥ ६. ३. ४५ ॥

१. A. This sūtra is read along with the previous one.

२. C omits this and the following three sūtras and the commentary thereon.

३. A. ङोद्यम

४. A. वा

वोद्वाहे ॥ ६. ३. ४६ ॥
गमयमतनर्मनादीनां कौ ॥ ६. ३. ४७ ॥
गमेरू च ॥ ६. ३. ४८ ॥
नाञ्चेः पूजायाम् ॥ ६. ३. ४९ ॥
क्किचि दीर्घश्च ॥ ६. ३. ५० ॥
क्विब् स्कन्दस्यन्दोः ॥ ६. ३. ५१ ॥
सेटि ॥ ६. ३. ५२ ॥
थफान्तवाञ्छिलुञ्छीनां वा ॥ ६. ३. ५३ ॥
जान्तनशामनिटि ॥ ६. ३. ५४ ॥
भञ्जेश्चिणि ॥ ६. ३. ५५ ॥
कावाशास इदुपधायाः ॥ ६. ३. ५६ ॥
शासः क्ङिति ॥ ६. ३. ५७ ॥
तिङि हल्यपिति ॥ ६. ३. ५८ ॥
शाहौ ॥ ६. ३. ५९ ॥
हनो जः ॥ ६. ३. ६० ॥
आर्धधातुके ॥ ६. ३. ६१ ॥
अक्ङिति भ्रस्जोर्भर्ज् वा ॥ ६. ३. ६२ ॥
लोपोऽतः ॥ ६. ३. ६३ ॥
येकि ॥ ६. ३. ६४ ॥
यस्य हलः ॥ ६. ३. ६५ ॥
क्यस्य वा ॥ ६. ३. ६६ ॥
णेरनिटि ॥ ६. ३. ६७ ॥
निष्ठायां सेटि ॥ ६. ३. ६८ ॥

१. A omits नम
२. A. This sūtra is read along with the previous.
३. A adds as a separate sūtra अमः
४. A. भर्जो and adds the next sūtra.
५. A omits this sūtra.
६. A omits यस्य
७. A. This sūtra is read along with the previous one.

अयमान्तालवाय्येत्नुषु ॥ ६. ३. ६९ ॥

ल्यपि लघुपूर्वात् ॥ ६. ३. ७० ॥

आपो वा ॥ ६. ३. ७१ ॥

क्षेः क्षी ॥ ६. ३. ७२ ॥

उपदेशेऽज्झनग्रहदृशस्यसिच्सीयुट्तासीनां भावकर्मकर्तृषु चिण्वदिड्वा ॥ ६. ३. ७३ ॥

दीङो लिटि युक् ॥ ६. ३. ७४ ॥

लोपोऽचि क्ङिति चातः ॥ ६. ३. ७५ ॥

ईद्यति ॥ ६. ३. ७६ ॥

माय्यासाङ्गापिवहाग्दाधां हलि ॥ ६. ३. ७७ ॥

लिङ्घेत् ॥ ६. ३ ७८ ॥

मा संयोगादेरस्थः ॥ ६. ३. ७९ ॥

न ल्यपि ॥ ६. ३. ८० ॥

मेङ इद्वा ॥ ६. ३. ८१ ॥

लुङ्लङ्लृङ्क्ष्वडमाङ्योगे ॥ ६. ३. ८२ ॥

अचिश्नुधातुभ्रुवां य्वोरियुवौ ॥ ६. ३. ८३ ॥

अभ्यासस्यासवर्णे ॥ ६. ३. ८४ ॥

स्त्रियाः ॥ ६. ३. ८५ ॥

वांशसोः ॥ ६. ३. ८६ ॥

इणो यण् ॥ ६. ३. ८७ ॥

एरसंयोगादेरनेकाचः ॥ ६. ३. ८८ ॥

ओश्च गतिकारकादेः सुप्यसुधियः ॥ ६. ३. ८९ ॥

वर्षादिकृपुनः कारेभ्यो भुवः ॥ ६. ३. ९० ॥

हुश्नुवोरलिटि ॥ ६. ३. ९१ ॥

भुवोवुग्लुङलिटोः ॥ ६. ३. ९२ ॥

१. A. आपो वाक्षी and omits the next sūtra.

२. A. ग्रहदृभ्यः

३. C omits this sūtra and the commentary thereon.

४. A omits गा

५. A. वर्षादिं पुनः and the rest is regarded as a separate sūtra.

ऊद्गोहोऽचः ॥ ६. ३. ९३ ॥
दुषो णौ ॥ ६. ३. ९४ ॥
वा चित्ते ॥ ६. ३. ९५ ॥
गमजनखनघसां लो लोपोऽपिति ॥ ६. ३. ९६ ॥
किति च हनः ॥ ६. ३. ९७ ॥
हुझल्भ्योऽनिटो हेर्धिः ॥ ६. ३. ९८ ॥
अतो लुक् ॥ ६. ३. ९९ ॥
उतोऽसंयोगपूर्वाद्धातोः ॥ ६. ३. १०० ॥
वा चास्य [1]म्वोर्लोपः ॥ ६. ३. १०१ ॥
नित्यं करोतेर्यै च ॥ ६. ३. १०२ ॥
अत उत्तरापिति ॥ ६. ३. १०३ ॥
श्रमसोर्लोपः ॥ ६. ३. १०४ ॥
श्राभ्यस्तयोरातः ॥ ६. ३. १०५ ॥
ई हलि तिङ्ग्यादाधः ॥ ६. ३. १०६ ॥
इद्दरिद्रः ॥ ६. ३. १०७ ॥
भियो वा ॥ ६. ३. १०८ ॥
हाकः ॥ ६. ३. १०९ ॥
हौ वा ॥ ६. ३. ११० ॥
लोपो यि ॥ ६. ३. १११ ॥
दरिद्रः किति ॥ ६. ३. ११२ ॥
अच्ययुवौ ॥ ६. ३. ११३ ॥
ल्डि वा ॥ ६. ३. ११४ ॥
असिदाधां हावे दद्धिश्च ॥ ६. ३. ११५ ॥
लिट्यनोदेशादेरेकहलमध्येऽतः ॥ ६. ३. ११६ ॥
थलि च सेटि ॥ ६. ३. ११७ ॥
तृफलभजत्रपः ॥ ६. ३. ११८ ॥
राधो हिंसायाम् ॥ ६. ३. ११९ ॥

१. A. खसां
२. A. ह्वोर्लोपः
३. A. ट्यनादेरेत

वाजृभ्रमुत्रसाम् ॥ ६. ३. १२० ॥

फणस्यमस्वनराजभ्राजभ्राशभ्लाशाम्[1] ॥ ६. ३. १२१ ॥

दभस्लेथग्रथाम्[2] ॥ ६. ३. १२२ ॥

मनिपचिमचां नाम्नि ॥ ६. ३. १२३ ॥

नशोऽङि ॥ ६. ३. १२४ ॥

नशसददवादिगुणानाम् ॥ ६. ३. १२५ ॥

अर्वणस्त्रसावनञः ॥ ६. ३. १२६ ॥

मघोनः सौ च वा ॥ ६. ३. १२७ ॥

यचि स्वादावशि सुटि ॥ ६. ३. १२८ ॥

पादः पत् ॥ ६. ३. १२९ ॥

मतौ च वसोः संप्रसारणम् ॥ ६. ३. १३० ॥

श्वयुवमघोनामतद्धिते ॥ ६. ३. १३१ ॥

अल्लोपोऽनः ॥ ६. ३. १३२ ॥

षपूर्वहन्धृतराज्ञामणि ॥ ६. ३. १३३ ॥

ङिश्योर्वा ॥ ६. ३. १३४ ॥

नसंयोगाद्वमः ॥ ६. ३. १३५ ॥

अञ्चेरनः ॥ ६. ३. १३६ ॥

उद ईत् ॥ ६. ३. १३७ ॥

आतोऽनापः ॥ ६. ३. १३८ ॥

विंशतेर्डिंतिंतेः ॥ ६. ३. १३९ ॥

टेरन्यत्रापि ॥ ६. ३. १४० ॥

नस्तद्धिते ॥ ६. ३. १४१ ॥

कलापिकुथुमितैतिलिजाजलिलाङ्गलिशिखण्डिसब्रह्मचारिपीठसर्पिसूकरसक्थ-सुपर्वणां च ॥ ६. ३. १४२ ॥

अश्मनो विकारे ॥ ६. ३. १४३ ॥

चर्मणः कोशे ॥ ६. ३. १४४ ॥

शुनोऽवयवसंकोचयोः ॥ ६. ३. १४५ ॥

अव्ययस्य चानाराच्छश्वतोऽसिति ॥ ६. ३. १४६ ॥

१. A omits भ्राश

२. A. भय

३. A. This portion is read as a separate sūtra.

अहःखे ॥ ६. ३. १४७ ॥

अनव्ययसंख्यैकदेशसर्वेभ्यष्टे ॥ ६. ३. १४८ ॥

समाहारे ॥ ६. ३. १४९ ॥

एकाच्च[2] ॥ ६. ३. १५० ॥

अन्तिकस्य तमेतादेः ॥ ६. ३. १५१ ॥

कादेर्बहुलम् ॥ ६. ३. १५२ ॥

ओरोदस्वयंभुवः ॥ ६. ३. १५३ ॥

अकद्रुपाण्ड्वोर्ढे लोपः ॥ ६. ३. १५४ ॥

यस्यायुसि ॥ ६. ३. १५५ ॥

ङ्याः ॥ ६. ३. १५६ ॥

मत्स्यस्य यः ॥ ६. ३. १५७ ॥

हलस्तद्धितस्य ॥ ६. ३. १५८ ॥

सूर्यागस्त्ययोश्छे च ॥ ६. ३. १५९ ॥

तिष्यपुष्ययोर्नक्षत्रेऽणि ॥ ६. ३. १६० ॥

आपस्यस्य तद्धितेऽनाति ॥ ६. ३. १६१ ॥

क्यच्वोः ॥ ६. ३. १६२ ॥

बिल्वकीयादीनामियस्य ॥ ६. ३. १६३ ॥

टेरिमेष्ठेयस्सु ॥ ६. ३. १६४ ॥

स्थूलदूरयुवक्षिप्रक्षुद्राणां यणादेर्यवोर्गुणश्च ॥ ६. ३. १६५ ॥

बहोरेभूं चास्य ॥ ६. ३. १६६ ॥

इष्ठे युक् च ॥ ६. ३. १६७ ॥

ज्यादादीयसः ॥ ६. ३. १६८ ॥

प्रियस्थिरस्फिरोरुगुरुबहुलतृप्रदीर्घह्रस्ववृद्धवृन्दारकाणां प्रस्थस्फवर्गबंहन्द्राघ-ह्रस्वर्षबृन्दाः ॥ ६. ३. १६९ ॥

र ऋतःपृथुमृदुकृशभृशदृढपरिवृढानाम् ॥ ६. ३. १७० ॥

नैकाचः ॥ ६. ३. १७१ ॥

१. A. This is read along with the previous sūtra.

२. A omits च

३. C. This and the following thirteen sūtras with the commentary thereon is omitted.

अके राजन्यमनुष्ययूनाम् ॥ ६. ३. १७२ ॥

आत्माध्वनोः खे ॥ ६. ३. १७३ ॥

अभावकर्मणोरनो ये ॥ ६. ३. १७४ ॥

अणि ॥ ६. ३. १७५ ॥

मांद्रर्मण एवापत्ये ॥ ६. ३. १७६ ॥

हितनाम्नो वा ॥ ६. ३. १७७ ॥

ब्रह्मणो जातौ ॥ ६. ३. १७८ ॥

उक्ष्णः ॥ ६. ३. १७९ ॥

संयोगादिनः ॥ ६. ३. १८० ॥

गाथिविदथिकेशिगणिपणिनाम् ॥ ६. ३. १८१ ॥

अनपत्ये ॥ ६. ३. १८२ ॥

दाण्डिनायनहास्तिनायनजैह्माशिनेयवाशिनायनिभ्रौणहत्यधैवत्यसारवैश्वाक-हिरण्मयानि ॥ ६. ३. १८३ ॥

इति श्रीसरस्वतीकण्ठाभरणनाम्नि व्याकरणे
षष्ठस्याध्यायस्य तृतीयः पादः
समाप्तः

---

१. A. This sūtra is read along with the previous.

२. A adds आथर्वणिक

अथ चतुर्थः पादः

युवोरनाकावसः ॥ ६. ४. १ ॥
आयनेयीनीयियः फढखछघां तद्धितादीनाम् ॥ ६. ४. २ ॥
ठस्येकः ॥ ६. ४. ३ ॥
इससुग्दोर्भ्यः कः ॥ ६. ४. ४ ॥
तोऽनकस्माच्छश्वतः ॥ ६. ४. ५ ॥
भाविनि गत्युपपदसमासे क्त्वो ल्यप् ॥ ६. ४. ६ ॥
ऋत इद्धातोः ॥ ६. ४. ७ ॥
उपधायाश्च ॥ ६. ४. ८ ॥
उदोष्ठ्यपूर्वस्य ॥ ६. ४. ९ ॥
इदितो नुम् धातोः ॥ ६. ४. १० ॥
मुचलुपलिपविदसिचकृतखिदपिषतृपदफगुफोभशुभां शे ॥ ६. ४. ११ ॥
नशो झलि ॥ ६. ४. १२ ॥
मस्जोऽन्त्यात्पूर्वः ॥ ६. ४. १३ ॥
रधिजभोरचि ॥ ६. ४. १४ ॥
रधेरिट् लिट्येव ॥ ६. ४. १५ ॥
रभेरशब्लिटोः ॥ ६. ४. १६ ॥
लभेश्च ॥ ६. ४. १७ ॥
आङो यि ॥ ६. ४. १८ ॥
उपात्प्रशंसायाम् ॥ ६. ४. १९ ॥
उपसर्गात्खल्घञोः ॥ ६. ४. २० ॥
न सुदुर्भ्यां केवलाभ्याम् ॥ ६. ४. २१ ॥
विण्णमुलोरनुपसर्गस्य वा ॥ ६. ४. २२ ॥
सुट्यधातोरुगितः पुंसि ॥ ६. ४. २३ ॥
अञ्चेः ॥ ६. ४. २४ ॥

१. A. विश

युजेरसमासे ॥ ६. ४. २५ ॥
शावयमः ॥ ६. ४. २६ ॥
बहुर्जिबहुव्रीहौ ॥ ६. ४. २७ ॥
नपुंसकस्येकोऽचि सुपि ॥ ६. ४. २८ ॥
गुणष्टादौ पुंवद्वा ॥ ६. ४. २९ ॥
अस्थिदधिसक्थ्यक्ष्णां तदन्तानां चानङ् ॥ ६. ४. ३० ॥
नाभ्यस्ताच्छतुः ॥ ६. ४. ३१ ॥
शौ वा ॥ ६. ४. ३२ ॥
आच्छीड्योः ॥ ६. ४. ३३ ॥
शप्श्यनोर्नित्यम् ॥ ६. ४. ३४ ॥
सावनडुहः ॥ ६. ४. ३५ ॥
दिव औत् ॥ ६. ४. ३६ ॥
पथिमथ्यृभुक्षामात् ॥ ६. ४. ३७ ॥
शि सुट्यैः ॥ ६. ४. ३८ ॥
थोऽन्थैः ॥ ६. ४. ३९ ॥
इनोऽचि लोपः ॥ ६. ४. ४० ॥
पुंसोऽसुङ् ॥ ६. ४. ४१ ॥
ओत औत् ॥ ६. ४. ४२ ॥
सख्युरितो शावैत् ॥ ६. ४. ४३ ॥
ऋदुशनस्पुरुदंसोऽनेहसां चानङ् सौ ॥ ६. ४. ४४ ॥
न संबुद्धौ ॥ ६. ४. ४५ ॥
अङ्ग वौशनसः ॥ ६. ४. ४६ ॥
कुशस्तुनस्तृच् ॥ ६. ४. ४७ ॥
ठाटाजादौ वा स्त्रियाम् ॥ ६. ४. ४८ ॥
आमनडुहो वा ॥ ६. ४. ४९ ॥
चतुरश्र ॥ ६. ४. ५० ॥
शि सुटि ॥ ६. ४. ५१ ॥

१. A. This sūtra is read along with the previous.

२. This and the following thirteen sūtras with the commentary thereon are missing in C.

असंबुद्धौ ॥ ६. ४. ५२ ॥
अह्नो वा सुप्यात् ॥ ६. ४. ५३ ॥
रायो हलि ॥ ६. ४. ५४ ॥
युष्मदस्मदोरनादेशे ॥ ६. ४. ५५ ॥
औशसम्सु ॥ ६. ४. ५६ ॥
योऽचि ॥ ६. ४. ५७ ॥
शेषे[1] लोपः ॥ ६. ४. ५८ ॥
मान्तस्य[2] युवावौ द्विवचने ॥ ६. ४. ५९ ॥
यूयवयौ जसि ॥ ६. ४. ६० ॥
त्वाहौ सौ ॥ ६. ४. ६१ ॥
तुभ्यमह्यौ ङयि ॥ ६. ४. ६२ ॥
तवममौ ङसि ॥ ६. ४. ६३ ॥
त्वमावेकवचने ॥ ६. ४. ६४ ॥
प्रथमयोरपूर्वसवर्णः ॥ ६. ४. ६५ ॥
त्रिचतुरोः स्त्रियां तिसृचतसृ ॥ ६. ४. ६६ ॥
तिसृका संज्ञायाम् ॥ ६. ४. ६७ ॥
ऋतोरोऽचि ॥ ६. ४. ६८ ॥
जराया जरस् वा ॥ ६. ४. ६९ ॥
त्यदादीनां तँसादिषु चाद्वेः ॥ ६. ४. ७० ॥
किमः कः ॥ ६. ४. ७१ ॥
तस्य सः सौ ॥ ६. ४. ७२ ॥
अदसो दः ॥ ६. ४. ७३ ॥
औ सुलोपश्च ॥ ६. ४. ७४ ॥
अकचि वानौत्वे सादुश्च ॥ ६. ४. ७५ ॥
इदमः स्त्रीपुंसयोरियमयमौ ॥ ६. ४. ७६ ॥
दो मः॥ ६. ४. ७७ ॥

१. A. This sūtra is read along with the previous one.
२. A. This portion is written as a separate sūtra.
३. C. This sūtra and the commentary thereon is missing.
४. A. तदादिषु.

हलन्तकोऽश्[1] ॥ ६. ४. ७८ ॥

टौ सोरनः ॥ ६. ४. ७९ ॥

एतस्य चान्वादेशे द्वितीयायां चैनः ॥ ६. ४. ८० ॥

तृतीयादावश्[2] ॥ ६. ४. ८१ ॥

पादनिशामासहृदययूषदोषां पन्निश्मास्हृद्यूषन्दोषन् शसादौ वा ॥ ६. ४. ८२ ॥

आर्धधातुके ॥ ६. ४. ८३ ॥

अस्तेर्भूः ॥ ६. ४. ८४ ॥

ब्रुवो वचिः ॥ ६. ४. ८५ ॥

चक्षिङः ख्याञ्[3]वर्जने ॥ ६. ४. ८६ ॥

वा लिटि ॥ ६. ४. ८७ ॥

नोससनेषु ॥ ६. ४. ८८ ॥

अजेर्व्यघञपोः[4] ॥ ६. ४. ८९ ॥

तृग्वोर्वा ॥ ६. ४. ९० ॥

ल्यतिकित्यदो जग्धिः ॥ ६. ४. ९१ ॥

लुङ्सनच्घञप्सुघसां[5] ॥ ६. ४. ९२ ॥

लिटि वा ॥ ६. ४. ९३ ॥

वेञो वयिः ॥ ६. ४. ९४ ॥

हनो वध लिङि ॥ ६. ४. ९५ ॥

लुङि च ॥ ६. ४. ९६ ॥

आत्मनेपदे वा ॥ ६. ४. ९७ ॥

इणिकोर्गा ॥ ६. ४. ९८ ॥

णौ गमिरबोधे ॥ ६. ४. ९९ ॥

सनि ॥ ६. ४. १०० ॥

इङश्च ॥ ६. ४. १०१ ॥

गाङ् लिटि ॥ ६. ४. १०२ ॥

लुङ्लङोर्वा ॥ ६. ४. १०३ ॥

१. A. This portion is regarded as a separate sūtra.

२. A. घञप्सु

३. A. This is read along with the previous sūtra.

४. A. घस्तु

५. A. This and the next sūtra are written together.

णौ संश्चङोः ॥ ६. ४. १०४ ॥
वलादेरिट् ॥ ६. ४. १०५ ॥
ग्रहेरस्यालिटि दीर्घः ॥ ६. ४. १०६ ॥
वृद्भ्यो वा ॥ ६. ४. १०७ ॥
न लिङि ॥ ६. ४. १०८ ॥
सिचि परस्मैपदे ॥ ६. ४. १०९ ॥
इट् सनो वा ॥ ६. ४. ११० ॥
लिङ्सिचोरात्मनेपदेषु ॥ ६. ४. १११ ॥
ऋतः संयोगादेरसुटः ॥ ६. ४. ११२ ॥
स्वरतिसूतिसूयतिधूञूदिद्भ्यः ॥ ६. ४. ११३ ॥
रंधनशतृपदृपद्रुहमुहस्नुहस्निहिभ्यः ॥ ६. ४. ११४ ॥
निरः कुषः ॥ ६. ४. ११५ ॥
निष्ठायाः ॥ ६. ४. ११६ ॥
पूङ्क्लिशिभ्यां क्त्वश्च ॥ ६. ४. ११७ ॥
क्षुधिवसिभ्यामिट् ॥ ६. ४. ११८ ॥
अञ्चतेः पूजायाम् ॥ ६. ४. ११९ ॥
लुभो विमोहने ॥ ६. ४. १२० ॥
जुषः क्त्वः ॥ ६. ४. १२१ ॥
ब्रश्चेरसंप्रसारणं च ॥ ६. ४. १२२ ॥
उदितो वा ॥ ६. ४. १२३ ॥
तादेस्सहलुभेषुरुषरिषिभ्यः ॥ ६. ४. १२४ ॥
इवन्तर्धभ्रस्जदम्भुस्वृश्रियूर्णुभरज्ञपिसनितनिपतिदरिद्राभ्यः सनः ॥
६. ४. १२५ ॥
सादेरसिचः कृतॅचृतनृतछृतृदः ॥ ६. ४. १२६ ॥
अनिङ्गमेरिट् ॥ ६. ४. १२७ ॥
नात्मनेपदेषु ॥ ६. ४. १२८ ॥
वृतिवृधिश्रुधिस्यन्दिभ्योऽन्यत्र ॥ ६. ४. १२९ ॥

१. A. रथण
२. A. तृपद्रुह
३. A. इण्णिष्ठायाः
४. A. This is written as a separate sūtra.

तासश्च क्रपः ॥ ६. ४. १३० ॥

स्नोरात्मनेपदे ॥ ६. ४. १३१ ॥

क्रमः ॥ ६. ४. १३२ ॥

तद्विषयात्तुः ॥ ६. ४. १३३ ॥

तत्रैवशुणादेः कृतः ॥ ६. ४. १३४ ॥

केरग्रहस्निहकुचपठवद्भरणदीधीदिभ्यः ॥ ६. ४. १३५ ॥

अच एकाचोऽनूदच्छिवश्रीडीङ्शीङ्युरुस्नुनुक्षुश्णुवृङ्वृञः ॥ ६. ४. १३६ ॥

शके लृदितः ॥ ६. ४. १३७ ॥

विदेरलुकः ॥ ६. ४. १३८ ॥

स्निषिपुषिसिधिबुधिस्विदिमश्यना ॥ ६. ४. १३९ ॥

हन्घस्वसप्रच्छः ॥ ६. ४. १४० ॥

परिमुसिविवाच्चः ॥ ६. ४. १४१ ॥

भ्रस्जस्भुरुखंसंरभं विसृत्याययुनिभाज्जः ॥ ६. ४. १४२ ॥

अच्छिसखिवहंतुस्कंपनुभिक्षुशाद्दः ॥ ६. ४. १४३ ॥

सारावंरुक्षुयुक्रुशुव्याद्धः ॥ ६. ४. १४४ ॥

आस्खलिलुच्छुक्षितिसूतवशात्पः ॥ ६. ४. १४५ ॥

यरलाद्भः ॥ ६. ४. १४६ ॥

यरनगान्मः ॥ ६. ४. १४७ ॥

लिविमृदिस्पृदन्दरुक्षुरेः शः ॥ ६. ४. १४८ ॥

वितुदुत्विद्विशिशुक्रुपेः षः ॥ ६. ४. १४९ ॥

दिनमिवदरुदुलिरिलोर्हः ॥ ६. ४. १५० ॥

श्रयुगूर्णभ्यः कितः ॥ ६ ४. १५१ ॥

ग्रहिगुहिभ्यां च सनः ॥ ६. ४. १५२ ॥

स्वार्थे ॥ ६. ४. १५३ ॥

श्विडीङ्दिदृभ्यो निष्ठायाम् ॥ ६. ४. १५४ ॥

१. A. This is read along with the previous sūtra.

२. A. This is read along with the previous sūtra.

३. A. नुदितः

४. A. पुपरि

५. A. हनु

६. A. This sūtra is read along with the previous one.

यतोऽपतेर्वा ॥ ६. ४. १५५ ॥

आदितः ॥ ६. ४. १५६ ॥

भावादिकर्मणोर्वा ॥ ६. ४. १५७ ॥

शकेः कर्मणि ॥ ६. ४. १५८ ॥

जपिवम्याश्वसिविश्वसिभ्यः ॥ ६. ४. १५९ ॥

क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानिमन्थमनस्तमस्सक्ताविस्पष्ट-
स्वरानायासभृशेषु ॥ ६. ४. १६० ॥

धृषिशसिभ्यां प्रागल्भ्ये ॥ ६. ४. १६१ ॥

दृढः स्थूलबलिनोः ॥ ६. ४. १६२ ॥

प्रभौ परिबृढः ॥ ६. ४. १६३ ॥

कृच्छ्रगहनयोः कषः ॥ ६. ४. १६४ ॥

घुषेरविशब्दने ॥ ६. ४. १६५ ॥

अर्देः सन्निविभ्यः ॥ ६. ४. १६६ ॥

अभेरविदूरे ॥ ६. ४. १६७ ॥

णेर्वृत्तं ग्रन्थे ॥ ६. ४. १६८ ॥

वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः ॥ ६. ४. १६९ ॥

रुषामत्वरसङ्घुषास्वनिभ्यः ॥ ६. ४. १७० ॥

हृषेर्लोमकेशकर्तृकात् ॥ ६. ४. १७१ ॥

विस्मितप्रतिहतयोश्च ॥ ६. ४. १७२ ॥

क्तेरपाद्यायश्चिश्च ॥ ६. ४. १७३ ॥

क्तिनि नित्यम् ॥ ६. ४. १७४ ॥

सृभृवृस्तुद्रुस्रुश्रुभ्यो लिटः ॥ ६. ४. १७५ ॥

कृञोऽसुटः ॥ ६. ४. १७६ ॥

ऋतस्तासिनित्यानिटस्थलः ॥ ६. ४. १७७ ॥

अचो वा ॥ ६. ४. १७८ ॥

पाठेऽत्वतः ॥ ६. ४. १७९ ॥

सृजिदृशिभ्याम् ॥ ६. ४. १८० ॥

ऋवृञ्व्येञदिभ्य इट् ॥ ६. ४. १८१ ॥

१. A. वृत्तग्रन्थे २. C omits क्तेः

कसोरेकाजाद्धसिभ्यः ॥ ६. ४. १८२ ॥

गमहनदृशविशविदभ्यो वा ॥ ६. ४. १८३ ॥

ऋहनिभ्यः स्यस्य ॥ ६. ४. १८४ ॥

अञ्जेस्सिचः ॥ ६. ४. १८५ ॥

स्तुसुधूञ्भ्यः परस्मैपदेषु ॥ ६. ४. १८६ ॥

यमिरमिनमातां सुक् च ॥ ६. ४. १८७ ॥

ऋसिपूङ्ज्वशकृगृदधृप्रच्छिभ्यस्सनः ॥ ६. ४. १८८ ॥

रुदिस्वपिश्वस्यनिजक्षिभ्यस्तिङः ॥ ६. ४. १८९ ॥

जनीशीडिभ्यस्सेध्वयोः ॥ ६. ४. १९० ॥

आने मुगतः ॥ ६. ४. १९१ ॥

ईदस्यासः ॥ ६. ४. १९२ ॥

इति श्री सरस्वतीकण्ठाभरणनाम्नि व्याकरणे
षष्ठस्याध्यायस्य चतुर्थः पादः
समाप्तः

॥ अथ सप्तमोऽध्यायः ॥

—:o:—

मृजेर्वृद्धिः ॥ ७. १. १ ॥

ऋतोऽचि वा ॥ ७. १. २ ॥

अजागृणिश्वीनाम् सिचि परस्मैपदेषु ॥ ७. १. ३ ॥

हलोऽचः ॥ ७. १. ४ ॥

नेटि ॥ ७. १. ५ ॥

वोर्णोः ॥ ७. १. ६ ॥

हलादेरङ्गस्यन्तक्षणश्वसेदितोऽतँ उपधायाः ॥ ७. १. ७ ॥

व्रेजवदर्लोन्नित्यम् ॥ ७. १. ८ ॥

ङिणति ॥ ७. १. ९ ॥

अचः ॥ ७. १. १० ॥

किति च तँद्धितेऽचामादेः ॥ ७. १. ११ ॥

केकयमित्रयुप्रलयानां यादेरियश्च ॥ ७. १. १२ ॥

देविकाशिंशपादीर्घसत्रश्रेयसां तत्प्राप्तावात् ॥ ७. १. १३ ॥

वहीनरस्यैत् ॥ ७. १. १४ ॥

एवः पदान्तात्प्रागैच् ॥ ७. १. १५ ॥

द्वारस्वरस्वस्तिस्वादुमृदुंव्यल्कशश्वँन्स्फ्यकृतस्वस्वाध्यायस्वप्रामाणाम् ॥७.१.१६॥

१. A reads this as the second sūtra.

२. A. This portion is written as a separate sūtra.

३. A. This and the next sūtra are written as one.

४. A omits अतः

५. A. वदव्रज.

६. A. अजः and the next sūtra is written as part of this sūtra.

७. A. This portion is regarded as a separate sūtra.

८. A adds दित्यवचः

९. A. This portion is read as a separate sūtra.

१०. A omits मृदु

११. A. शश्विन् कृतस्व-

न्यग्रोधस्य केवलस्य ॥ ७. १. १७ ॥

न णचः ॥ ७. १. १८ ॥

स्वागतस्वध्वरस्वङ्गव्यङ्गव्यडव्यवहारव्यायामानाम् ॥ ७. १. १९ ॥

श्वादेरिति ॥ ७. १. २० ॥

इञः ॥ ७. १. २१ ॥

पदान्तस्यानिति वा ॥ ७. १. २२ ॥

न्यङ्कोश्च ॥ ७. १. २३ ॥

गुरुलघुसंहतपदार्थोर्ध्वमुहूर्तादीनां उत्तरपदस्य ॥ ७. १. २४ ॥

अवयवाद्ततोः ॥ ७. १. २५ ॥

सुखर्वार्धेभ्यो जनपदस्य ॥ ७. १. २६ ॥

अमद्राणां दिशः ॥ ७. १. २७ ॥

प्राचां ग्रामनगराणाम् ॥ ७. १. २८ ॥

संख्याधिकाभ्यां संख्यायाः ॥ ७. १. २९ ॥

संवत्सरपरिमाणस्याशाणकुलिजस्यासंज्ञायाम् ॥ ७. १. ३० ॥

वर्षस्याभविनि[2] ॥ ७. १. ३१ ॥

जाते[3] प्रोष्ठभद्राभ्यां पदस्य ॥ ७. १. ३२ ॥

इद्भगसिन्धोः पूर्वपदस्य च[4] ॥ ७. १. ३३ ॥

अनोः शतिकेहोऽसंवरणरहत्संवत्सराणाम्[5] ॥ ७. १. ३४ ॥

कुरोः कतपञ्चालयोः ॥ ७. १. ३५ ॥

अधेर्देवभूतयोः ॥ ७. १. ३६ ॥

इहपराभ्यां लोकस्य ॥ ७. १. ३७ ॥

सर्वाद्भूमिपुरुषयोश्च ॥ ७. १. ३८ ॥

अस्याद्यस्यहेत्योः ॥ ७. १. ३९ ॥

वध्योगप्रयोगाभिगमागारवेणुपरस्त्रीपुष्करसदुदकशुभ्रसूत्रनडचतुर्विद्यासि-हस्याशातकुम्भसुखशयनादीनां च ॥ ७. १. ४० ॥

राजपुरुषपरिमण्डलप्रतिभूसर्ववेदानां ष्यञि ॥ ७. १. ४१ ॥

१. A omits व्यङ्ग

२. A. स्य भाविनि

३. A. This is read along with the previous sūtra.

४. A. This portion is read as a separate sūtra.

५. A. शतितहोद्-

प्राचां नगरान्तस्य ॥ ७. १. ४२ ॥
देवतानां द्वन्द्वे सूक्तहविषोः ॥ ७. १. ४३ ॥
नेन्द्रस्य परस्य[1] ॥ ७. १. ४४ ॥
अर्धात्परिमाणस्य पूर्वस्य[2] तु वा ॥ ७. १. ४५ ॥
नातः ॥ ७. १. ४६ ॥
प्राद्वाहनस्यढे ॥ ७. १. ४७ ॥
ढस्य च ॥ ७. १. ४८ ॥
नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् ॥ ७. १. ४९ ॥
यथातथयथापुरयोः पर्यायेण ॥ ७. १. ५० ॥
हनस्तोऽचिण्णलोः ॥ ७. १. ५१ ॥
आतो युक् चिण्कृतोः ॥ ७. १. ५२ ॥
नमस्सेटोवृद्धिर्खम्यमिकम्याचमः[3] ॥ ७. १. ५३ ॥
उद्यमोपरमौ ॥ ७. १. ५४[4] ॥
जनिवध्योः ॥ ७. १. ५५ ॥
विश्रमेर्वा ॥ ७. १. ५६ ॥
णेल्युत्तमे ॥ ७. १. ५७ ॥
ऋहीव्ली[5]रीक्नूयीक्ष्माय्यातां पुङ्णौ ॥ ७. १. ५८ ॥
शाच्छासाह्वाव्यावेषां युक् ॥ ७. १. ५९ ॥
वो विधूनने जुक् ॥ ७. १. ६० ॥
धूञूप्रीओर्नुक् ॥ ७. १. ६१ ॥
लियँस्नेहद्रवीकरणे वा ॥ ७. १. ६२ ॥
लो लुक् ॥ ७. १. ६३ ॥

१. A. This portion is read as a separate sūtra.
२. A adds as separate sūtras:—
दीर्घाद्वारुणस्य ॥
जङ्गलधेनुवलजान्तस्य वा ॥
३. A. This portion is read as a separate sūtra.
४. A. वृद्धिरलं
५. A. This is read along with the previous sūtra.
६. A. ऋह्लीप्रीह्लिप्रीरि.
७. A. यियस्नेह.

पातेः[1] ॥ ७. १. ६४ ॥
भियो हेतुभये षुक् ॥ ७. १. ६५ ॥
स्फायो वः ॥ ७. १. ६६ ॥
शदेरगतौ तः ॥ ७. १. ६७ ॥
रुहेः पो वा ॥ ७. १. ६८ ॥
मितां ह्रस्वः ॥ ७. १. ६९ ॥
चिण्णमुलोर्दीर्घश्च ॥ ७. १. ७० ॥
छादेर्घेऽद्व्याद्युपसर्गस्य ॥ ७. १. ७१ ॥
इस्मन्त्रन्क्विषु ॥ ७. १. ७२ ॥
चङ्युपधायाः ॥ ७. १. ७३ ॥
णेश्च ॥ ७. १. ७४ ॥
नाग्लोपि शास्वृदिताम् ॥ ७. १. ७५ ॥
भ्राजभासभाषदीपजीवमीलपीडां वा ॥ ७. १. ७६ ॥
कणवणभणश्रणलँपह्वेञां च ॥ ७. १. ७७ ॥
ऊर्णोत् ॥ ७. १. ७८ ॥
घ्र इत् ॥ ७. १. ७९ ॥
ष्ठ्यः ॥ ७. १. ८० ॥
पिबः पीप्यः साभ्यासस्य ॥ ७. १. ८१ ॥
देङो दिगि लिटि ॥ ७. १. ८२ ॥
हादेः हत् क्तिन्निष्ठयोः ॥ ७. १. ८३ ॥
प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः ॥ ७. १. ८४ ॥
मामकनरकयोश्च ॥ ७. १. ८५ ॥
अधातुर्लक्ष्यपूर्वकाभ्यामाप्स्थानस्य वा ॥ ७. १. ८६ ॥
भस्त्रैषाजाज्ञाद्वास्वानाम् ॥ ७. १. ८७ ॥

१. A. This is read as part of the previous sūtra.
२. A. भादेः
३. A. कणप्रभण-
४. A. लसहेणां
५. A. उतुम्
६. A. This is read along with the previous sūtra.
७. A. This is read as a separate sūtra.
८. A. त्यक्तन्यका
९. A. माप्सा

अभाषितपुंस्कादा च ॥ ७. १. ८८ ॥
वर्तकाशकुनौ ॥ ७. १. ८९ ॥
सूतकापुत्रकान्बृन्दारकाः ॥ ७. १. ९० ॥
न[1] यत्तत्यकानाम् ॥ ७. १. ९१ ॥
आशिषि ॥ ७. १. ९२ ॥
उत्तरपदलोपे ॥ ७. १. ९३ ॥
क्षिपकाध्रुवकाधुवकालहकाचरकाचटकेष्टकैडकैरकाकरकाबकालकादण्डकापि-
प्पकाकन्यकामेनकादीनाम् ॥ ७. १. ९४ ॥
तारका ज्योतिषि ॥ ७. १. ९५ ॥
वर्णका तान्तवे ॥ ७. १. ९६ ॥
अष्टका पितृदेवत्ये ॥ ७. १. ९७ ॥
चजोः कुघिण्यतोः ॥ ७. १. ९८ ॥
न्यञ्चिमस्जिभ्रस्जीनामौ ॥ ७. १. ९९ ॥
तञ्चिवञ्चथो रकि ॥ ७. १. १०० ॥
उपावाभ्यां सृजोऽचि ॥ ७. १. १०१ ॥
व्यतिसञ्ज्यनुसञ्ज्योश्च ॥ ७. १. १०२ ॥
पचेर्दूरादिभ्यो णे ॥ ७. १. १०३ ॥
कपोतोलूकश्वमांसेभ्योऽणि ॥ ७. १. १०४ ॥
उचः के गुणश्च ॥ ७. १. १०५ ॥
शुचिरुच्योर्घञि ॥ ७. १. १०६ ॥
मिहेर्ह्रस्वाचि संज्ञायाम् ॥ ७. १. १०७ ॥
वहेः संप्रसारणं चानुपर्गस्य ॥ ७. १. १०८ ॥
दहेर्न्यवाभ्यां घञि ॥ ७. १. १०९ ॥

१. A. सूत्रका
२. A. न यत्यका
३. A omits ध्रुवका
४. A. तञ्चिवञ्चिशकीनां
५. C. This and the next sūtra are written as part of the commentary.
६. A. अचः
७. A. रुचि
८. A adds as a separate sūtra उञ्जेर्दश्चोपधायाः ॥
९. A. वहेः प्रसारणं

अर्हः ॥ ७. १. ११० ॥

हन्तेर्ञ्णिति ॥ ७. १. १११ ॥

उपधालोपे च ॥ ७. १. ११२ ॥

द्वित्वहेतौ ॥ ७. १. ११३ ॥

हेरचङि ॥ ७. १. ११४ ॥

सँल्लिटोर्जेः ॥ ७. १. ११५ ॥

चेर्वा ॥ ७. १. ११६ ॥

न क्ङाद्यजिव्रज्यादेः निष्ठायां सेटः ॥ ७. १. ११७ ॥

भुजन्युब्जौ बाहूपतापयोः ॥ ७. १. ११८ ॥

वञ्चेर्गतौ ॥ ७. १. ११९ ॥

प्रयाजानूयाजोपांशुयाजपत्नीसंयाजर्तुयाजा यज्ञाङ्गे ॥ ७. १. १२०

ण्य आवश्यके ॥ ७. १. १२१ ॥

प्रवचयजस्यजाम् ॥ ७. १. १२२ ॥

वचोऽशब्दसंज्ञायाम् ॥ ७. १. १२३ ॥

निप्राभ्यां युजः शक्ये ॥ ७. १. १२४ ॥

भोज्यमन्ने ॥ ७. १. १२५ ॥

रुहेर्विन्यग्भ्यां क्विबचोर्धः ॥ ७. १. १२६ ॥

ओतो लोपः ध्यनि ॥ ७. १. १२७ ॥

क्सस्याचि ॥ ७. १. १२८ ॥

लुंग्वादुहंदिहलिहगुहिभ्य आत्मनेपदे दन्त्ये ॥ ७. १. १२९ ॥

शमामष्टानां ईँये दीर्घः ॥ ७. १. १३० ॥

ष्ठिवुक्लम्वाचमां शिँल्क्रिकरणे ॥ ७. १. १३१ ॥

क्लमः परस्मैपदेषु ॥ ७. १. १३२ ॥

इषुगमियमां छः ॥ ७. १. १३३ ॥

१. A. This is read as part of the previous sūtra.

२. A. This is read as part of the previous sūtra.

३. A. This portion is regarded as a separate sūtra.

४. A. दीर्घः ध्ये

५. A. शब्विकरणे

घ्राधाध्मास्थाम्नादाण्दृश्यर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीय-
सीदाः ॥ ७. १. १३४ ॥

सर्तेर्धावो वेगितायां गतौ ॥ ७. १. १३५ ॥

व्राजनोर्जा ॥ ७. १. १३६ ॥

ष्वादीनां ह्रस्वः ॥ ७. १. १३७ ॥

मिदेरेत् ॥ ७. १. १३८ ॥

सृजिदृशोर्झल्यं गुणवृद्धिप्रसङ्गे ॥ ७. १. १३९ ॥

स्पृशमृशकृ[1]शतृपदपसृपां वा ॥ ७. १. १४० ॥

इति श्री सरस्वतीकण्ठाभरणनाम्नि व्याकरणे
सप्तमस्याध्यायस्य प्रथमः पादः
समाप्तः

—

१. A omits धौ

२. A. दृष.

अथ द्वितीयः पादः

सार्वधातुकार्धधातुकयोर्गुणः ॥ ७. २. १ ॥

जुस्पुकोः ॥ ७. २. २ ॥

जागुरक्कस्कानेकिति ॥ ७. २. ३ ॥

अचिण्णलिङ्णिति ॥ ७. २. ४ ॥

लघोरुपधायाः ॥ ७. २. ५ ॥

नाभ्यस्तस्याचि सार्वधातुके ॥ ७. २. ६ ॥

अपिति ॥ ७. २. ७ ॥

अनाम्लिट्यजागुः ॥ ७. २. ८ ॥

क्ङिति ॥ ७. २. ९ ॥

यङ्यक्क्यलोपे वृद्धिश्चातिङ्ङि ॥ ७. २. १० ॥

कुटादीनामञ्णिति ॥ ७, २. ११ ॥

विज इटि ॥ ७. २. १२ ॥

ऊर्णोर्वा ॥ ७. २. १३ ॥

निष्ठायामशीङ्पूस्विदिमिदिस्विदिधृषः ॥ ७. २. १४ ॥

मृषेरक्षमायाम् ॥ ७. २. १५ ॥

उदुपधस्य शव्वतो भावादिकर्मणोर्वा ॥ ७. २. १६ ॥

मृडमृदगुधकुषक्लिशवदवसःलुचां क्ित्व ॥ ७. २. १७ ॥

ऋततृषमृषकृशां वा ॥ ७. २. १८ ॥

रलोर्ह्लादेरिदुदुपधस्य सनि च ॥ ७. २. १९ ॥

रुदविदमुषग्रहाम् ॥ ७. २. २० ॥

१. A. This is read along with the previous sūtra.

२. A adds as a separate sūtra थपोत्कि ॥

३. A. This is read along with the previous sūtra.

४. A. च्छति.

५. A. This portion is regarded as a separate sūtra.

६. A. वृक्षोरक्ष.

७. A. सथाफान्तयुचाङ्क्तित्वः

सन्यनिटि ॥ ७. २. २१ ॥
लिङ्सिचोरुपधायाः ॥ ७. २. २२ ॥
उश्च ॥ ७. २. २३ ॥
सिचि दाधास्थामिच्च ॥ ७. २. २४ ॥
